Birla Central Library
PILANI (Jaipur State)
Class No :- S[redacted]
Book No :- D[redacted]1DT
Accession No :- 16513

REQUEST
IT IS EARNESTLY DESIRED THAT THE BOOK BE HANDLED WITH CARE AND BE NOT MARKED, UNDERLINED OR DISFIGURED IN ANY OTHER WAY, OTHERWISE IT WILL HAVE TO BE REPLACED OR PAID FOR BY THE BORROWER IN THE INTEREST OF THE LIBRARY
LIBRARIAN.

THE TRIVANDRUM SANSKRIT SERIE

No. I.

THE

DAIVA

OF

DEVA

WITH THE COMMENTARY

PURUSHAKÂRA

OF

KRISHṆALÎLÂSUKAMUNI

Edited with Notes

BY

T. GAṆAPATI ŚÂSTRÎ

Principal, His Highness the Maharajah's Sanskrit College, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1905.

(All Rights Reserved.)

॥ श्रीः ॥

अनन्तशयनसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः १.

दैवं

देवप्रणीतं

श्रीकृष्णलीलाशुकमुनिना

विरचितया

पुरुषकार-

समाख्यया व्याख्यया समेतं

अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितं

लघुटिप्पण्या च संयोजितम् ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०८०, क्रैस्ताब्दाः १९०५.

INTRODUCTION.

It was announced in my preface to Bhaktimanjari published last year, that the publication of the ancient Sanskrit works in the Palace Library has been undertaken under command of His Highness The Maharajah. The present publication marks the beginning of the work; and as No. I. of "The Trivandrum Sanskrit Series" is now given to the public, a grammatical work, Daiva (दैव), with its commentary, Purushakara (पुरुषकार).

Daiva has been so called from the name of its author Deva (देव). The Dhatuvrittis (धातुवृत्ति), and other works of Maitreyarakshita (मैत्रेयरक्षित), Kshiraswamin (क्षीरस्वामी), Dhanapala (धनपाल), Sakatayana (शाकटायन) etc. have contributed to the composition of Daiva; and of these, the opinion of Maitreyarakshita has been mostly †followed. The subject matter of the work is the purpose (फल) of the repetition of those roots of *like* form, which in Panini's Dhatupatha (धातुपाठ), after being once enumerated, are again mentioned in the same or a different conjugation (विकरण). This is in many places shown by taking the root, its meaning, and its conjugation, singly or all together, or only two of them when that alone is possible, and merely pointing out the difference of form in the present (लट्), potential (लिङ्), or imperfect tense (लङ्). In a few other places, the peculiarity is explained in words; thus:—

'स्वरभेदाद् द्विरुच्यते' (Sloka 55).
'इटा भिदा' (Sloka 116).

In this work, not merely the roots which are identical in form, like भू (to be) and भू (to obtain), have been taken by the author as like roots, but also those which, though differing somewhat, are yet in the main similar in form, such as अकि अङ्कि, निद नेद, etc. These roots, however, have not been all dealt with. It appears to have been the object of the author, that

† See page 96.

from the explanation given of the greater number of them, the rest are easily to be understood. He says also

'सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्नुक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥' (Sl. 200).

The roots are arranged as far as possible alphabetically in the order of their endings. But as an exception, the root भू, with which Dhatupatha (धातुपाठ) begins, has been explained at the very commencement of this work also, as it denotes *satta* (सत्ता) which is Brahman, and is also expressive of auspiciousness. Metrical form has been adopted in the composition of this work to facilitate scholars in retaining the subject-matter in memory. The stanzas in this work number 200, if the *commentary is followed and the benedictory stanza included. No new technical expressions have been employed in this work except those already in vogue in Grammar. What is seen at the end of the work, viz.

'चुरादिक्षुर्युजादिर्युः स यस्माण्णिज्विभाषितः' (Sl. 199.)

cannot be taken as new Paribhasha (परिभाषा), since the instances given are merely cases of Lakshana (लक्षणा) conveying the meaning of a whole expression by a part of it, as नप being used to denote नपुंसक. The commentator also explains that it was to indicate the unimportance of this apparent Paribhasha, that it has not been placed at the beginning of the work.

Purushakara, the commentary, is a work of Krishnalilasuka (कृष्णलीलाशुक). Suitably to the title of the original work, Daiva, the commentary is named Purushakara so as to imply, as it were, that just as Daiva alone, which is another name for Destiny (भाग्य), cannot bring one to the destined fruits without one's own exertions (पुरुषकार), so the understanding of the original work, Daiva, cannot be clear without the commentary. By a complete exposition of the full meaning intended wherever it is likely to be wished for, and presentation at

* The commentary mentions also the other view that the mangala sloka is not to be included in the work (p. 8.)

length of arguments serving to set at rest controversial points regarding †roots, §their forms, $meanings etc., Purushakara clearly impresses on the mind the sense of the original, Daiva. The latter is so terse, looking almost like a sutra, that the commentator has described Purushakara as a Varttika (वार्त्तिक) of Daiva.

'||उक्ता *नुक्त ‡दुरुक्तानि स्थाने स्थाने विविञ्चता ।
कृष्णलीलाशुकेनेदं कीर्तितं दैववार्त्तिकम्' (P. 127).

The manner and style of this commentary which, in barely sufficient and simple words conveys deep meaning, render it impossible not to state that Purushakara has nearly approached Kaiyata's work. The commentator's gloss on the first stanza of Daiva shows clearly his mastery in the Vedanta Philosophy.

Purushakara is cited in many instances as an authority in his Dhatuvritti by ¶Sayanacharya (सायणाचार्य), who is himself a great authority, and Daiva also in a few places; e. g.—

" 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' अत्र कैयट-पुरुषकार-मैत्रेयादिषु तृतीयो न पठ्यते"

" 'लाज लाजि भर्त्सने च' भर्त्सनग्रहणं भर्जनस्याप्युपलक्षणमिति पुरुषकारः"

" 'इट किट कटी गतौ' .... अयं पक्षः समर्थितः पुरुषकारे .... —'अन्ये पुनरुभावपि न पठन्ति । व्यक्तं चैतद् धनपालशाकटायनवृत्त्योः । अपि च । शोटृ गर्व इत्यादिकान् कांश्चित् धातून् पठित्वा .... उदयतीत्यादि चैवमसाध्वेवास्तु' इति"

thus in many places, and

" 'अम्भु प्रमादे' .... दैवेऽप्येवमेवोक्तम्".

There are also a few instances in which Sayana has extracted passages of Purushakara without mentioning the source, e. g.—

† See p. 37. § See p. 23. $ See p. 65. || See p. 29 for instance. * See p. 23 for instance. ‡ See p. 12, 13, 28 and a few others elsewhere. ¶ By Bhattoji Dikshita also in प्रौढमनोरमा, and by Naraya Batta in प्रक्रियासर्वस्व.

"नट नृत्तौ .... 'यत्कारिषु नटव्यपदेशः । न तु मार्गदेशी-शब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च, यत्कारिषु नर्तकव्यपदेशः । तत्र वाक्यार्थाभिनयो नाट्यं, पदार्थाभिनयस्तु नृत्यम् । अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या स्वगात्रविक्षेपो नृत्तमिति तद्विदः । नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्' इत्यभेदव्यवहारो निरूढलक्षणया नेयः' "

Disagreement from Purushakara is also found in Sayana's work; viz., his remark

"एवञ्च पुरुषकारादिषु अतिट्टिषत इति तकारस्य शेषेणोदाहरणप्रदर्शनं चिन्त्यम्"

about the form अतिट्टिषते, which is according to one view *admitted in Purushakara as a form from the root अट्. But as such differences of opinion among authors are only common, and as the few contradictions raised can be met, Purushakara deserves to be regarded by grammarians as an authority faultless in every way.

In that portion of Sayana's Pratyayantadhatuvritti (प्रत्ययान्तधातुवृत्ति) where he deals with the form (बहून बहुं वाचष्टे) भाव. बति is found the following statement :—

"यदुक्तं पुरुषकारे बहयतीत्युदाहृत्य — 'इष्ठनि यत्फिषः कार्यं, तण्णावप्यतिदिश्यते । न चेष्ठनि यिट् फिषो भूभावश्च, भुवो यिट्सन्नियोगाशिष्टत्वात् । तेन न्यासे तु भावयतीति चिन्त्या प्राप्तिः' इति".

But the quotation is not found in Purushakara; and it is not probable that it existed in the missing leaf mentioned § later on, as the context does not require reference to Subdhatu (सुब्धातु) at that place, and as no instances are seen where the commentator has introduced other topics than those immediately relevent to the subject dealt with in Daiva. It would appear therefore that there is another work of the same name,

* See p. 63. § See p. 6 Introduction.

Purushakara, treating about Subdhatu (सुब्धातु). The commentator's name is found at the close of two other works in the Palace Library, namely Abhinavakaustubhamala (अभिनव कौस्तुभमाला), and Dakshinamurtistava (दक्षिणामूर्तिस्तव).

" श्रीकृष्ण *केलिशुकवाङ्मयवीचिमाला-
लीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥"

" त्रिभुवनसुभगेयं दक्षिणामूर्तिमूर्त्तौ
भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतु जयतु देवी भारती जीवलोक-
श्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥"

That the author of our Purushakara was a devotee of Sri-Krishna (श्रीकृष्ण) is clearly seen from its commencing and concluding stanzas; and his devotion to Dakshinamurti accords well with his reputation as a §sage (मुनि). From these and the depths of thought found in these two works, it can be inferred that Krishnalilasuka mentioned as the author of these works is none other than the author of Purushakara. Probably the commentator acquired the name of Krishnalilasuka on account of the devotion to Sri Krishna and excellence in sweetness of diction found together in him.

As regards Deva, no other work of his is known.

When exactly Deva or Krishnalilasuka lived, it is not possible to determine. It is plainly seen, however, that their time was anterior to that of Sayanacharya, whose date is known as the middle of the fourteenth century A. D.
As our commentator makes reference to Hemachandra (हेमचन्द्र) who lived in the middle of the twelfth century, it follows that he should have lived at some time in the interval between the end of the twelfth and the beginning of the fourteenth centuries.

---

* केलि the synonym for लीला is used for the sake of metre. §The original manuscripts of the three works conclude 'इति श्रीकृष्णलीलाशुकमुनि ... ...'

Krishnalilasuka's date may therefore be taken roughly as the thirteenth century A. D.

As regard Deva the *anxiety frequently displayed by the commentator in Purushakara to explain Daiva so as to be in conformity with Kshiraswamin, leads naturally to the inference that Deva should have lived posterior to Kshiraswamin referred to. Now it is extremely probable that Kshiraswamin is the same as the Vyakarana (व्याकरण) tutor, Kshira, of king Jayapida (जयापीड) of 751 A. D., who revived the study of Mahabhashya (महाभाष्य) and is described in Rajatarangini †(राजतरङ्गिणी).

'देशान्तरादागमय्य व्याचक्षाणः क्षमापतेः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् सम्भृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥'

Hence the date of our author, Deva, may be fixed as between the ninth and twelfth centuries A. D.

At the end of Purushakara and after the stanza:—

'कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥'

there is found another benedictory stanza (मङ्गलाशंसाश्लोकः):—

'काञ्चीति काञ्चन पुरीं प्रथिताद्भुतश्रीः
काभिश्चिदुत्सवविभूतिपरम्पराभिः ।
चेतःस्थितिं च जगतामधिवासयन् वो
++++++++ विजयाय भूयात् ॥'

If this latter is to be taken as having been composed by Krishnalilasuka himself, it may also be surmised that Conjivaram (काञ्चीपुर) was his place of residence. $

The original palmleaf manuscripts of Daiva and Purushakara existing in the Palace Library are these —

*See p. 43. See 4th Taranga, stanzas 488 and 489 Vol. I. Nirnayasagara Press Edition. $In p. 12 of Purushakara, we have 'बली पुरुषकारो हि दैवमप्यतिवर्तते' which is also found in Chap. I. Sarirasthana (शारीरस्थान) Ashtangahridaya (अष्टाङ्गहृदय).

§(a)	Daiva		(in Malayalam characters)
†(b)	Do.		Do.
*(c)	Purushakara	(with Daiva)	Do.
$(d)	Do	(incomplete)	Do.

In manuscript No. (c) above mentioned, the94th leaf is missing. But as thereby only 360 letters could have been lost at the most, and as, after much enquiry, no other copy of Purushakara, not even a portion of it, could be procured, I had to content myself with the very nearly complete manuscript. From these four manuscripts, and consulting Sayana's Dhatuvritti and other treatises, I have edited this work. I have also added a few foot notes to bring out the meaning of Purushakara here and there.

Trivandrum,
13th July 1905.

T. GANAPATI SASTRI.

§ This is correct, 200 years old and contains 19 leaves of 15 lines each, and 31 letters in each line. † This is generally correct, 100 years old, contains 14 leaves of 18 lines each, and 24 letters in each line. * This is mostly correct, 200 years old, contains 102 leaves, of 16 lines each and 23 letters in each line. $ This is correct, 100 years old, contains 31 leaves of 24 lines each, and 34 letters in each line.

॥ श्रीः ॥

निवेदना ।

एष समारम्भस्तस्य व्यापारस्य, योऽत्रत्यराजकीयग्रन्थशालास्थितानां प्राचीनग्रन्थानां मुद्रणेन प्रकाशनं नाम महामहिम्ना श्रीमूलकरामवर्मवञ्चिमहाराजेन सदयमाज्ञप्त इति भक्तिमञ्जर्याः परुत्प्रकाशिताया उपोद्घाते न्यवेदयम् । एतस्याम् 'अनन्तशयनसंस्कृतग्रन्थावलौ' दैवनामा व्याकरणग्रन्थः पुरुषकाराख्यया व्याख्यया सनाथः प्राथम्येन प्रकाशयितुमयमुपात्तः ॥

दैवमिति कर्तृसम्बन्धनिबन्धनेयं समाख्या देवेन तन्नाम्ना विदुषा कृतं प्रकरणमित्यर्थात् । अस्य ग्रन्थस्याकरो मैत्रेयरक्षित-क्षीरस्वामि-धनपाल-शाकटायनादिप्रणीता धातुवृत्त्यादिग्रन्थाः । तत्राप्यनेन मैत्रेयरक्षितमतमेव प्रायशोऽनुगम्यते । पाणिनीयधातुपाठे सकृत् पठितानां धातूनां ये पुनःपाठा एकस्मिन् विकरणे विकरणान्तरे वा दृश्यन्ते, तेषां फलं — तच्चार्थात् सारूप्येण पठितानां धातूनां फलम् अस्य ग्रन्थस्य विषयः । फलञ्च धातु-तदर्थ-विकरणानि व्यस्तानि समस्तानि यथासम्भवं मिलितानि चोपादाय लटा लिङा लङा वा रूपभेदनिर्देशमात्रात् प्रायः सूच्यते । क्वचित्क्वचित्तु फलविशेषो वचनेन प्रकाश्यते यथा —

"स्वरभेदाद्विरुच्यते" (९३पृ. ९५श्लो.)

"इटा भिदा" (८६पृ. ११६ श्लो.)

इत्यादौ । न केवलं 'भू सत्तायां' 'भू प्राप्तौ' इत्यभिन्नाकारतया पठिता एव सरूपाः, किन्तु अंशतो भेदेऽपि ये सदृशाः अकि-अङ्कि, निद-नेदप्रभृतयः, तेऽपि सरूपा इह गृहीताः । सरूपाश्च धातवो यद्यप्यत्र सर्वे न विवृताः, तथापि भूयसां विवरणाच्छिष्यमाणाः सुग्रहा इति ग्रन्थकर्तुराभिसन्धिः । आह च —

'सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥' (२००. श्लो.)

इति । धातवश्च यथासम्भवं मातृकाक्रममन्त्यवर्णविषयमाश्रित्य दर्शिताः । किन्तु भूधातुः परं धातुपाठे प्रथमः सत्ताख्यब्रह्मवाचितया माङ्गलिकश्चेति कृत्वा प्रथमं व्युत्पादितः । व्युत्पित्सूनां च विषयधारणसौकर्याय ग्रन्थेऽस्मिन् पद्यबन्ध आदृतः;

१. देवशब्दात् 'कृते ग्रन्थे' (४-३-११६) इत्यण्प्रत्यये दैवामेति रूपम्. २. एतास्तु धातुवृत्तयो न लब्धाः. ३. ८. पृष्ठे द्रष्टव्यम् .

श्लोकाश्च व्याख्यानुसारान्मङ्गलश्लोकेन सहिताः २०० भवन्ति । वैयाकरणसमयसिद्धशब्दातिरेकेणापूर्वः शब्दो न कश्चिदिह व्यवहाराय परिभाषितः । यत् पुनः

'चुरादिश्चुर्युजादिर्युः स यस्माण्णिज्विभाषितः ।' (१९९ श्लो.)

इति ग्रन्थान्ते दृश्यते, तदपि नपुंसकस्य नप्शब्दव्यवहारवच्छब्दैकदेशलक्षणयैव सिद्धत्वान्न परिभाषणसाध्यम् । अत एवानावश्यकत्वद्योतनाय ग्रन्थादौ तन्न निवेशितमिति **पुरुषकारः** ॥

पुरुषकारः कृष्णलीलाशुकेन प्रणीतः । **पुरुषकार** इति च **दैवसंज्ञा**नुगुण्यात् कृतं नामधेयं, यथा भाग्यापरपर्यायं दैवं पुरुषकारेण विना न प्रसन्नं भवति, तथैव विनानेन व्याख्यानेन मूलमिति ध्वनयितुम् । **पुरुषकारो** हि आकाङ्क्षितार्थजातपूरणेन धातुधात्वाकारधात्वर्थादिषु विप्रवादविषयेषु निर्णायकप्रमाणयुक्त्युपन्यसनेन च मूलार्थं बुद्धौ प्रतिष्ठापयति । **दैवस्य** चैनं सारवत्तया सूत्रदेश्यस्य वार्त्तिकं ग्रन्थकारो व्यपादिष्टवान् —

'उक्तानुक्तदुरुक्तानि स्थानेस्थाने विविञ्चता ।
कृष्णलीलाशुकेनेदं कीर्त्तितं दैववार्त्तिकम् ॥' (१२७पृ.)

इति । प्रसन्नपरिमिताक्षरैर्वाक्यैर्गम्भीरार्थाविष्कारे यो भङ्गिविशेषः, तेन **पुरुषकारः कैयटकृ**तेरदूरविप्रकृष्ट इति न शक्यं न वदितुम् । किञ्चायं दैवाद्यपद्यविवरणेन कर्तुर्वेदान्तविद्यानैपुण्यं भणता ब्रह्मसूत्रभाष्यभामतीछायामनुविधत्ते ॥

इमं प्रामाणिकमूर्धन्यः **सायणाचार्यो माधवीयधातुवृत्तौ** बहुषु प्रघट्टकेषु प्रमाणयति **दैवं** च क्वचित्क्वचित् । यथा —

"'कुर्द खुर्द गुर्द गुद क्रीडायामेव' अत्र **कैयटपुरुषकारमैत्रेयादि**षु तृतीयो न पठ्यते"

"'लाज लजि भर्त्सने च' भर्त्सनग्रहणं भर्जनस्याप्युपलक्षणमिति **पुरुषकारः**"

"'इट किट कटी गतौ' ....अयं पक्षः समर्थितः **पुरुषकारे**....
—'अन्ये पुनरुभावपि न पठन्ति । व्यक्तञ्चैतद् **धनपालशाकटायनवृत्त्योः** । अपि च शौटृ गर्व इत्यादिकान् **कांश्चि**-

---

१- व्याख्यायां मङ्गलश्लोकस्यापाठपक्षोऽप्युक्तः ८. पृष्ठे. २. ३७. पृष्ठे दृश्यम् । ३. २३. पृष्ठे दृश्यम् . ४. ६५. पृष्ठे दृश्यम् . ५. उक्तचिन्तनं २९. पृष्ठे दृश्यम्; प्रायः सर्वत्र च. ६. अनुक्तचिन्तनं २३. पृष्ठे दृश्यम्, अन्यत्र च. ७. दुरुक्तचिन्तनं १२, १३, २८. पृष्ठेषु दृश्यम्, अन्यत्र च क्वचित्.

धातून् पठित्वा .... उदयतीत्यादिचैवमसाध्वेवास्तु' इति"

एवं बहुत्र ।

"'श्रम्भु प्रमादे' .... दैवेप्येवमेवोक्तम्"

इति । क्वचित्क्वचित्तु पुरुषकारनामाग्रहणेन पुरुषकारवाक्यं सायणेनोपन्यस्तमुपलभ्यते । यथा—

"'नट नृत्तौ' .... 'यत्कारिषु नटव्यपदेशः । न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्तं नृत्यं च, यत्कारिषु नर्त्तकव्यपदेशः । तत्र वाक्यार्थाभिनयो नाट्यं; पदार्थाभिनयस्तु नृत्यम्; अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या स्वगात्रविक्षेपो नृत्तमिति तद्विदः । नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्त्तनम्' इत्यभेदव्यवहारो निरूढलक्षणया नेयः' "

अट्टधातौ पक्षविशेषाश्रयेण पुरुषकारेऽभ्युपगतम् अतिट्टिषत इति रूपं प्रति

"एवं च पुरुषकारादिषु अतिट्टिषत इति तकारस्य शेषेणोदाहरणप्रदर्शनं चिन्त्यम्"

इत्ययं सायणस्य विसंवादोऽन्यश्चैवञ्जातीयकोऽत्यल्प उपलभ्यते । किन्त्वसौ ग्रन्थमात्रसाधारणः सुवचप्रतीकारश्चेति सर्वथानवद्यं माननीयं प्रमाणं वैयाकरणानां पुरुषकारः ॥

प्रत्ययान्तधातुवृत्तौ सायणीयायां बहून् बहुं वाचष्टे भावयतीति प्रक्रमे

"यदुक्तं पुरुषकारे बहयतीत्युदाहृत्य--'इष्ठनि यत् फिषः कार्यं, तण्णावप्यातिदिश्यते । न चेष्ठनि यिट् फिषो भूभावश्च, भुवो यिट्सान्नियोगाशिष्टत्वात् । तेन न्यासे तु भावयतीति चिन्त्या प्राप्तिः' इति"

इति दर्शनादन्योऽपि पुरुषकारः सुब्धातुविवरणपरोऽस्तीति गम्यते । मुद्रिते हि पुरुषकारे नास्ति सायणोदाहृतं वाक्यं, न च लुप्तत्वेन वक्ष्यमाणे पत्रे संभावयितुं शक्यम् अप्रकृतार्थत्वात्, लुप्तपत्रव्याख्यानविषयभूते श्लोके नामधातोरप्रस्तावात्, मूलोक्तवस्तुविजातीयवस्तुनः पुरुषकारे क्वचिदपि प्रसक्तानुप्रसक्त्यानुल्लेखात् ।

१. घटादिशाधातौ दिवादिक्षमधातौ आधृषीयशिषधातौ च देवः स्मृतः प्रौढमनोरमायां, भ्वादिशेषधातौ च पुरुषकारः. प्रक्रियासर्वस्वे च नारायणीये स्मृतोऽयं. २. ६३. पृष्ठे द्रष्टव्यम्.

किन्त्वसौ नोपलभ्यते । अत्रत्यराजकीयपुस्तकशालास्थयोः **अभिनवकौस्तुभमालादक्षिणामूर्त्तिस्तवाभिधानयोर्ग्रन्थयोरन्ते**

"श्रीकृष्णकेलिशुकवाङ्मयवीचिमालालीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥"
"त्रिभुवनसुभगेयं दाक्षिणामूर्त्तिमूर्त्तौ भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतुजयतु देवी भारती जीवलोकश्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥"

इति ग्रन्थकर्तृनामोपलभ्यते । एतद्ग्रन्थगाम्भीर्यस्य कृष्णभक्तेश्च पर्यालोचनयायं **कृष्णलीलाशुकः पुरुषकार**कर्त्तुरभिन्न इति शक्यमूहितुं, यस्मात् **पुरुषकारक**र्ताप्याद्यन्तश्लोकाभ्यां कृष्णभक्त इति स्पष्टं गम्यतेः दाक्षिणामूर्त्तिभक्तिश्चास्य मुनिप्रथाया आनुगुण्यं धत्ते । रमणीयभणितिनैपुण्यसहचरं कृष्णभक्तत्वमेवोपाधिमाश्रित्य कदाचिदनेन कृष्णलीलाशुक इति नामधेयमागन्तुकमधिगतं स्यात् । **देवस्य तु** नान्या कृतिरवगम्यते ॥

देव-कृष्णलीलाशुकयोः समयस्य पुनर्न निर्णयः । अथापि **सायाणाचार्यात्** तौ प्राचीनाविति सामान्यतोऽवधारितमेव । **सायणाचार्यश्च** कैस्ताब्दीयस्य चतुर्दशशतकस्य मध्ये स्थितः । **पुरुषकारे क्षीरस्वामिना** सह **दैवं** संवादयितुमसकृत् संरम्भस्य दर्शनाद् **देवः क्षीरस्वाम्यपेक्षयार्वाचीन इत्यप्यवगतम् । क्षीरस्वामी**चायं

"देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः ।
प्रावर्त्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् सम्भृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥"

इति **राजतरङ्गिण्यां** प्रतिपादितो महाभाष्योज्जीवयितुः ७९१ तमकैस्ताब्दस्थितस्य **जयापीड**भूपतेर्व्याकरणोपाध्यायो यः **क्षीरः**, स एव सम्भाव्यते । **कृष्णलीलाशुकश्च** हेमचन्द्रं द्वादशशतकमध्यवर्तिनं स्मरंस्त्रयोदशशतक आसीदिति प्रतीयते । ततश्च **देवः** कैस्ताब्दीयस्य नवमशतकस्य द्वादशशतकस्य चान्तराले स्थित इति शक्यं कल्पयितुम् * । पुरुषकारस्यान्ते

---

१. केलिशब्दो लीलापर्यायो वृत्तानुगुण्याय प्रयुक्तः. २. समाप्तिवाक्यं त्रिष्वपि ग्रन्थेषु 'इति कृष्णलीलाशुकमुनि ... ...' इति दृश्यते. ३. ४३. पृष्ठे चकधातुर्दृश्यताम्. ४. 'निर्णयसागर'मुद्रिताया अस्याः प्रथमपुस्तकस्य चतुर्थतरङ्गे ४८८, ४८९. श्लोकाविमौ.
* १२. पृष्ठे 'बली पुरुषकारो हि दैवमप्यतिवर्तते' इत्यर्धं पुरुषकारस्थम् **अष्टाङ्गहृदये** शारीरस्थाने १. अध्याये ३८. श्लोकेऽप्यस्ति .

"कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥"

इति पद्यस्यानन्तरमेकं मङ्गलाशंसापद्यं लिखितमस्ति —

"काञ्चीति काञ्चन पुरीं प्रथिताद्भुतश्रीः
काभिश्चिदुत्सवविभूतिपरम्पराभिः ।
चेतःस्थितिं च जगतामधिवासयन् वो
++++++++ विजयाय भूयात् ॥"

इति । इदं कृष्णलीलाशुकेनैव विरचितमित्यभिमाने काञ्चीपुरमस्य वासस्थानमित्यपि काञ्चीस्मरणादुत्प्रेक्ष्यताम् ॥

राजकीयग्रन्थशालावर्त्तिनो दैवपुरुषकारयोरादर्शग्रन्था एते —

क[1]. दैवं (तालपत्रात्मकं केरलीयलिपि)
ख[2]. दैवं ,,
ग[3]. पुरुषकारः (दैवसहितः) ,,
घ[4]. पुरुषकारः (१२० श्लोकानां) ,,

एषु ग पुस्तके ९४तमं पत्रं लुप्तम् । किन्तु तावता ३६० अक्षराणामेव लोपस्य सम्भावनात्, पुरुषकारप्रतिरूपान्तरस्यासमग्रस्यापि बहुशोऽन्विष्टस्यानुपलम्भाच्च समग्रकल्पे तस्मिन् समग्रसाधारणी तृप्तिरधिगन्तव्यासीत् । तदिदमादर्शचतुष्टयमाधारं कृत्वा माधवीयधातुवृत्त्यादिग्रन्थसाहचर्येणैतत्संशोधनमसाधयं; पुस्तकेऽस्मिन् पुरुषकारस्य क्वचित्क्वचिदाशयमभिव्यङ्क्तुं लघ्वीं कामपि टिप्पणीं च प्रतिपत्रमधस्तात् समयोजयम् ॥

अनन्तशयनम्,
३०-११-१०८०.

त. गणपतिशास्त्री.

---

१. अयं ग्रन्थः शुद्धो द्विशतवर्षदेश्यश्च । १९. पत्राणि । प्रतिपत्रं १५ पङ्क्तयः । प्रतिपङ्क्ति ३१ अक्षराणि. २. अयं ङ शुद्धाशुद्धः । १४. पत्राणि । प्रतिपत्रं १८ पङ्क्तयः । प्रतिपङ्क्ति २४ अक्षराणि. ३. अयं शुद्धप्रायः द्विशतवर्षदेशीयश्च । १०२. पत्राणि प्रतिपत्रं १६ पङ्क्तयः । प्रतिपङ्क्ति २३ अक्षराणि. ४. अयं शुद्ध उपशतवर्षदेशीयश्च । ३१ पत्राणि । प्रतिपत्रं २४ पङ्क्तयः । प्रतिपङ्क्ति ३४ अक्षराणि .

पुरुषकारे स्मृता ग्रन्थकर्तारः.

अमरसिंहः. १०२. पृष्ठे.

आर्याः. ४६, ७२, ७५, ९१, ११२.

कविकामधेनुकारः. ४५.

कैयटः. ११, ६८, ९४, १०९, १२५.

कौमाराः. १८, ३०, ७२, ८०, ९४, १००, १०२, १०६.

कौशिकः. १३, ७०, ७३.

क्षीरस्वामी. १२, १६, १८, १९, २०, २१, २२, २३, २४, २५, २६, २७, ३०, ३१, ३२, ३३, ३४, ३६, ३७, ३८, ३९, ४०, ४१, ४२, ४३, ४४. ४५, ४६, ४७, ४८, ४९, ५१, ५२, ५६, ५७, ५८, ६१, ६२, ६३, ६४, ६५, ६६, ६७, ६८, ६९, ७०, ७१, ७२, ७३, ७५, ७६, ७७, ७२. ८०, ८१, ८२, ८३, ८५, ८६, ८७, ८८, ९०, ९१, ९२, ९५, ९७, ९८, ९९, १००, १०१, १०४, १०८, ११०, १११, ११२, ११३, ११४, ११५. ११६, ११७, ११९, १२०, १२१, १२२.

गुप्तः. ७२, ९८.

गोविन्दस्वामी. (बह्वृचब्राह्मणभाष्यकारः) १२३.

चन्द्रः. २२, ३०, ३९, ४६, ४९, ५०, ५६, ५७, ६६, ७१, ७७, ८१, ८४, ८५, ८७. ११०, १११.

चन्द्रगोमी. ९, १८, २१.

चान्द्राः. ९०, ९४, १००, १०१,. १२३.

जयादित्यः. ९२, ९४, १०१.

जिनेन्द्रः. (अयं पञ्चिकाकृत्) १६, ६५, ८०, १०१.

दण्डी. ८, १०६.

दुर्गः. २०, २४, ३७, ४१, ४७, ५०, ५६, ६५, ६९, ७०, ७२, ७३, ७७, ८३, ९८, १०७, १०८, ११०, १११ १२२.

दौर्गाः. ५६, ६८, ७७. ११६, १२०, १२२.

द्रमिडाः. ३६, ५१ ,७५, ९१, ११२.

धनपालः. १२, २६, ३०, ३२, ४०, ४१, ४३, ४४, ४५, ४६, ५०, ५१, ५६, ५८, ६२, ६३, ६८, ६९, ७०, ७१, ७२, ७५, ८४, ८५, ८६, ९१, ९२, ९८, ९९, १००, १०१, १०२, १०८, ११०, ११२, ११५, ११९, १२२, १२३.

धातुवृत्तिकाराः. ९, ३०, ५२.

नन्दी. ३६, ४१, ४२, ७१, ८२. ८८. ११२.

नान्दिस्वामी. ५१.

नैघण्टुकाः. ६६, ९१.

नैरुक्ताः. ३१, ९३.

न्यासकारः (कृत्) १९, ३३. ३८. ५५. ६३. ८३, ९५. १०१.

पतञ्जलिः, भाष्यकारः. ३. ३४, १२७.

पारायणिकाः. ९२, ९३.

पूर्णचन्द्रः. २४, २५, ४०.

भट्टिः. ९३, १०२, ११३.

भर्तृहरिः. १०, १०६.

भागवृत्तिकारः. ९४, ११०.

भाष्यटीकाकृतः. १०६.

भीमसेनः. ३०, ९५.

भोजदेवः, श्रीभोजः, परमेश्वरभोजः. ९, ३४, ८०, ९१, ९४, १००, १०६, १२७.

भोजीयाः. ९१, १००, १०२.

माघः. ६४, ११३.

मीमांसकाः. ९१.

मैत्रेयरक्षितः. ११, १३, १५, १६, १९, २०, २१, २२, २३, २४, २६, २७, २८, ३२, ३४, ३६, ३९, ४०, ४१, ४२, ४३, ४५, ४६, ४८, ४९, ५१, ५७, ५८, ६०, ६१ ६२, ६३, ६५, ६६, ६७, ६८, ६९, ७४, ७५, ७७ ७९, ८३, ८६, ८७, ९०, ९१, ९२, ९६, ९७, ९८ १००, १०३, १०४, १०६, १०९, ११३, ११४ ११५, ११६, ११७, ११९, १२०, १२१, १२३.

यादवप्रकाशः. १०, २७, २८, ४५, ५३.

वामनः (काव्यालङ्कारकर्ता) ११६.

वामनः (काशिकाकृत्) ५८, ११९.

वृत्तिकृत् (कारः) ८, ७५.

व्यासः २३, ९३.

शाकटायनः. (अयं पाणिनिस्मृताच्छाकटायनाद् भिन्नो जैनश्च) १२, १३, १५, १६, १७, १८, १९, २१, २६, २७, ३१, ३२, ३६, ४१, ४३, ४४, ४५, ४७, ४९, ५०, ५१, ५६, ५८, ६०, ६१, ६२, ६३, ६४, ६५, ६७, ६८, ६९, ७१, ७३, ७४, ७८, ७९, ८०, ८३, ८४, ८५, ८६, ८७, ९२, ९३, ९४, ९८, १०१, १०२, १०५, १०७, १०८, ११०, ११२, ११५, ११६, ११८, ११९, १२२, १२३.

शास्त्रतात्पर्यविदः. ६.

श्रीधरः (श्रीकारः श्रीकर इति च माधवधातुवृत्तौ दृश्यते । प्रौढमनोरमायां श्रीधर इति) १६, ६६.

सङ्ख्याः. ९९.

सुधाकरः. (अय वाचकवार्तिककृत्) १२, ३२, ३५, ३६, ५१, ५५, ६१, ६४, ६८, ९२, ९४, १०६, ११२, १२०, १२७.

सुन्दरपाण्ड्यः. ११४.
हरदत्तः. १८, ३०, ३२, ४८, ४९. ८२, ११५.
हरियोगी. २१,२४, ४०, ६४.
हेमचन्द्रः. २२, २४, ३७.

पुरुषकारे स्मृता ग्रन्थाः.

अमोघा. (शाकटायनकृता सूत्रवृत्तिः) ३६, १०७. पृष्ठयोः.

उणादिवृत्तिः. ३१, ३८.

कण्ठः ७०.

कविकामधेनुः. ३३. १०३.

काव्यालङ्कारः. ११६.

धातुवृत्तिः. (इयं माधवेनापि स्मर्यते) ९५.

निरुक्तम्. (यास्कीयम्) २३, ४८.

न्यासः. १८. २०. २१. ३१. ३२. ३७. ४९. ८७. ९८, ११४.

पञ्चिका. (जिनेन्द्रकृता) ४१.

पारमर्षं सूत्रम् (जैमिनिसूत्रम्) १७.

प्रक्रियारत्नम्. ११०.

भागवृत्तिः. १६. ८९.

महाभाष्यम्. ३. ४. १०, १४. १६. २८. २९. ३०. ३१, ३३, ३४, ३५, ३७, ३८, ३९. ४७. ४९. ५५. ६६, ६८, ८९, ९६. १००. १०९. ११०. ११३. १२७.

वार्त्तिकम्. ३. ३०, ३४. ७६. ८१. ९४, ९६. १०७, ११३, १२७.

वृत्तरत्नाकरः. ९.

वृत्तिः (काशिका) २८. २९. ७५. ७८. ९९. ११५.

शाकटायनन्यासः. ६६.

शृङ्गारप्रकाशः. (अयं भोजकृतः। एकावल्यां विद्याधर एनां स्मरति) १०६.

श्लोकधातुपाठः. ४४, ४७, ५०, ७३. ७६, ८३.

समन्वयसूत्रम्. (तत्तु समन्वयात्) ६.

॥ श्रीः ॥

पुरुषकारे स्मृतानि व्याकरणेतरग्रन्थवाक्यानि .

पृष्ठम् .

३. 'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥' (मनुस्मृतिः ४ अ.)

५. 'यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति' । 'कस्माद्यभेष्यद् द्वितीयाद्वै भयं भवति' (बृहदारण्यकं १ अ. ४ ब्रा. २ म.)

६. 'पूर्णमेवावशिष्यते' (ईशोपनिषत् १ मन्त्रम्)

„ 'अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य' (ब्रह्मसूत्रशाङ्करभाष्यं समन्वयाधिकरणम्)

७. 'फल्यभावे फलं कुतः'

८. 'श्रव्यवृत्तैः सुसन्धिभिः' (काव्यादर्शः १ परि. १८ श्लो.)

१०. 'वाग्वाणी भारती भाषा' (वैजयन्ती)

„ 'भावयेज्ज्योतिरान्तरम्'

१२. 'मनोरमा भा भवते'

„ 'स राष्ट्रमभवत्' (यजुर्वेदब्राह्मणम् १ अष्ट. ७ प्रश्न. ७ अनु.)

१४. 'यच्छति प्रियतमे रभसेन' (किरातार्जुनीये 'यच्छति प्रतिमुखं दयितायाः' इति, 'चुम्बति प्रियतमे रभसेन' इति च दृश्यते)

„ 'शर्म यच्छत द्विपदे चतुष्पदे' (७ अष्ट. ८ अ. १३ व. ६ ऋ.)

१७. 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' (जै.सू. १अ. ३पा. ३सू.)

२३. 'पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्त्या जघनं घनं ।
याः स्त्रियो दृष्टवत्यस्ताः पुंभावं मनसा ययुः ॥' (भारतम्)

„ 'उष्णीषं स्नायतेः' (यास्कनिरुक्तम्. उत्तरषट्कं ७ अ. ३ पा. ७ ख.)

२४. 'पञ्चबाणः क्षिणोति'

२५. 'जिगादुपजयति गोरपीच्यम्' (७अष्ट. २अ. २५व. ५ऋ.)

२६. 'उदयति दिननाथे याति शीतांशुरस्तम्'

२७. 'संस्फेटस्तुमुलं युद्धम्' (अमरकोशः)

पृष्ठम.

२७. 'वृकस्य रेषणं रेषा हेषा ह्रेषा च वाजिनाम् । बृंहितं करिणां शब्दः' (वैजयन्ती)

३०. 'ओमिति ब्रह्मा प्रसौति' (तैत्तिरीयोपनिषत् ८ अनु.)

३३. 'प्रसूनं कुसुमं सुमम्' (अमरकोशः)

३५. 'न स्नात्वा वासो धुनुयात्'

,, 'ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु' (मालतीमाधवं ५ अङ्कः)

,, 'अयं स्रुवोऽभिजिहर्ति होमान्' (आप. श्रौतम्. या–प्रश्नः. ७ख.)

३७. 'प्र बाहवा पृथुपाणिः सिसर्त्ति' (२अष्ट. ८अ. २व. २ऋ.)

४०. 'वरिष्ठं वज्रमाजिघर्ति मायिनि' (४अष्ट. ३अ. २व. ३ऋ.)

४१. 'तं रोदसी पिपृतं सत्यवाचम्' (३अष्ट. १अ. २७व. ४ऋ.)

४५. 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः' (अमरकोशः)

,, 'बुक्कनं श्ववृकध्वाने' (वैजयन्ती)

४८. 'सिषक्तु सचत इति सेवमानस्य' (यास्कनिरुक्तम् पूर्वषट्के ३अ. ४पा. ४ख.)

५३. 'उञ्छो धान्यश आदानं कणिशाद्यार्जनं शिलम्' (वैजयन्ती)

५४. 'ततो रजन्यां व्युष्टायाम्' (रामायणम् उत्तर. ४६सर्गः)

,, 'व्युच्छन्ती दुहिता दिवः' (तैत्तिरीयब्राह्मणम् ३अष्ट. १प्र. ३अनु.)

,, 'उषा उच्छदपस्निधः' (१अष्ट. ४अ. ४व. ३ऋ.)

५९. 'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयात्' ('याजयेदध्यापयेद्वा' इति अस्य शेषः)

६४. 'लोलद्भुजाकारबृहत्तरङ्गम्' (माघः ३सर्गः.)

---

७२. 'जिह्वाशतान्युल्लडयत्यभीक्ष्णम्'

७४. 'विश्राणनं वितरणम्' (अमरकोशः)

७७. 'यदप्रथयत् तत् पृथिव्यै पृथिवित्वम्' (तैत्ति. ब्रा. १अष्ट १प्र. ३अनु.)

९१. 'मीमांसा स्याद्विचारणा'

९३. 'द्वाविमावम्भसि क्षिप्य गळे बद्ध्वा महाशिलाम् । धनिनं चाप्रदातारं दरिद्रं चाप्रवासिनम्' (महाभार. उद्यो. पर्व. ३२अ.)

,, 'संक्षिप्य संरम्भमसद्विपक्षम्' (भट्टिकाव्यं २सर्गः)

पृष्ठम.

९३. 'इरज्यति पत्यते क्षयति राजति' (यास्कनिरुक्तं निघण्टुः २अध्या. २१ख.)

,, 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' (भट्टिकाव्यम् ४ सर्गः.)

९५. 'पीयूषस्येह तृम्रुतम्' (तैत्ति. ब्रा. २अष्ट. ४प्र. ८अनु. पीयूषस्येह तृम्रुहि' इति.)

९८. 'सावष्टम्भनिषुम्भसम्भ्रमनमद्भूगोळ' (मालतीमाधवं ९ अङ्कः)

१०२. 'सामोन्मुखेनोच्छुरिता प्रियेण' (भट्टिकाव्यं ११ सर्ग.)

,, 'स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम्' (अमरकोशः)

१०६. 'शबर्या पूजितः सम्यक्' (रामायणं बाल. १ सर्गः.)

,, 'दलन्ति ककुभानि च' (काव्यादर्शः २ परि. ११७श्लो.)

,, 'मिलन्त्याशासु जीमूताः' (शृङ्गारप्रकाशः)

१०८. 'प्रतिस्पशो विसृज तूर्णितमः' (३अष्ट ४अ. २३व. ३ऋ.)

,, 'यतो व्रतानि पस्पशे' (१अष्ट .२अ. ७व. ४ऋ.)

,, 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' (माघकाव्यं २सर्गः.)

१०९. 'पुर इष्णासि पुरुहूत पूर्वीः' (१अष्ट. ५अ ४व. २ऋ.)

१११. 'सोमेन यक्ष्यमाणो नर्तुं सूक्ष्येन्न नक्षत्रम्' (आप. श्रौतसूत्रम् ५प्र. ३ख.)

,, 'म्लेच्छो हवा एष यदपशब्दः' (महाभाष्ये पस्पशायां स्मृतम्)

११३. 'मा न श्लिक्षः प्रियं प्रिये' (भट्टिकाव्यं ६सर्गः.)

,, 'श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीम्' (माघः. ४सर्गः.)

११४. 'निक्षति चुम्बति निंस्ते तन्व्या मुखपङ्कजं प्रेयान्' (सुन्दरपाण्ड्यकृत आर्यावलीति कश्चित् ग्रन्थोऽसमग्रो राजकीयपुस्तशालायामास्ति. अनुपलब्धतद्ग्रन्थभागगतमिदमर्धं स्यात्)

११६. 'लावण्य उत्पाद्य इवास यत्नः' (कुमारसम्भवं १सर्गः.)

१२३. 'प्रवल्हिका प्रहेळिका' (अमरकोशः.)

,, 'प्रवल्हिकाः शंसति । प्रवल्हिकाभिर्वै देवा असुरान् प्रवल्ह्याथैनानत्यायन्' (बह्वृचब्राह्मणम् ६पञ्चि. ५अ.)

१२७. 'दैवो विस्तरशः प्रोक्तः.' (भगवद्गीता. १६अ. १श्लो.)

शुद्धिपत्रम्.

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५	११	वेषा	वैषा
६	२	मवेकै	मेवैक
,,	७	वृत्या	वृत्त्या
१०	,,	वथि	वस्थि
,,	१७	गुर्दगुद	गुद
,,	२२	,,	,,
११	१२	यवन	यमन
१४	१९	स्वाा	स्वा
१७	५	तुरि	तुः (१-१-२१)इ
१८	२	स्कत	स्कर्त
२१	५	इत्य	इत्ये
२२	१२	औ	ओ
२३	६	ण्डु	ण्टु
२६	२१	हिक्का	हिक्का
२७	२२	सस्फे	संस्फे
३२	१५	रौति	रौति
३४	१२	धवति	धुवति
३६	७	गीत्	गीत् (१-१-५)
४०	५	यनि	यिनि
५३	९	त्यवै	त्यैव
५४	१	नुाद	नुदा
,,	२२	भिच	भिचा
५८	३	विवि	विवे
६४	९	ङ्गः	ङ्गम्
७३	११	स्मी	मी
७६	९	घण्डुः	घण्टुः
,,	१९	५	१
७७	१०	तिभा	तीभा
,,	१५	प्रथ	पृथ
७९	१९	इणे	हणे
८१	१	त्राप्यु	प्यु
९०	१८	लाना	लनमा
१०१	८	न्त'	न्त.
१०९	१२	ति	सि
,,	१३	तः	त
११८	१२	सां चका	सांन
११९	१	तोः	तौ

॥ श्रीः ॥

श्रीगणेशाय नमः ।

देवप्रणीतं दैवं

कृष्णलीलाशुकमुनिकृतपुरुषकाराख्यव्याख्योपेतम् ।

सच्चित्सुखैकरसवस्तुनि यत्र विश्वं
मिथ्यैव रूप्यमिव राजति शुक्तिभित्ते ।
तस्मिन् प्रतीचि परमात्मनि चित्तवृत्ति-
र्ब्रह्माहमस्मि परमित्यनिशं ममास्तु ॥ १ ॥

गाश्च विबुधांश्च भूमौ पालयितुं किमपि कृतपदन्यासम् ।
आपादचूडमिदमिदमभ्यस्यत दैवमद्भुतं भोभोः ॥

१. अथ महावैयाकरणः श्रीकृष्णलीलाशुकमुनिर्दैवग्रन्थस्य व्याख्यां पुरुषकाराख्यामारिप्सुर्मङ्गलसिद्धये स्वेष्टदेवतां श्रीकृष्णं, प्रेक्षावत्प्रवृत्त्यङ्गप्ररोचनीय-ग्रन्थविषयप्रयोजनाभिधानाय दैवग्रन्थं च विशिष्टरूपमनुसन्धत्ते **गा इति** । **भोभोः** शिष्या इति शेषः । सम्बोध्यावधानाय द्विरुक्तिः । **गाश्च** नन्दगोपसम्बन्धिनी-र्धेनूश्च **विबुधांश्च** कंसादिव्यतिक्रमक्षीणक्षेमान् देवांश्च **पालयितुं** रक्षितुम् **भूमौ** भूलोके **कृतपदन्यासम्** अवतीर्णम् **किमपि** गुणैरीदृक् तादृग् इति परि-च्छेत्तुमशक्यम् **आपादचूडमद्भुतं** पादादिचूडान्तेष्वङ्गेष्वेकशो निर्वर्ण्यमानं रूपधेयादनुभावाच्चाश्चर्यजनकम् **इदमिदं** मच्चित्तसन्निहितं, यदेव चित्ते सन्निधा-पयितुं मननापरपर्यायाभ्यासपरिश्रमः श्रेयस्कामैः करणीयः, मया च कृतः, तदिद-मेवेत्यर्थः । द्विरुक्तिरादरार्था । **दैवं** (प्रज्ञाद्यणा) देवं, विशिष्टदेवत्वस्य देवतान्तरा-गोचरत्वाच्छ्रीकृष्णमिति यावत् । **अभ्यस्यत** मद्वन्मननपरिपाट्या साक्षात्कुरुतेति स्वयं सविकल्पकसमाध्यासादितभगवत्साक्षात्कृतिकृतार्थस्य ग्रन्थकर्तुरेष कृपया ग्रन्थपठितॄन् प्रत्युपदेशः ।

अपिच—

[1]दैवं पुरुषकारेण न विना पुष्टिमश्नुते ।
अतः प्रेक्षावतां सार्थास्तमेतमनुधावत ॥

तत्र तावद्यथावच्छब्दार्थप्रतिपत्त्या निष्प्रत्यूहं [2]परिसमाप्य यथासम्भवं प्रचयगमनादिना परोपकारप्रभृति प्रयोजनमात्मनो-

---

अथ च **गाश्च** वाचश्च उपात्तधात्वधीनसिद्धीन् शब्दविशेषानिति यावत् । **विबुधांश्च** वैयाकरणांश्च **पालयितुं** संशयभ्रान्तिविषयताया मोचयितुमिति गोपक्षे, गोगोचरसंशयभ्रान्त्योरनाश्रययितुमिति तु विबुधपक्षे अन्यथापभ्रंशसम्प्रमोहेन गवां वैयाकरणतायाश्च त्राणानिर्वाहात् । **कृतपदन्यासं** कृत आनुकूल्येन सम्पादितः पदन्यासः शब्दसन्दर्भो यस्य तत् । अथवा पदशब्दो व्याकरणपरः । शब्दशाब्दिकरक्षायै कृतो निवेशितः पदन्यासो व्याकरणानुबन्धिमहार्घार्थनिक्षेपो यस्मिंस्तत् । **किमपि** एकमेव न त्वेतदभिन्नफलकमन्यत्प्रकरणमस्तीत्यर्थः । **अद्भुतं** अशेषधात्वाकरग्रन्थनिर्लोडनविषयासाधारणनैपुण्यप्रकाशकत्वाद् विस्मयावहम् **इदमिदं** व्याख्येयत्वेन व्याख्यातत्वेन वा बुद्धौ सन्निधापितम् । द्विरुक्तिरादरार्था । **दैवं** देवेन विरचितं प्रकरणम् **आपादचूडमभ्यस्यत** आमूलाग्रं परिशीलयतेति यथोक्तफलकामान् प्रति प्रैषे लोट् । अथवामूलाग्रमभ्यसितुमयमवसरो वः प्राप्त इति प्राप्तकाले लोट् । अयं भावः—आसमाप्तिसन्ततेष्वर्थग्रन्थिषु केषाञ्चिद्यथाकथञ्चिद् ज्ञानेऽपि बहूनामवगतावुचिताभ्युपायविरहेण प्राग् दैवे युष्माकमुपेक्षा तदेकदेशापेक्षा वा जाता कामं युक्ता । सम्प्रति पुनरस्माभिर्दैवस्य वक्ष्यमाणगुणसर्वाङ्गीणव्याख्यानसाचिव्यसम्पादनात् तद्द्वारेण सर्वार्थानां सुग्रहत्वाद् दैवं वो न केवलमनुपेक्षणीयं, यावदेकदेशमप्यनपहाय परिशीलनीयं साधुशब्दविशेषनिर्धारणाय वैयाकरणतात्राणाय चेति । एषा चाभ्यासस्यावसरप्राप्तिः सौकर्यमपूर्वसिद्धमाक्षिपन्ती सौकर्यकारणं व्याख्यानसनाथत्वं दैवस्याक्षिपति । तेन 'दैवं व्याख्यायत' इति चिकीर्षितप्रतिज्ञासिद्धौ व्याख्यानस्यापि प्रयोजनादिकमर्थादुक्तं वेदितव्यम् । तन्त्रेण चैवं भिन्नप्रयोजनौ प्रकृतार्थावक्लेशेनैकस्मिन् ह्रस्वे वाक्ये निवेशयतो यदेतद्ग्रन्थकारस्य मितसारबह्वर्थवाग्गुम्फनपाटवं, तद् आग्रन्थान्तात् स्पष्टं द्रष्टव्यम् ।

१. यथोक्तफलायावश्यमुपादेये दैवे तत्परिपोषहेतुत्वादवश्यन्तरां स्वव्याख्यानमुपादेयमित्याह—**दैवमिति** । **दैवं** व्याख्येयग्रन्थविशेषो नियतिश्च । **पुरुषकारेण** तन्नाम्ना व्याख्यानेन पुरुषयत्नेन च । २. निबन्धनं परिसमाप्तिकर्म गम्यम् ।

ऽन्येषामप्यमुं प्रबन्धमनुबध्नतामलसमनसामप्याद्यपद्यप्रभावेनैव यथा स्यादित्येवमर्थं मङ्गलाचरणमग्रे निबन्धनस्य[1] निवेशयति[2]— **सच्चित्सुखेति**। तत्र च ब्रह्मतत्त्वप्रतिसन्धानस्य समस्तेषु मङ्गलेषु मूर्धाभिषिक्तत्वाच्छब्दस्य च शब्दतत्त्वविद्भिर्ब्रह्मत्वेनाभ्युपगमात् तस्यैव चात्रापि भवत्याद्यात्मना[3] प्रतिपाद्यत्वात् स्वस्य च ब्रह्मनिष्ठत्वाद् ब्रह्मतत्त्वविषयमेव मङ्गलमौचित्यातिरेकादाचरितं मन्तव्यम्। मङ्गलाचरणस्य पुनर्यथोक्तफलसाधनत्वं

'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्[4]।
जपतां जुह्वतां चैव विनिपातो न विद्यते॥'

इत्यादिस्मृतेः शिष्टाचाराच्च[5] द्रष्टव्यम्। अविनिपातश्चात्राभिमतात् फलादप्रच्युतिरेव। अपिचात्र 'सिद्धे[6] शब्दार्थसम्बन्ध' इत्यत्र तत्रभवतः पतञ्जलेर्भाष्यं 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च। अध्येतारश्च सिद्धार्था यथा स्युरिति' इति। 'वृद्धिरादैच्' (१-१-१) इत्यत्र च 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च। अध्येतारश्च वृद्धियुक्ता यथा

---

१. ग्रन्थस्य। २. कर्तुर्गम्यत्वादनुपादानम्. ३. भूधात्वादिरूपेण. ४. अयं श्लोको मनुस्मृतौ चतुर्थाध्यायेऽस्ति. 'अभिलषितायुर्धनादिसिद्धिर्मङ्गलं, तदर्थ आचारः' (मङ्गलाचार) इति मेधातिथिः. ५. 'न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति' इतिवद् मङ्गलाचारः शोभनं शीलं, तच्चाद्रोहवृत्तिरुपकारवृत्तिर्वा, न तु ग्रन्थादाविष्टवस्तुस्तोत्रमिति यद्युच्येत, तदाप्याह — **शिष्टाचाराच्चेति.** ६. इदं च प्रथमं वार्त्तिकं कात्यायनस्य.

स्युरिति' इति । 'भूवादि' (१-३-१) सूत्रे च 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते; वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च । अध्येतारश्च मङ्गलयुक्ता यथा स्युरिति' इति । अत्र च मङ्गलप्रयोजनो माङ्गलिकः । तत्र च यथाभाष्यं यथाचारं च मङ्गलादित्वमेव तत्तत्कार्याणामावश्यकम् । शेषयोः पुनर्नावश्यकता । अविगुणमङ्गलानामभिमतफलभङ्गमुपलभामहे; तच्चैवं प्रबलतरदुरितप्रतिबन्धादेवेत्यनुसन्धेयम् । इत्यास्तां नास्तिकवादावतारावसरः ।

अत्र च परमार्थस्वप्रकाशभूतसुखमात्रस्वरसे[+] यस्मिन् वस्तुनि शुक्तिशकल इव रूप्यं मिथ्यैव जगत् प्रकाशते; न तु प्रतीच इव चैतन्यमन्यद्रूपमस्यास्ति, तस्मिन् प्रत्यग्भूते परमात्मनि 'परं ब्रह्माहमस्मि' इत्यनिशं मम चित्तवृत्तिर्भूयादित्यक्षरार्थः । यदेवंविधपरमात्माख्यमात्मनः स्वतःस्वरूपमविद्यातिमिरदुष्टदृष्टेरन्यथान्यथावभासते, तत् तथैव मम तत्त्वविद्यासिद्धाञ्जनवशादनिशं प्रकाशतामिति यावत् । तत्रापि प्रत्यक्परमात्मापरपर्यायस्य ब्रह्मणः स्वरूपतटस्थलक्षणोपवर्णनद्वारा परमपुरुषार्थरूपोपदर्शनेन चित्तवृत्तेः स्वयंवरार्हविषयावेदनपराणि **परमात्मनी**त्येवंपर्यन्तानि पदानि वेदितव्यानि । तत्र च विश्वाधिष्ठानत्वं* तटस्थलक्षणं

१. मङ्गलमध्यत्वमङ्गलान्तत्वयोः. २. मङ्गलाचरणस्य प्रामाणिकत्वावधारणे. ३. यतः परमपुरुषार्थलाभप्रत्याशा. तादृशं विषयमनन्यप्रेरणया चित्तवृत्तिरन्विष्य वृणुते कान्तमिव कन्यकेत्यत उक्तं **स्वयंवरार्हविषयेति.**

+ 'स्वरूपे' इति गपुस्तके पाठः. * 'त्वलक्षणम्' इति घपुस्तके पाठः.

रजताधिष्ठानत्वमिव शुक्तेः । शेषं पुनः स्वरूपलक्षणं यथा शुक्तेरेवासाधारणं रूपम् । तत्र **सुखं** तावत् पुरुषार्थ एवेति सुप्रसिद्धम् । **चिच्छब्देन** तु तस्यैव साक्षात्कारः स्वयंप्रकाशतया प्रकाशितः । सुखानुभवो हि पुरुषार्थः । स चैकरसत्वेनाद्वैतत्वेन स्वयम्प्रकाशतयैव पर्यवस्यति, अपरथा प्रकाशान्तराभावेनाननुभवादपुरुषार्थतापातात । यद्यपि 'सुखं मे स्याद्' इत्येव पुरुषार्थं पुरुषा अर्थयन्ते, न तु सुखमहं स्यामिति, तथापि सांसारिकस्य सुखस्य जडाजडाकारद्वयकराम्बितस्य जडाकारसाक्षात्कारनान्तरीयकतया भेदसंभेदोऽपि पुरुषार्थकोटिनिविष्ट इवावभासते । मोक्षसुखस्य तु साक्षात्काराय स्वयंप्रकाशैव भगवती प्रभवतीति किमपरमपेक्ष्यत इति कृतमेतेन भेदतपस्विना । **सच्छब्देन** पुनः सैवेषा पुरुषार्थता समर्थिता । यदि खल्वेवंविधमपि सुखं विश्ववन्मिथ्यैव स्यात, तदा तदपि पुरुषार्थाभास एव भवेद्; न च भवेत् प्रेक्षावतां प्रवृत्तिपात्रम् । आत्मनः खल्वत्यन्तोच्छेदाद्वरं संसार एवानशनादिव कदशनम् । **एकरस**शब्देन तु तस्यैव सुखस्य दुःखासम्भिन्नता प्रदर्शिता; सच्चित्सुखैकरसमेव तद्वस्तु, न पुना रूपान्तरमन्यथान्यथावभासमानस्याप्यस्यास्तीत्यद्वैतात्मकतयाकुतोभयता च । तथा च श्रूयते—'[1]यन्मदन्यन्नास्ति । कस्मान्नु बिभेमि' इति । 'कस्माद्ध्यभेष्यद् द्वितीयाद्वै भयं भवति' इति च । यद् भयं भवति तद् द्वितीयादेवेत्यद्वैते भयस्य न सम्भावनापीत्यर्थः । **वस्तु**शब्देन पुनर्वक्ष्यमाणाविद्यावृत्त[2]प्रतिपत्तिसौकर्योपयो-

१. इदं बृहदारण्यके प्रथमाध्याये चतुर्थब्राह्मणे । अनेन वाक्येन 'कस्माद्ध्यभेष्यद्' इत्यादिवाक्येन च विवक्षितसिद्धेस्तयोर्मध्यपाठ्यः 'इति तत एवास्य भयं वीयाय' इत्यंशो नोदाहृतः. २. वृत्तशब्दः स्वरूपे. तच्च मिथ्यात्वम्. 'वृत्तं स्वरूपे चरित' इति वैजयन्ती.

गितया सच्चित्सुखैकरसत्वस्य वस्तुवृत्तमुपन्यस्तम्[1]। यद्येवमद्वैतमेवैकरसतया वस्तु स्यात्, कथं तर्हि प्रत्यक्षादिभिर्द्वैतं प्रकाशत इत्याशङ्काङ्कुरशमनेन **यत्रे**त्यादिना द्वैतमिथ्यात्वकथनेन तदेवाद्वैतं साधु साधितम्। तेन च देशतः कालतो वस्तुतश्चानवच्छिन्नतया पुरुषार्थकाष्ठा प्रतिष्ठापिता। तेनैव च द्वैतमिथ्यात्वकथनेन निखिलस्य दुःखस्य तद्धेतोश्चाविद्यापर्यन्तस्य विद्याख्यया चित्तवृत्त्या विनिवृत्तिः सूचिता। विद्याविनिवृत्त्योश्चैवमविद्योत्थत्वाविशेषाद्विनिवृत्तिः सूचितैव। अविद्यावस्थायामेव ह्यमी निवर्त्यनिवर्त्तकनिवृत्तिविभ्रमाः परिभ्रमन्तस्तत्त्वावस्थायां कथं कथामप्यर्हन्ति। अद्वैतविद्या खल्वियं कृत्स्नं द्वैतमेव ग्रसमाना स्वात्मानं च तत्तन्निवृत्तीश्च द्वैतोपाधौ युगपदेव ग्रसत इति किमपरमवशिष्यते। अपरथा[2] च 'पूर्णमेवावशिष्यते' इत्याम्नायशासनमतिलङ्घ्येत; अद्वैतं चोपक्रम्य द्वैतमेव भङ्ग्यन्तरेणोपसंहृतं स्यात्; कैवल्यप्रसिद्धिश्च कदर्थिता भवेत्; पुरुषार्थश्च न काष्ठामधितिष्ठेत्। तदेवं तत्त्वविद्यावाप्तनिजपदाभिषेकस्य न द्वैतानुबन्धगन्धोऽप्यस्ति; किन्तु निरन्तरमनन्तानन्दसाम्राज्यमेवात्मप्रभवमप्रतिबन्धं चकास्ति। तथा च समन्वयसूत्रे[3] शास्त्रतात्पर्यविदां[4] वचनम्—'अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य' इति। अथ **प्रतीचि** इत्यनेन यथोक्तस्य पुरुषार्थस्य प्रत्यासन्नता प्रत्यायिता। प्रतीचश्च परमात्मसामानाधिकरण्येन जगद्वैलक्षण्यं वर्णितं—जडस्य हि जगतो मिथ्यैव रूपं रूप्यवद्रूपान्तराभा-

१. स्वाभाविकं रूपं पारमार्थिकत्वलक्षणमित्यर्थः. २. सशेषत्वे. ३. 'तत्तु समन्वयात्' (१-१-४) इति बादरायणसूत्रे. ४. श्रीशङ्करभगवत्पादानाम्।

वात्; प्रतीचस्तु जीवरूपमेव मिथ्या, चिद्रूपं तु परमात्माव्यतिरेकात् सत्यमेवेति । अनेन च वैलक्षण्येन यथोक्तस्य वस्तुनः पुरुषार्थतैव पूर्ववत् समर्थिता; प्रतीचो हि जीवात्मनः परमात्मव्यतिरेके विश्वकोटिनिविष्टतया सोऽपि मिथ्यैव स्यादिति कस्यायं परमात्मभावः पुरुषार्थो भवेत्, 'फल्यभावे फलं कुत' इति न्यायात् । अनेनैव च सामानाधिकरण्येन साक्षिब्रह्मणोस्तात्त्विकैक्यकथनार्थेन 'अहं ब्रह्मास्मि' इति चित्तवृत्तेर्मिथ्यात्वविनिवृत्तये तत्त्वज्ञानतापि विज्ञापिता । यद्यपि† तस्मिन् प्रतीचीत्यनेनैव सामानाधिकरण्येन जीवब्रह्मणोरैक्यं शक्यमवसातुं, तथापि यथा परमात्मशब्दाद् ब्रह्मावगमः सुकरतरो भवति, न तथा तच्छब्दात् । नित्यप्राप्तस्याप्यविद्यावशाद् विस्मृतपाणिमाणिक्यवदप्राप्तस्य प्राप्तौ चित्तवृत्तिरित्यादिना तत्त्वसाक्षात्कारात्मकमायासविमुक्तं साधनमुक्तम् । परमित्यनेन च सदित्यादिना दर्शितस्य निरतिशयोत्कर्षस्य प्रतिपत्त्यवस्थायामप्यनुवृत्तिरावेदिता, तद्विषयाया एव विद्याया अविद्योत्पाटनपाटवात् । एवं च निरतिशयानन्दसाक्षात्कारात्मकतया स्वविषयस्यैव स्वयमपि पुरुषार्थत्वमस्याश्चित्तवृत्तेर्न त्वविद्यानिवृत्तेरेवेत्यप्यादर्शितम् । तदहो तत्त्वविद्याया माहात्म्यं, यत् स्वसाध्यवत् स्वयं च स्वविषयश्च पुरुषार्थभूयमेवावगाहते । अनिशामित्यनेन पुनरर्वाचीनं रसास्वादमवधीर्य परस्यैवास्य रसस्य रसिकास्वाद्यता द्योतिता । यस्य हि तत्त्वस्य

१. 'प्रतीचि परमात्मनी'त्येवंरूपेण. २. निरतिशयोत्कर्षगोचरायाः. ३. अविद्यानिवृत्तिवत्.

† 'द्यपि च' इति गपुस्तके पाठः.

सकृदपि स्मृतिः सकलकामधेनुर्भवति, किं पुनस्तस्य निरन्तरानुसन्धानामिति सूचितम्। तच्च मङ्गलाचरणभूयस्त्वादाभिमतफलभूयस्त्वायैवेत्येषा दिक्।

येऽप्येतत् पद्यं न पठन्ति, तन्मतेऽपि वृत्तिकारादिवत्[1] प्रबन्धाद् बहिरेव मङ्गलाचरणं बोद्धव्यम्, 'मङ्गलाचारयुक्तानाम्' इत्यविशेषेण[2] स्मरणात्। अपिचास्मिन्नपि पक्षे 'सत्तायां[3] भवति' इत्यत्रैव महन्मङ्गलमाचरिष्यतीति न किञ्चन दुष्यति॥

सर्वथापि तावत् प्रेक्षावत्प्रवृत्तिसौकर्यार्थं करिष्यमाणं वस्तु निर्दिशन् प्रकरणस्य प्रयोजनं दर्शयति—

पठितस्य पुनः पाठे फलं वृत्तेन वक्ष्यते।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम्॥ २॥

इति। एकस्यैव धातोरसकृत् पाठे यत् फलं, तत् तत्रतत्र तत्तद्ग्रन्थकारैरुक्तमप्यस्माभिरेकीकृत्य वृत्तेन वक्ष्यते। यद्यपि च 'धूनयति[4] धवति धवते' इति जात्यापि वक्ष्यते, तथापि 'भूयसा व्यपदेशो मल्लग्रामवद्' इति न्यायेन वृत्तेनेत्युक्तम्। तत्र च वर्णच्छन्दो वृत्तं, मात्राच्छन्दो जातिः। यद्येवं पद्येनेत्येव मुक्तकण्ठमुच्यतां; मुच्यतामयं भूयसा व्यपदेशक्लेशः। सत्यम्। वृत्तसौभाग्यात् पुनः पद्यप्रबन्धः श्लाघ्यतरो भवतीत्यभिप्रेयते। तथा चाचार्यदण्डिना दर्शितं—'श्रव्यवृत्तैः सुसन्धिभिः' इति। वृत्तबन्धान्तराले त्वार्याप्रवेशः स्थायिरसान्तर इव सञ्चारिरसप्रवेशश्चम्पकमालान्तराल इव च नीलपलाशप्रवेशो रसिकानां मानसम-

१. काशिकाकारादिवत्. २. मङ्गलं प्रबन्धाग्रे निवेशनीयमिति विशेषविरहेण. ३. इदं तृतीयश्लोके. ४. इदं षड्विंशश्लोके.

नुरुन्ध एवेत्यभिसन्धिः । तथा चात्रैवानुष्टुब्बन्धान्तराले '[1]जानातीति श्नि सिध्येद्' इत्यादिवृत्तान्तरप्रवेशोऽपि दृश्यते । वृत्तरत्नाकरादिवद्वा वृत्तशब्दः पद्यमात्रपर इति यथोक्तनिर्वाहालसैराश्रीयताम् । अथ किमर्थं धातुवृत्तिकारादिवचनभङ्गीं विलङ्घ्य वृत्तेन वचने भवान् आभिनिविशते; एवं च क्वचित् क्वचित् पादपूरणाय पदविन्यासप्रयासोऽपि परिहृतो भवतीत्यत उक्तं **न विनेति** । अत्रापि यथोपक्रमं वृत्तेनेत्येव वक्तव्ये **बन्ध**ग्रहणं बन्धविशेषभूषितस्यैव वृत्तस्य वस्तुनः सुग्रहत्वे हेतुत्वात् । एवं च 'वृत्तेन वक्ष्यते' इत्यत्रापि वृत्तबन्धेनेत्येवार्थः पर्यवस्यति । †ग्राहिश्चात्रावधारणपर्यन्ते ग्रहणे वर्तते । अथ यत्र संहितया पाठे वाक्यभेदो दुर्ग्रहो भवति यथा—'[2]ऐओङैऔज्झयवरलण्ञमङणनंझभञ्घढधष्' इत्येतस्मिंश्चन्द्रगोमिभोजदेवयोर्गद्यपद्यसाधारणे[3] सूत्रपाठे, तत्र पद्यबन्धे सति वस्त्वपि वाक्यार्थात्मकं गद्यबन्धवदर्थवशादन्तरान्तरा विच्छिद्य पाठस्यासम्भवाद् दुर्ग्रहमेव; दूरत एवावधारणम्; गद्यबन्धे च सति तत्सम्भवात् सुग्रहमेवेत्यभिप्रायेणोक्तं **प्रायेणेति** । तदनेनासकृत्पाठफलस्यैकीकृत्याकृच्छ्रेण ग्रहणमस्य प्रकरणस्यासाधारणं प्रयोजनमिति दर्शितं भवति ॥

तदेवं करिष्यमाणं वस्तु सप्रयोजनमुपाक्षिप्य तत्रापि 'भू सत्तायाम्' इति धातुपाठे प्रथमपठितं भूधातुं मङ्गलं चावलम्ब्य पुनःपाठफलं ब्रुवन् प्रकरणमारभते—

१. इदमष्टमश्लोके. २. एषा षट्सूत्री संहितया पाठे जातिर्भवति । 'हयवरट्' 'लण्' इति पाणिनिसम्मतसूत्रयोश्चात्र 'हयवरलण्' इत्येकीकरणं बोध्यम् . ३. यथासङ्ख्यमत्र न विवक्षितम्.

†'गृहीतिश्चा' इति गपुस्तके पाठः.

सत्तायां भवति प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव भावयत्यवकल्कने ॥ ३ ॥

तत्र च *सत्ताशब्देन सच्छब्दवाच्यं महान्तमात्मानं 'वृद्धिरादैज्' इति वृद्धिशब्देनेव वृद्धिमादावनुस्मरता प्रकरणारम्भोपयोगि मङ्गलमप्याचरितं मन्तव्यम् । उक्तं च भर्तृहरिणा—

'सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥'

इति । यदा तु 'सच्चिदि'त्यादिना वा बहिरेव वा प्रागेव मङ्गलमाचरितं, तदात्र सत्ताशब्दस्य माङ्गलिकत्वं मा वा भूद्, भवतु वा कामं फलभूयस्त्वाय । एवं मध्येऽपि 'सिध्येत्' 'जयेद्' इत्यादिभिरन्तेऽपि वृद्धिभाषाशब्दाभ्यां मङ्गलाचरणं कामं व्याख्येयं, 'वाग् वाणी भारती भाषा' इति भाषाशब्दस्यापि भगवत्याः सरस्वत्या वाचकत्वात । सर्वथापि धातूनामनेकार्थत्वाद् मृदः कुम्भो भवति, 'भावयज्ज्योतिरान्तरम्' (ध्यायेदित्यर्थः) इत्यादावभूतप्रादुर्भावादिष्वप्ययं भूर्भवति । तच्च 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकारात्, 'यमो गन्धने'(१-२-१५) इत्यादौ चोपरमादिभ्योऽर्थान्तराभिधानस्य बहुलमुपलम्भाद्, 'अञ्चोऽनपादाने'(८-२-४८) इत्यत्र च 'अनेकार्था धातवो भवन्ति' इति भाष्याद्, "धातुपाठे तु क्रियावाचित्वप्रदर्शनपरोऽर्थनिर्देशः, न तु नियमार्थः, तथा च 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्येवकारः पठित" इति

१. इदमष्टमश्लोके. २. इदं त्रयोदशश्लोके. ३. अष्टनवत्युत्तरशततमश्लोके. ४. अनेकार्थत्वं च.

*'सत्तायामित्यनेन' इति गपुस्तके पाठः.

च कैयटोक्तिनिर्वाहादवसीयते । यथाप्रयोगं क्वचिदपठितेऽप्यर्थे धातवो भवन्तीति यावत् । अत्र च सत्तायां भवति, प्राप्तौ भावयते भवते, अवकल्कने भावयतीत्येव वाच्येऽन्यथावचनं यथार्हं प्रक्रियादिभिर्बालानुग्रहार्थं छन्दोनुग्रहार्थं च । एवकारश्च पौनर्वचनिकः[2] । परस्मैपदाद्येव चात्र विवक्षितं, नतु लडेकवचनाद्यपि । तथा च 'सूत्रे लिङ्वचनाद्यप्रामाण्यमविवक्षात' इति न्यायविदः । 'ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्याद्' इत्यादिभिन्नलकारानिर्देशश्चैवमेव युज्यते । णिच्चेह चुरादिणिच् । तङ् च 'तङानावात्मनेपदम्' (१-४-१००) इत्युक्तस्य भावयमान इत्याद्यानस्याप्युपलक्षणम् । एतच्च सर्वं बालानुग्रहादिकं यथायोगमुत्तरेष्वप्युन्नेयम् । प्राप्ताविति । अत्र तावद् 'आधृषाद्वा' इति चुरादौ पठ्यते । 'युज पृच संयवन' इत्याद्या 'धृष प्रसहन' इत्यन्ता धातवो विकल्पेन णिचमुत्पादयन्तीत्यर्थः । 'भू प्राप्तावात्मनेपदी' इति युजादौ । भू इत्ययं धातुः प्राप्तौ वा णिचमुत्पादयति, आत्मनेपदी चेत्यर्थः । अत्र च यद्यप्यात्मनेपदस्य णिच्सन्नियोगशिष्टत्वाण्णिजभावपक्षे 'सन्नियोगशिष्टानामेकतरापायेऽन्यतरस्याप्यपाय' इति न्यायेन परस्मैपदमेव युक्तं, तथापि भवत इत्यात्मनेपदं वदन् एतन्मन्यते—यदाह मैत्रेयरक्षितः—'आ कुस्मादास्मनेपदीति प्रकरणे भू प्राप्तौ वेति वक्तव्ये आत्मनेपदीति वचनं केवलाण्णिजन्तादप्यात्मनेपदं यथा स्याद्' इति ।

---

१. कैयटोक्त्या निर्वाहाद् उक्तभाष्यस्योपपत्तिवर्णनात्. २. प्राप्तिरूपार्थपुनर्वचनवशायातः । पादपूरणार्थो न त्ववधारणार्थ इति तात्पर्यम् । 'एव साम्येऽवधारणे । पादपूरणकृच्चायम्' इति वैजयन्ती. ३. इदमष्टमश्लोके.

तदयुक्तम् । यदि खल्वाकुस्मीये काण्डे 'भू प्राप्तौ वा' इत्युच्येत, तदा 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेनानन्तरप्रकृतस्यात्मनेपदित्वस्यैव विकल्पः प्रतीयेत, न पुनर्महाप्रकृतस्य चुरादिणिचः । तेनैतदात्मनेपदिग्रहणं न सन्नियोगशिष्टन्यायापनयनाय प्रभवतीत्याणिच्पक्षे परस्मैपदमेव युक्तमुत्पश्यामः । तथा च 'मनोरमा भा भवते' इति प्रयोगं प्रकृत्य भूवादिसूत्रे सुधाकरः—"भू प्राप्तावात्मनेपदी आधृषाद्वेति विकल्पितणिच्च इति केचित् समाधितम् । तण्णिच्सन्नियोगेनात्मनेपदित्वादसाधीयः । अत एव 'भैराष्ट्रमभवद्' इत्यादि प्रयुयुजे" इति । धनपालशाकटायनौ चाणिच्पक्षे परस्मैपदमेव प्रतिपेदाते । एवं च 'शपि तत्रैव भवति' इति पठितुं युक्तम् ।

अन्यत्राप्येवमुन्नेतुमुचितं पाठपाटवम् ।
बली पुरुषकारो हि दैवमप्यतिवर्तते ॥

'भुवोऽवकल्कने कृपश्च' एतदर्थाद् भुवः कृपश्च स्वार्थे णिच् स्यादित्यर्थः । अत्र क्षीरस्वामी—'अवकल्कनं मिश्रीकरणं भावयति क्षीरेण घृतम्' इति । 'भुवोऽवकल्कने' इत्यपरे पठन्ति । तथा च धनपालः—'कृपेस्तादर्थ्य' इति पठित्वा अवकल्पयतीत्युदाजहार । तादर्थ्य इति हि भुव इति पूर्वधातोर्योऽर्थस्तदर्थत्वे सतीत्यर्थः । क्षीरस्वामी तु कृपेर्योऽर्थस्तदर्थभाव इति व्याख्यायावक-

१. तद् मैत्रेयानुसारेण केवलादात्मनेपदवचनम् . २. पृथुर्वैन्यो राज्यं प्राप्तवान् इत्यर्थो वाक्यस्य । इदं च तैत्तिरीयब्राह्मणे प्रथमाष्टके सप्तमप्रश्नेऽस्ति. ३. 'भवते शपि तत्रैव' इत्येतत्स्थान इति शेषः. ४. कृपिधातुपृथक्कारणेति शेषः. ५. अवकल्कनरूपः. ६. स च सामर्थ्यलक्षणः 'कृपू सामर्थ्ये' इति भ्वादावुक्तः. ७. तदर्थकत्वे.

ल्पयतीत्युदाहरणं च समर्थो भवतीति व्याचष्ट[1]* । मूलशुद्धिस्त्वत्र कीदृशीति न विद्मः । तथा च 'दध धारणे' इत्यत्र से[2] एवाह— 'कौशिकस्तु दद धारणे, दध दान इति पाठं व्यत्यास्थत । युक्तायुक्तत्वे तत्र सूरयः प्रमाणम् । वयं तु मतभेदप्रदर्शनमात्रेणैव कृतार्थाः । मुनिप्रख्यानां वाक्यं कथङ्कारं विकल्पयामः । वयमपि हि स्खलन्तोऽन्यैः कियन्नोपालप्स्यामहे' इति । तदेवं

पाठा व्याख्याश्च धातूनां दृश्यन्ते स्वैरिणः क्वचित् ।
प्रयोग एव भगवांस्तानवस्थापयेत् पथि ॥

सर्वथापि 'चुर स्तेये' इत्यत्र चुरादिण्यन्तेभ्यो णिचश्चेत्यात्मनेपदं नेच्छन्तीति मैत्रेयरक्षितेनोक्तं तत्र तत्र च तेनैव व्यवहृतमादृत्य भावयतीति परस्मैपदमात्रमुदाहृतम् । न त्वेतद् बहूनामनुमतम् । उक्तञ्च तेनैवापि—'धातुपारायणे त्वात्मनेपदमुदाहृतम्' इति । तेनात्र चोत्तरत्र च चुरादिण्यन्तादप्यात्मनेपदमुदाहार्यम् । शाकटायनः पुनः पूर्वमेव पक्षं पर्यग्रहीत् ॥

एवं भूवादयो धातव इति प्राथम्यं मङ्गलं चानुसृत्य भुवः पुनःपाठफलं प्रथममुक्त्वातः परं पाठक्रममुल्लङ्घ्य बुद्धिलाघवाद्यथासम्भवं मातृकाक्रममाश्रित्याह[3]—

१. एतेन पूर्वस्य व्याख्याप्रकारस्य क्षीरस्वामीयत्वं न प्रतीयते । प्रौढमनोरमायां तु 'क्षीरस्वामी तु कृपेस्तादर्थ्य इति पठित्वा तादर्थ्य इति प्रस्तुतस्य भुवोऽर्थे मिश्रीकरणे, अथवा तच्छब्देन क्लृपिः परामृश्यते । तस्य योऽर्थः सामर्थ्यलक्षणः तस्मिन्निति द्वेधा व्याख्यद्' इति दृश्यते. २. क्षीरस्वामी. ३. अयं च क्रमो धातोरन्ते बोध्यः.

*'चष्टे' इति घपुस्तके पाठः.

दाञो दत्ते ददातीति दाणो यच्छति दो द्यति ।
दाति दायति दाबूदैपोर्दयते रक्षणे ङितः ॥ ४ ॥

'डुदाञ् दाने' जुहोत्यादिः । यद्यपि च दत्त इत्यादिनिर्देशादेव धातूनां तत्तद्गणेषु पाठः प्रायेण व्यक्तः, तथापि तत्रतत्रैवंविधं व्याख्यानं यथासम्भवं बालार्थं पाठशुद्ध्यर्थं च । 'दाण् दाने' भूवादिः । एवमुत्तरेषु* अविशेषोक्तौ भूवादित्वं द्रष्टव्यम् । पाघ्रेत्यादिना (७-३-७८) यच्छादेशः† । प्रपूर्वश्चायं प्राचुर्येण प्रयुज्यते । क्वचित् पुनरन्यथापि । 'यच्छति प्रियतमे रभसेन'[2] । 'शर्म यच्छत द्विपदे चतुष्पदे' इति । एवमुत्तरेष्वप्यवद्यतीत्यादौ बहुलमुपसृष्टता द्रष्टव्या । 'दो अवखण्डने' दिवादिः । 'ओतः श्यनि' (७-६-७१) इत्योकारलोपः । 'नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत' इति वक्ष्यमाणन्यायेनात्र पुनःपाठतां मन्यते । 'दाप् लवने' अदादिः । 'दैप् शोधने' । अवपूर्वश्चायं प्रयुज्यते । तथाच 'दाधाघ्वदाप्' (१-१-२०) इत्यत्र भाष्यम्—'अवदायति अवदातं मुखम्' इति । 'देङ् रक्षणे' ।

[दाने दत्ते ददातीति दाञो दाणस्तु यच्छति ।
लवने दाति दापस्तु दो द्यतीत्यवखण्डने ॥
रक्षणे दयते देङो दायेद् दैपस्तु शोधने ।]

---

१. कथादिषु ह्रस्वाकारस्यान्त्यस्य सम्भवतोऽपि प्रयोगासमवायात् तान् हलन्तकल्पतया हलन्तेषु गणयिष्यन् प्रथममाकारान्तधातूनेवारभते 'दाञ' इति । २. किरातार्जुनीये तु 'यच्छति प्रतिमुखं दयिताया' इति 'चुम्बति प्रियतमे रभसेन' इति च दृश्यते. ३. नवनवत्युत्तरशततमश्लोके. ४. अविशेषोक्त्या भ्वादित्वमस्य द्रष्टव्यम्.

---

*'ध्वपि' इति गपुस्तके पाठः. †'शश्च' इति गपुस्तके पाठः.

इति पाठेऽपि न फलभेदः । अत एवैवंविधाः पाठभेदाः पाठाभेदेऽपि वा पौर्वापर्यभेदा नैवाभिधायिष्यन्ते ॥

गाते गाङो गतावर्थे [1]कै गै शब्देऽस्य गायति ।

'गाङ् गतौ' । त्रिष्वपि वचनेषु समानं रूपम् ॥

पाने पिबति रक्षायां पाति पायति शोषणे ॥ ५ ॥

'पा पाने' । 'पा रक्षणे' अदादिः । 'पै ओवै शोषणे' ॥

धेटो धयति पानार्थे धाञो धत्ते दधात्यपि ।

'धेट् पाने' 'डुधाञ् दानधारणयोः' जुहोत्यादिः । तथा च 'डुदाञ् दाने । डुधाञ् धारणे च' इति शाकटायनः । 'डुधाञ् धारणपोषणयोः । दानेऽप्येके' इति तु मैत्रेयरक्षितः ॥

[2]द्रै स्वप्ने द्रायति द्राति कुत्सिते गमने लुकि ॥ ६ ॥

'द्रा कुत्सितायां गतौ' । लुकि शब्लुकि ॥

शब्दसङ्घातयोर्धात्वोस्स्त्यायत्येकस्य सो न षः ।

'स्त्यै ष्ट्यै सङ्घातशब्दयोः' । स्त्यै सङ्घाते, ष्ट्यै शब्द इत्यनुक्ते यथासङ्ख्यं नेष्यते । एवमन्यत्राप्येवंविधे धातुपाठे द्रष्टव्यम् । तथाच '[3]ऋदितो मेदते मेदेद् मेधाहिंसनयोर्द्वयोः' । इति, '[4]प्रत्येकं निदिनेद्योस्तां नेदते नेदतीत्युभे । कुत्सायां सन्निकर्षे वा' इति च वक्ष्यते । तत्र च शब्दे सङ्घाते वा यौ धातू,

---

१. 'कै गै शब्दे' इति धातुपाठीयामानुपूर्वीं बोधयितुं कैधातोरुपादानम्. २. धातुपाठानुपूर्वीयम् । अस्या मूलत एव बोधाद् व्याख्यायामप्रदर्शनम् । दैवानिर्दिष्टामेव हि धातुपाठानुपूर्वीं सर्वत्र पुरुषकारो निर्दिशति. ३. इदं चतुरुत्तरशततमश्लोके. ४. इदं चतुर्दशोत्तरशततमश्लोके.

तयोः स्त्यायतीति रूपमिति । एवं तर्हि किमर्थं द्वौ पठितावित्यत उक्तम् **एकस्य सो न ष इति** । तयोरेकस्य 'स्त्यै' इत्यस्य तिस्त्यासति अतिस्त्यपादित्यादिषु संश्चङन्तेषु 'आदेशप्रत्यययोः' (८-३-५९) इति सस्य षत्वं न भवति अषोपदेशत्वेनानादेशसकारत्वात् । अन्यस्य तु तिष्ट्यासति । अतिष्ट्यपदित्यादि भवत्येवेत्यर्थः । यथादैवमेव च मैत्रेयरक्षितः । क्षीरस्वाम्यादयः पुनः शाकटायनश्च द्वितीयस्य ष्ट्यायतीत्येव रूपं प्रतिपेदिरे । तद् भाष्योक्तेन षोपदेशलक्षणेन विरुध्यते । तथा हि—'धात्वादेः षः स' (६-१-६४) इत्यत्र भाष्यम्—'अज्दन्त्यपराः सादयः षोपदेशाः स्मिङ्-स्वदि-स्विदि-स्वञ्जि-स्वपयश्च । सृपि-सृजि-सृ-स्तृ-स्तॄ-स्त्या-सेकृवर्जम्' इति । अच्परो दन्त्यपरो वा सकारः प्रयोग आदिर्येषां सृप्यादिभ्यः सप्तभ्योऽन्येषां धातूनां ते च, स्म्यादयश्च पञ्च पाठे षादयो वेदितव्या इत्यर्थः । 'ष्वञ्ज परिष्वङ्गे' । 'ञिष्वप् शये' । 'गमॄ सृप्लॄ गतौ' । शेषास्त्विकारान्तादिष्वेव वक्ष्यन्ते । तत्र च स्तृ इति ह्रस्वान्तं केचिन्न पठन्ति । तथा च 'स्तॄञ् छादने' इति दीर्घान्तमेव जिनेन्द्रादयः प्रायः पठन्ति । श्रीधरस्तु 'स्तृञ् छादने' दीर्घः 'स्तृञ् छादने' ह्रस्व इत्युभावप्युपन्यास्थत । स्त्येति चात्र स्त्यै गृह्यते । भागवृत्तौ तु 'सीकृ-सेकृ' इत्यधिकमपि पठ्यते । तच्च 'सीकृ सेचने' इति श्रीधरो व्याकरोत् ; 'एतानष्टौ वर्जयित्वा' इति चाधिक्यमेव मुक्तकण्ठमुक्तवान् । तच्चैतल्लक्षणं

१. दैवमैत्रेयरीत्या द्वयोरपि धात्वोर्दन्त्यपरसादित्वाभ्युपगतौ द्विष्पाठसाफल्यायैकस्यैव षोपदेशत्वप्रतिषेधकक्ष्यायां निवेशादपरस्मिन् षोपदेशलक्षणं प्रसरमासाद्य व्यापकत्वं प्राप्नुयात् । क्षीरस्वाम्यादिपक्षे तु तादृशविषयपरिलोपो भवतीत्येतावता विरोधो बोध्यः.

ष्ठ्यायतीत्येव प्रयोगाभ्युपगमे सादित्वदन्त्यपरत्वयोरभावात् ष्ठ्या-यतिं न व्याप्नुयात् । व्यापकेन च नाम लक्षणेन भवितव्यम् ॥

सै क्षये सायतीतीष्टमन्तकर्माणि तु स्यति ॥ ७ ॥

'क्षै षै जै क्षये' । सै इति तु पाठः षोपदेशलक्षणविरुद्धः । एतेनैतदपि प्रत्युक्तम्—यदुक्तं 'क्रियार्थो धातुरि'त्यत्र शाकटायनेन—"षच समवाये । सचति सिषाचयिषति । केषाञ्चिदयमषादिः पाठे । तेषां सिसाचयिषति । 'सृपिसृजिसृस्तृस्तृस्त्यासेकृवर्जमि'ति च यत् केषाञ्चित्, तदुपलक्षणम् । अन्यथा सचतिसायत्यादयोऽपि षादयः स्युः" इति । प्रबलविरोधे हि बाधैव दुर्बलस्य न्याय्या । न पुनरुपलक्षणादिभिरुपरोधगन्धोऽपि । तथा च पार-मर्षं[1] सूत्रं [2]'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्' इति । एवं च श्लोकेऽपि 'षै' इत्येव पठितुं युक्तम् । 'षो अन्तकर्माणि' । दिवादिः । तच्चावसानक्रिया ॥

जानातीति श्नि सिध्येज्ज्ञपयति तु पुनर्मारणादौ घटादे-श्चौ मित्त्वेऽपीदमेव ज्ञप मिदिति पदं ज्ञापने मारणादौ । तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्या-दुक्तस्योक्तिर्णिचश्चेत्युदितविहतये ज्ञापयेज्ज्ञो नियोगे॥ ८॥

'ज्ञा अवबोधने' इत्यस्य श्नाविकरणे सति जानातीति सिध्येत् । 'ज्ञाजनोर्जा' (७-३-७९) इति जादेशः । †रूपोदाहर-

१. जैमिनीयम्. २. इदं १ अध्याये ३ पादे तृतीयं सूत्रम् । अनेन हि 'औदुम्बरीं स्पृष्ट्वोद्गायेद्' इत्यादिप्रत्यक्षश्रुतिविरोधे 'औदुम्बरी सर्वा वेष्टयितव्या' इति सर्ववेष्टनादिस्मृतीनामनुमेयमूलश्रुतित्वेन दुर्बलानां बाधो बोध्यते. ३. 'चुरादिश्चुः' (११८ श्लो.) इति परिभाषया चुरादावित्यर्थः.

†'ज्ञारू' इति गपुस्तके पाठः.

णमात्रं चैतत्। प्रयोगे तु 'अकर्मकाच्च' (१-३-४५) इत्यात्मनेपदं मा भूदिति कृष्णमित्यादि कर्मोपस्कृतव्यम्[1]; अकर्त्रभिप्रायविषयं[2] च द्रष्टव्यम्, अन्यथा 'अनुपसर्गात् ज्ञ' (१-३-७६) इत्यात्मनेपदप्रसङ्गात्। घटादेः पुनरस्य मारणाद्यर्थत्वे ज्ञपयतीति तु सिध्येत्। पादपूरणार्थो वा तुः। अत्र 'मारणतोषणनिशामनेषु ज्ञा' इति घटादिषु पठ्यते। इत्थमेव च 'श्लाघह्नुङ्स्था' (१-४-३४) इत्यत्र न्यासः। 'निशानेष्विति पाठ' इति तु हरदत्तः[3]। चन्द्रगोमी चैवमेवापाठीत्। क्षीरस्वामिशाकटायनकौमारास्त्वाद्यमपि पाठं पक्षान्तरत्वेन पर्यग्रहीषुः। तत्र निशामनमालोचनं चाक्षुषज्ञानम्। शाकटायनस्तु 'आलोचनं प्रणिधानमाहुः' इत्याह। निशानं तीक्ष्णीकरणं। तत्र मारणादिष्वर्थेषु ज्ञा मित्संज्ञो भवतीत्यर्थः। इति मित्त्वाण्णौ 'मितां ह्रस्व' (६-४-९२) इति ह्रस्वः। तेषु तु मारणे संज्ञपयतीति प्रयुञ्जते। शेषयोरपि कौमारानुसारेण विपूर्वः प्रपूर्वश्च प्रयोगो द्रष्टव्यः। विष्णुं विज्ञपयति, प्रज्ञपयति[4] रूपं कोपं वेति। अथ ज्ञपिप्रसङ्गादनादन्तस्यापि ज्ञपेः फलमुक्तं— 'ज्ञप मिच्च' इति चुरादिमित्त्वेऽपि इदमेव पदम्, तच्च ज्ञापने मारणादौ च प्रयुज्यत इति। केचित्[5] पुनः 'ज्ञप मारणतोषणनिशामनेषु मिच्च' इति वा 'मारणतोषणनिशामनेषु ज्ञा मिच्च' इति वा पठन्ति। व्यक्तं चैतद् 'इको झल्' (१-२-९) इत्यत्र न्यासे। अनयोस्त्वाद्यमेव पक्षं क्षीरस्वामी समाशिश्रियत्। निशानेष्विति

---

१. अध्याहर्तव्यमित्यर्थः. २. अत्र विशेष्यम् 'एतद्' इति. ३. 'श्लाघह्नुङ्' इत्यत्रैव. ४. दर्शयति तीक्ष्णीकरोति वेत्यर्थः। अनयोश्चार्थयोः क्रमेण रूपकोपौ कर्मणी. ५. ज्ञपिविषये चुरादौ पाठभेदान् दर्शयंस्तेषु 'ज्ञप मिच्च' इति पाठस्य युक्ततमत्वं साधयितुमारभते केचिदित्यादिना.

तु विशेषः। शाकटायनः पुनरन्त्यपक्षानुकूलः। *[1]तत्र च पक्षद्वयेऽपि निशानपाठोऽपि घटादिपाठसाम्याच्छाकटायनानुकूल्याच्च द्रष्टव्यः। क्षीरस्वामिपक्षे पुनर्निशामनपाठोऽपि। 'ज्ञप मिच्च' इत्येव तु मैत्रेयरक्षितः। 'श्लाघह्नुङ्स्था' (१-४-३४) इत्यत्र न्यासकारश्च "सर्वथापि 'प्रच्छ ज्ञीप्सायां' 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' (१-४-३४) इति ज्ञाने ज्ञापनेऽपि च प्रयोगदर्शनान्मारणाद्यर्थानामुपलक्षणत्वादयं ज्ञपिर्यथादृष्टमर्थान्तरेऽपि भवति" इति। [2]एवं च 'ज्ञप मिच्च' इत्येव पाठो युक्ततमः। येनैवं मारणादौ ज्ञापने चार्थे ज्ञपयतीति सिद्धं, तेनार्थाद् ज्ञापनेऽर्थे द्वैरूप्यं भवति। यथा हि चुरादौ 'ज्ञप मिच्च' इति ज्ञापनेऽपि मित्त्वविधानाश्रयणाद्ध्रस्वो भवति, तथा घटादौ मारणादिविशेषणबलात् ततोऽन्यत्र मित्त्वाभावाद्ध्रस्वो न भवतीत्यर्थाज्ज्ञापने द्वैरूप्यम्। अथ घटादौ मारणादिपूक्तस्य मित्त्वस्य चुरादावपि तेष्वेवोक्तिः किमर्थेत्यत उक्तम् — उक्तस्योक्तिर्णिचश्चेत्युदितस्यात्मनेपदस्य विघातार्था बाधनार्थेति। अर्थाच्च चुरादिणिचोऽन्यत्राविघातं ब्रुवता ज्ञपयत इत्यपि [3]तत्र स्यादित्युक्तं भवति। अयं च विभागश्चुरादिण्यन्तेभ्यो 'णिचश्च' (१-३-७४) इत्यात्मनेपदाभावपक्षमाश्रि-[4]

१. निशामनपाठस्य न्यासतः सिद्धत्वान्निशानपाठं साधयितुमाह—तत्रेत्यादि। शाकटायनानुकूल्यं च निशानेषु ज्ञा मिच्चेत्येव तेनाश्रयणाद् बोध्यम्। क्षीरस्वाम्यानुकूल्यं तु न केवलं निशानपाठस्य, किंतु निशामनपाठस्यापीत्याह—क्षीरस्वामिपक्षे इति. २. ज्ञापनाद्यविकार्थसङ्ग्रहाय न्यासकारेण मारणाद्यर्थनिर्देशस्याव्यावर्तकत्वाभिधानाद् 'ज्ञपिः' इति पकारविशिष्टतया धातुस्वरूपस्य निर्देशाच्चेत्यर्थः. ३. घटादौ. ४. अयं पक्षो मैत्रेयरक्षितोक्तत्वेन भूधातौ दर्शितः.

*'अत्र' इति घपुस्तके पाठः.

त्योक्तः । पक्षान्तरे तु मारणादिष्वन्यतः सिद्धत्वात् ततोऽन्यत्रैवानेन विधिर्युक्तः । 'ज्ञा †नियोगे' । आज्ञापयेत् ॥

मिमीते मायते माने माति तत्रैव शब्लुकि ।
मयते प्रणिदानेऽर्थे

'माङ् माने शब्दे च' । जुहोत्यादिः । §माङ्मानशब्दयोरित्यनुक्तिरन्वाचयद्वारा[1] शब्दे प्रयोगाप्राचुर्यार्था[2] नूनम् । यदाह 'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च' इत्यत्र क्षीरस्वामी—"*अत्र पृथक्पाठो विरलप्रयोगार्थ' इति । व्यभिचरति[3] चैतत् 'पूयी विशरणे दुर्गन्धे च' इत्यादौ । 'भृञामिद्' (७-४-७६) इत्यभ्यासस्येत्त्वम् । 'माङ् माने' दिवादिः । अयं च मैत्रेयरक्षितेनानुमतः; नतु बहुभिः । तथा च 'घुमास्थागापाजहातिसां हलि' (६-४-६६)इत्यत्र न्यासः—"मा इति कस्येदं ग्रहणं, किं 'मेङ् प्रणिदान' इति भौवादिकस्य, उत 'माङ् मान' इति जौहोत्यादिकस्य, आहोस्विद् 'मा मान' इत्यादादिकस्य । 'गामादाग्रहणेष्वविशेष' इति त्रयाणामपि ग्रहणम्" इति । क्षीरस्वामी तु दिवादावेवाह—'माङ् मान इति दुर्ग' इति । 'मा माने' । आधेयस्याधारादनधिकपरिमाणतात्र मानम् । तेनाकर्मकोऽयम् । मान्ति तण्डुलाः स्थाल्यामिति । 'मेङ् प्रणिदाने' । तच्च विनिमयः । अपमयते विनिमयत इत्यादिः सोपसर्गस्यैवास्य प्रयोगो दृश्यते ॥

---

१. माङः शब्दरूपेऽर्थे या वृत्तिस्तदप्राचुर्यलक्षणानुषङ्गिकत्वरूपोऽन्वाचयश्चशब्दस्यार्थः. २. उक्तं फलं सम्भाव्यते, न पुनरवधार्यते वक्ष्यमाणव्यभिचारादिति भावः. ३. दुर्गन्धे प्रयोगप्राचुर्यादिति शेषः.

---

†'नियोजने' इति घपुस्तके पाठः. §'माङ्मानशब्दयोरिति त्वनु' इति गपुस्तके पाठः. *'अस्य' इति घपुस्तके पाठः.

श्राति श्रायति लुक्शपोः ॥ ९ ॥

'श्रा पाके' । 'श्रै पाके' । स[4] च द्विविधः । अन्यकर्तृकः[2] पच्यमानकर्तृकश्च[1] । यथा—चैत्रः पचति । पच्यते ओदनः स्वयमेवेति । पचतीत्यस्याग्न्यादिभिस्तण्डुलान् विक्लेदयतीत्यर्थः । पच्यत इत्यस्य विक्लिद्यतीति । तत्र[3] चान्त्यः क्वाथ इत्यके । श्रायति यवागूः क्वथतीत्यर्थः । अथ घटादौ च 'श्रा पाक' इति पठ्यते; चुरादौ च कैश्चित् । यदुक्तं 'श्रृतं पाके'(३-१-२७)इत्यत्र न्यासे—'श्रा पाक इत्यदादौ च पठ्यते, घटादिषु च मित्संज्ञार्थः, कैश्चिच्चुरादावपि, 'श्रै पाक' इति भूवादौ पठ्यत' इति । तथा च चन्द्रगोमिना चुरादावपि 'श्रा पाके' इति पठ्यते । तत्र च घटादौ 'श्रा पाक' इत्यस्यार्थे[5] वृत्तिकृतो[6] विवदन्ते । तत्र तावच्छ्रातिश्रायत्योः सामान्यानुकरणमिति मैत्रेयरक्षितक्षीरस्वामिशाकटायनाः श्रातेरनुकरणमिति हरियोगी । सर्वथापि पाकेऽर्थे श्रा मिद्भवतीत्यर्थः । श्रपयति श्रपयते । पाकादन्यत्र श्रापयति घर्मः । स्वेदयतीत्यर्थः । चुरादौ चैतदेव रूपं 'नान्ये मितोऽहेतौ' इति मित्त्वनिषेधात् । येषां चुरादौ मित्त्वमुक्तं ज्ञपयति यमयति चहयति चपयतीति[7], तेभ्योऽन्ये धातवो हेतुमण्णिचोऽन्यत्र णौ मितो न भवन्तीत्यर्थः । तदेवं चतुर्षु श्रापाकेषु[8] सत्स्वपि द्वयोरेव फलव-

---

१. पाकश्च. २. विक्लेदनरूप इत्यर्थः. ३. विक्लित्तिरूप इत्यर्थः. ४. श्राश्रैधात्वोः. ५. 'अर्थे' इति तादर्थ्येऽव्ययम् । घटादिपठितश्राधातुविषय इत्यर्थः. ६. धातुपाठव्याख्यातार इत्यर्थः. ७. चहस्थाने 'चप' इति मैत्रेयस्य पाठादिदं रूपम् । एवञ्च ज्ञपादिपञ्चके त्रयाणां प्रदर्शनमन्ययोरप्युपलक्षणमसति पाठभेदे . ८. 'श्रा पाके' इति समुदायानुकरणाद् एदन्तात् सुप् । तदाकारेषु पाठेष्वित्यर्थः । श्रापाठेष्विति तु तात्पर्यम् .

चनं घटादेर्ज्ञपयातिवदूह्यत्वाच्चुरादेश्च मैत्रेयरक्षितादिवृत्तिष्वदर्शनाद्। 'उक्ता न दुष्यन्त्यन्यसम्भवे' इति वक्ष्यमाणनीत्या निर्वाहः सर्वत्राप्यभ्यूह्यः ॥

गतिगन्धनयोर्वाति वायतीति तु शोषणे ।
वयते वयतीत्येवं तन्तुसन्तान इष्यते ॥ १० ॥

'वा गतिगन्धनयोः' अदादिः। गन्धनं मर्दनं हिंसा। तथा कथादौ क्षीरस्वामी—"'वा गतिसुखसेवनयोः'। वापयति। वातेत्येके। वातयति अववातद्" इति। हेमचन्द्रस्तु 'वातणि'ति पठित्वा 'सुखसेवनयोरित्येक' इति चोक्त्वा 'वेत्येक' इत्यप्याह। णित्त्वं चुरादित्वचिह्नम्। 'पै ओवै शोषणे' 'वेञ् तन्तुसन्ताने' ॥

गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च ।

'ओहाङ् गतौ' 'भृञामिद्'(७-४-७६)इतीत्। 'ओहाक् त्यागे' जुहोत्यादिः ॥

रै शब्दे रायतीतीष्टं रा दाने राति शब्लुकि ॥ ११ ॥

'रा ला आदान' इति चन्द्रः। तन्मतेनात्राप्याङ्प्रश्लेषो द्रष्टव्यः ॥

स्नातीति शौचे †स्नः स्नायेदिति चेच्छन्ति केचन ।

---

१. दैवस्यान्तिमश्लोकशेषोऽयम्. २. कथादिपाठसामर्थ्यादेव सवर्णदीर्घानापन्नो ह्रस्वाकारो धातोरन्ते णिज्विवक्षायां 'अतो लोप' (६-४-४८) इति लुप्तः कल्प्यः। धातोश्चैवमग्लोपित्वाद् 'अववापद्' इति लुङि रूपं द्रष्टव्यम्. ३. मूले 'रा दान' इत्यत्रापि.

---

†'तु' इति क-गपुस्तकपाठः

इति च क्वचित् कोशे दृश्यते । 'ष्णा शौचे' । अदादिः । 'ष्णै शौचे' । तथा च—

'पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्त्या जघनं घनम् ।
या स्त्रियो दृष्टवत्यस्ताः पुम्भावं मनसा ययुः ॥'

इति भगवान् व्यासः । 'स्नाति स्नायत्याप्लवत' इति चाख्यातनिघण्टुः । 'उष्णीषं स्नायतेः' इति निरुक्तं चैवमेव व्याचख्युः— 'उष्णीषं शिरोवेष्टनं । स्नायतेः शौचार्थस्य वेष्टनार्थस्य वोभयस्यापि तत्र सम्भवाद्' इति । एवं च 'ष्णै वेष्टन' इत्यस्यापि स्नायेदिति द्रष्टव्यम् । क्षीरस्वाम्यादीनां च बहूनामनुमतोऽयं पाठः । देवेन तु 'ष्टै वेष्टने स्तायति तिष्टापयिषति' इति मैत्रेयरक्षितोक्ततकारविस्रम्भान्नायमनुसृतः ॥

क्षये क्षयति हिंसायां क्षिणातीति षितो भवेत् ॥ १२ ॥
निवासगत्योः क्षियति क्षिणोत्यावगुणे क्षिणोः ।
[एके क्षेरेव भाषायां क्षिणोतीति पदं विदुः ।]

अत्रान्त्यमर्धं क्वचिदेवै दृश्यते । 'क्षि क्षये' । 'क्षिरैश्वर्ये इत्येके' इत्येवं क्षीरस्वामी; 'ऋभून् क्षयति ईष्टे ऋभुक्षेन्द्रः' इति च । 'क्षिष् हिंसायां' । क्र्यादिः । षिद्ग्रहणमस्यैव पाठस्योपलक्षणार्थं, 'रि क्षि' इति वक्ष्यमाणक्षिव्यावृत्त्यर्थं च, 'षिद्भिदादिभ्योऽङ्

---

१. क्वचिदेवेत्यनुक्त्या बहुष्वदर्शनेऽप्येकत्र दर्शनं वक्ष्यमाणप्रयोगतः स्नाधातुपुनःपाठावधारणादादरणीयं मन्यते । अन्यथा तु समनन्तरश्लोकव्याख्यायामिव अदर्शनस्यादरणीयतां सूचयितुं निषेधप्रधानमेवकारं निर्दिशेत्. २.' शौचार्थस्य' इति भगवद्दुर्गः. ३. एवकारलभ्यस्य बहुष्वदर्शनस्य प्रधानवाक्यार्थस्यादरणीयतां मन्यते क्षिणोतीति पदस्यान्यतः सिद्धत्वात्.

(३-३-१०४) इत्यङि कृते क्षियेत्येवंरूपफलसूचनार्थं च। दीर्घान्तोऽयमित्येके। 'क्षीणाति' इति हेमचन्द्रः। 'क्षि निवासगत्योः'। तुदादिः। औ उविकरणे अगुणे 'संज्ञापूर्वको विधिरनित्य' इति गुणाभावे च सति 'क्षणु हिंसायां क्षिणु च' इति मैत्रेयरक्षिताद्युक्तस्य धातोः क्षिणोतीति भवति। अस्य च नुमादिनान्यभावेऽपि क्षिसादृश्यादत्रोक्तिः। स्वरितेत्त्वाच्च क्षिणुत इत्यात्मनेपदस्याप्युपलक्षणमेतत्। हरियोगी तु अत्र 'संज्ञापूर्वको विधिरनित्य' इत्येतदनादृत्य क्षेणोतीत्युदाहार्षीत्। तथैव च चान्द्रेण पूर्णचन्द्रेण 'ऋणु गतौ' 'तृणु अदने' 'घृणु दीप्तौ' इत्यत्र अर्णोति तर्णोति घर्णोतीत्युदाहृत्योक्तं—"'धातोर्लघोरुपान्त्यस्यादेङ् नेष्यत' इत्यन्यः। तस्याभिप्रायो मृग्य" इति। क्षीरस्वामी पुनः क्षणुमेव पठित्वा 'क्षिणु इति दुर्गः क्षिणोति' इत्याह; ऋणोतीत्यादि चोदाहृत्य 'एते सार्वधातुके सन्दिग्धगुणाः अर्णोति' इत्याद्याह। क्षेरेव तु श्नौ सति भाषायामपि क्षिणोतीति भवतीत्येके। तथा च मैत्रेयरक्षितः स्वादिगणे 'तृप प्रीणने' इत्यस्यानन्तरं पठ्यमानं छन्दसीत्येतद् व्याचक्षाणः 'छन्दसीत्यागणपरिसमाप्तेरधिक्रियत' इति क्षीरस्वामिवदुक्त्वाह—"'रि क्षि चिरि जिरि दाश दृ हिंसायाम्'। क्षिणोति। भाषायामप्यस्य प्रयोगं केचिदिच्छन्ति। 'पञ्चबाणः क्षिणोति'" इति। क्षीरस्वामी तु ऋक्षि इति पठित्वा ऋङ्क्षणोतीति ऋनृङ्क्ष इति चोदाहृत्य 'ऋणोति क्षिणोतीत्येके' इत्याह॥

---

१. दीर्घान्तत्वमेवादृतं सिद्धान्तकौमुद्याम्. २. आदिना तृणोति घृणोति. ३. आदिना तर्णोति घर्णोति. ४. इदित्त्वान्नुम्। सिद्धान्तकौमुद्यां तु एकधातुपक्षे 'ऋक्षिणोति' इत्युदाहरणं दृश्यते. ५. अयं प्रयोगो मन्त्रे मृग्यः. 'इजादेश्च गुरुमतोऽनृच्छः' (३-१.३६) इत्याम् 'अमन्त्र इति' निषेधात्.

जयेज्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ॥ १३ ॥
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ।

'जि जये' । जयेत् कृष्णः । सर्वोत्कर्षेण वर्तेतेत्यर्थः । 'जि अभिभवे' । जयेत् कंसम् । 'जि, ज्रि अभिभवे' इति क्षीरस्वामी । 'अभिषव इत्यपरे' इति *च पूर्णचन्द्रः । तत्र च ज्रि इति पाठो ज्रयतीति ताभ्यामुदाहृतोऽपि 'जिगादुपज्रयति गोरपीच्यम्' इत्यादिदर्शनादार्षः । सर्वथाप्यर्थभेदाद् द्विष्पाठ इति तात्पर्यार्थः । ऐवं च 'ज्रि अभिभवे' 'जि जये च' इति सकृदेव पाठश्चिन्त्य इत्यप्यर्थादायातम् । सकर्मकाकर्मकोक्त्या तु प्रयोगभेदश्चास्तीत्युक्तम् । नन्वेवमपि 'जि जय' इत्येव द्वावप्यर्थौ सिद्धौ जयत्वाविशेषादित्यत उक्तम् **उत्कर्षप्राप्तिरिति** । न जय इति जयमात्रं गृह्यते । द्विष्पाठबलाद् गोबलीवर्दनीत्या जयविशेषस्यैव ग्रहणात् । द्विष्पाठस्त्वर्थप्रयोगभेदौ व्यङ्क्तुमित्यभिसन्धिः ॥

अयत्येतीयते गत्यामधीतेऽध्येति चेङिकोः ॥ १४ ॥

'इ गतौ' । 'ई' इत्येके । अनयोश्च पाठयोरियाय अयाञ्चकारेति फलभेदः । तयोश्चाद्ये 'अभ्यासस्यासवर्णे' (६-४-७८) इतीयङादेशः । अन्त्ये तु 'इजादेश्च गुरुमतोऽनृच्छः' (३-१-३६)

---

१. इदं ७ अष्टके २ अध्याये २५ वर्गे ५ ऋचि । उपज्रयतीत्यस्य उपगच्छतीत्यर्थो वर्णितः सायणाचार्यैः. २. द्विष्पाठस्य प्रामाणिकत्वे सिद्ध इत्यर्थः. ३. 'आद्येऽर्थेऽसावकर्मकः' इत्युक्त्या. ४. गोशब्दस्य गोविशेषपरत्वाश्रयणन्यायेन.

---

*'च' इति न पठ्यते गपुस्तके.

इत्याम[1]ः । तत्र चैकत्वेऽप्यादिवद्भावव्यपदेशिवद्भावाभ्यामिजादित्वगुरुमत्त्वे । व्यक्तौ चैतौ पक्षौ[3] मैत्रेयरक्षितवृत्तौ । अपरे पुनरुभावपि न पठन्ति । व्यक्तं चैतद् धनपालशाकटायनवृत्त्योः । अपि च 'शौटृ गर्वे' इत्यादिकान् कांश्चन[4] धातून् पठित्वान्ते च 'उदात्ता' इत्युच्यते । तच्चास्मिन् प्रकरणेऽयतेरपि पाठे सति तस्य 'अनिट्[5] स्वरान्तो भवतीति दृश्यताम्' इत्यनुदात्तत्वात् प्राचुर्याभिप्रायेण कथञ्चिन्नेयं स्याद्, यथा वा मैत्रेयरक्षितः—'उदात्तत्वमयतिवर्जम्, भट्टग्रामन्यायेन[6] तूदात्ता इत्युच्यते' इति । स चायं न्यायः सुनिश्चित एवायतेः पाठे शोभेत; विप्रतिपन्ने पुनरुदात्तोक्त्याञ्जस्यवशादपाठपक्ष एव साधीयान्[7] । उदयतीत्यादि चैवमसाध्वेवास्तु । क्षीरस्वामी पुनः 'इट किट कटी गतौ' इति पठित्वा 'ईदित्त्वात् कट्टः कट्टवान् । अन्ये इदितमेनम् ई च प्रश्लिष्टमाहुः' इति चोक्त्वा कण्टति कं(ण्टा?)ण्टकफलः, मानुषकण्टकः[8] 'उदयति दिननाथे याति शीतांशुरस्तम्' इति. चोदाहृत्य (दिक्कालादप्ययगतौ?[9]) इति पठित्वैतदेवोदाहरन् साध्वेव मन्यते । 'इण् गतौ' । अदादिः । 'ईङ् गतौ' । दिवादिः । 'इङ् अध्ययने' ।

---

१. आम्प्रत्ययस्यादन्तत्वममित्त्वाय. २. आदिवद्भावस्य वचनं व्यपदेशिवद्भावेन गतार्थत्वं व्यङ्क्तुम्. ३. इ, ई इति पाठभेदपक्षौ. ४. गडिपर्यन्तान्. ५. 'एकाच उपदेशेऽनुदात्तात्' (७-२-१०) इति सूत्रे काशिकायामनिट्कारिकेयम्. ६. 'भूयसा व्यपदेश' इति न्यायेन. ७. साधीयःपक्षे. ८. 'पनसः कण्टकफल' इत्यमरः. ९. कुण्डलनान्तर्गतं "हिक्कादौ 'अय व्यय गतौ'" इति संस्कृत्य पठनीयं प्रतिभाति । हिक्कप्रभृतिगुह्यपर्यन्तधातुगणो हिक्कादिः । अत एव तेन स्वरितेता 'उदयति' इति प्रयोगस्य सिद्धत्वात् 'कटी' इत्यत्र धात्वन्तरप्रक्षेपमन्यपक्षीयं वदन् क्षीरस्वामी स्वयं न रोचयाञ्चभूव.

'इक् स्मरणे' । अदादी । 'इङ्किावध्युपसर्गं न व्यभिचरतः' इत्याहुः । 'तदधीते तद्वेद' (४-२-५९) 'अधीगर्थदयेशां कर्मणि' (२-३-५२) इति निर्देशश्चैवमेव युज्यते ॥

सिनोति सिनुते बन्धे सिनीते च सिनाति च ।

'षिञ् बन्धने' । स्वादिः क्र्यादिश्च ॥

ईषद्धासे स्मयेतेति स्माययेतेत्यनादरे ॥ १५ ॥

'स्मिङ् ईषद्धसने' । 'स्मिट अनादरे । स्मिङित्येके' इति मैत्रेयरक्षितः । तत्र च स्मिङ्पक्षेऽवयवद्वारा ण्यन्तस्यापि ङित्त्वादात्मनेपदम् । अवयवे हि कृतं लिङ्गं समुदायस्य विशेषकं भवति, तच्चेत् तत्राकृतार्थं; यथा सक्थनि कर्णे वा कृतं गोः । 'अट्ट स्मिट अनादर' इति तु टवर्गान्तकाण्डे शाकटायनः । क्षीरस्वामी त्वाह—" 'स्निट स्नेहने' स्नेटयति । स्मिटेत्येके । 'स्फिट अनादरे' स्फेटयति । संस्फेटस्तुमुलं युद्धम्[1]" इति ॥

श्रीणाति पाके श्रीणीते सेवायां श्रयते श्रयेत् ।

'श्रीञ् पाके' । क्र्यादिः । 'श्रिञ् सेवायाम्' ॥

मीञो मीनाति मीनीते हिंसायां मीयते ङितः ॥ १६ ॥
मिनोति मिनुते स्वादेर्गतौ मयति माययेत् ।

'मीञ् हिंसायाम्' । क्र्यादिः । 'मीङ् हिंसायाम्' । दिवादिः । 'डुमिञ् प्रक्षेपणे' । 'मी गतौ' । युजादिः[2] । मताविति क्षीरस्वामी ।

यौ द्रवीकरणेऽनात्वे लीनयेल्लाययेल्लयेत् ॥ १७ ॥
लापयेल्लालयेदात्वे श्लेषणे लीयतेऽलिनात् ।

---

१. अत एव 'कलिसस्फेटसंयुगा' इत्यमरकोशे संस्फोटपाठस्यायुक्तत्वमाह क्षीरस्वामी तद्व्याख्यायाम् . २. आधृषीय इत्यर्थः.

'ली द्रवीकरणे' इति युजादौ पठितस्य लियो 'विभाषा लीयतेः' (६-१-५१) इत्यात्वाभावपक्षे 'लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने' (७-३-३९) इति नुकि सति लीनयेदिति भवति; असति तु लाययेदिति । णिजभावे तु लयेदिति । आत्वपक्षे पुनर्लुगागमे सति लालयेदिति; तदभावे तु पुकि लापयेदिति । तत्रात्वमयुक्तं[1] 'विभाषा लीयतेः' इत्यत्र 'लिनातिलीयत्योर्यका निर्देश' इति भाष्येण युजादिलिय आत्वाभावात् । देवेन तु मैत्रेयरक्षितविस्रम्भादेतदुक्तम् । 'लीङ् श्लेषणे' । दिवादिः । 'ली श्लेषणे' । क्र्यादिः । 'प्वादीनां ह्रस्वः' (७-३-८०) इति ह्रस्वः ॥

स्रवणे रीयते रीङो रिणाति गतिरेषयोः ॥ १८ ॥

'रीङ् स्रवणे' । दिवादिः । 'री गतिरेषणयोः' । प्वादिः । रेषणं वृकशब्दः । यदाह यादवप्रकाशः—'वृकस्य रेषणं रेषा हेषा ह्रेषा च वाजिनाम् । बृंहितं करिणां शब्दः' इति ॥

व्रीणाति वरणे तत्र व्रीङो व्रीयेत तु श्यनि ।

'व्री वरणे' । क्र्यादिः । यथा[2] पुनः 'प्वादीनां ह्रस्वः' (७-३-८०) इत्यत्र वृत्तिः[3]—"प्वादयः क्र्यादिषु पठ्यन्ते 'पूञ् पवन' इत्यतः प्रभृति 'ष्ठ्री गतौ वृद्' इति यावत् । केचिदिच्छन्ति वृत्करणमेतत् प्वादीनां ल्वादीनां च परिसमाप्त्यर्थमिति ।

---

१. अतो लालयेल्लापयेदिति रूपे युजादिलियोऽप्रामाणिके इत्यर्थः. लीनयेदित्यपि 'लीलो'रित्यत्र लासादृश्यादस्वार्थणिज्विषय एव लीधातुर्गृह्यते, नतु युजादिरित्येतदनाश्रित्य समर्थनीयम्. २. येन प्रकारेण. वृत्तिरित्यनेनास्य सम्बन्धः. अस्य च यथाशब्दस्य 'तथास्यापि' इति वक्ष्यमाणतथाशब्देन प्रतिनिर्देशः. ३. काशिका.

अपरे तु ल्वादीनामेव परिसमाप्त्यर्थं वृत्करणमिच्छन्ति आगणान्ताः प्वादय" इति, तथास्यापि प्वादित्वं पक्षे स्यात् । यथा तु 'ज्ञाजनोर्जा' (७-३-७९) इत्यत्र भाष्यं—"दीर्घोच्चारणं किमर्थम् । 'अतो दीर्घो यञि' (७-३-१०१) इति दीर्घत्वं भविष्यति" इति, तथैतन्नेष्यते । यदि हि वृत्त्युक्तरीत्या क्र्यादिगणान्तात् प्वादयः, तदा जानातेरपि प्वादित्वेन ह्रस्वे प्राप्ते तद्व्यावृत्त्यर्थमेव दीर्घोच्चारणं स्यादिति कैमर्थक्यं न स्यात् । तस्मादावृत्करणादेव प्वादयः । वृत्तिश्च यावदित्यन्तात्रैवाञ्जस्यं धत्ते । वृत्कृतं चैवं वृत्तः समाप्तोऽयं प्वादिल्वादिश्च क्र्याद्यवान्तरगण इत्यर्थकं, 'पूञ् पवने' 'लूञ् छेदने' इत्यदूरपाठादुभयोरपि गणयोरवध्यपेक्षायाश्चाविशेषात् । ल्वाद्यानन्तर्यमतन्त्रम् । अतश्च व्रियो वृत्करणात् परत्वेन प्वादित्वाभावात् व्रीणातीति साधूक्तं देवेन । 'व्रीङ् वृणोत्यर्थे' । स च वरणम् । अन्योऽप्यर्थो यथाप्रयोगं गम्यः ॥

प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥ १९ ॥
अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।

'प्रीङ् प्रीतौ' । प्रीयते । दिवादिः । 'प्रीञ् तर्पणे कान्तौ च' । क्र्यादिः । कान्तिः कामना । 'प्रीञ् तर्पणे' । युजादिः । तत्र अणावित्यादेरेषोऽर्थः—यौ तु तर्पणे ञितः प्रीणयेदित्यादि स्याद्; न च ञित्त्वादेव प्रयत इतिवत् प्रीणयेतेत्यपि स्यात्, अप्यन्ता-

---

१. तेन प्रकारेण पक्षद्वयपरकाशिकारीत्येत्यर्थः. २. आङः प्रश्लेषोऽत्र बोध्यः. ३. एतच्चावश्यकम् अङ्गवृत्तपरिभाषाज्ञापनाय. ४. अत्रैव आवृत्करणात् प्वादित्व एव । 'अन्यथा 'ष्ठी गतौ वृदिति यावद्' इत्ययमंशः 'केचिदिच्छन्ती'त्यादिना वक्ष्यमाणत्वान्न वक्तव्यः स्यात् । उक्तश्चासौ स्वानुमतत्वसूचनार्थ इत्याभिप्रायः. ५. वृत्करणम्.

वस्थायां ञित्त्वाख्यस्य लिङ्गस्य कृतार्थत्वादिति । तत्र चाद्ये रूपे 'णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम्' इति वार्त्तिकेन नुक् । धूञ्प्रीणोरिति तु पाठे क्र्यादेरेवानेन नुग्विधानात् प्राययेदिति पठितव्यम् । आह चात्र हरदत्तः — 'श्नान्तानुकरणाद्दैवादिकस्य न भवति' इति । दैवादिकग्रहणेन चात्र चौरादिकोऽप्युपलक्षयितव्यः । तथा 'धूञ्प्रीणात्योर्नुग्' इति कौमाराः । धातुवृत्तिकाराः पुनर्युजादावपि प्रीणयतीत्युदाहरन्तो धूञ्प्रीञोरित्येव पाठं मन्यन्ते । तन्त्रान्तरीयाश्चैवमेव पठन्ति ॥

विहायसां गतौ डीङो डयते डीयते पदे ॥ २० ॥

'डीङ् विहायसां गतौ' । भ्वादिर्दिवादिश्च । विहायसां विहगानाम् । 'डीङ् आकाशगमन' इति भूवादौ चन्द्रः । तथा भीमसेनोऽप्यत्र विहायसेति पपाठ । धनपालश्चाकाशगताविति व्याकुर्वन्नेवमेव पपाठ । दिवादौ तु 'डीङ् गतौ' इति क्षीरस्वामिधनपालौ तन्त्रान्तरीयाश्च ॥

षुञः सुनोति सुनुते प्रसवैश्वर्ययोरसौत् ।
गतौ तयोश्च सवति द्विरुक्त्या† तस्य सो न षः ॥ २१ ॥

'षुञ्अभिषवे' । स्वादिः । 'षु प्रसवैश्वर्ययोः' । अदादिर्भूवादिश्च । 'ओमिति ब्रह्मा प्रसौति' इत्यादिदर्शनात् प्रसवोऽभ्यनुज्ञा । 'उतो वृद्धिर्लुकि हलि' (७-३-८९) इति वृद्धिः । 'सु, स्नु गतौ' । द्विरुक्त्येति । 'स्नु गतौ' । 'षु प्रसवैश्वर्ययोश्च' इति पाठ्ये सोर्द्विष्पाठाद् गत्यर्थस्य सुसावेत्यादौ षत्वं न भवतीत्यर्थः । भाष्ये

१. अश्रान्तत्वाविशेषादित्यर्थः. २. इदं तैत्तिरीयोपनिषदि ८ अनुवाके । प्रसौति अभ्यनुजानातीत्यर्थः.

†'क्त्यैकस्य' इति खपुस्तके पाठः.

तु नैतदिच्छन्ति । यदि ह्यच्परः सादिरप्यषोपदेशः स्यात्, तदा भाष्योक्तम् 'अज्दन्त्यपराः सादयः षोपदेशा' इति षोपदेशलक्षणमव्यापकं स्यात् । अत एव 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (१-३-८६) इत्यत्र 'दु द्रु गतौ' इति पठित्वापि[1] 'स्रु गतौ' इत्येव न्यासे पठ्यते; न तु 'सु[2] स्रु गतौ' इति । अपरे पुनः 'शु[द्धि?]स्रु गतौ' इति पठन्ति । तथा च 'शु दु द्रु स्रु गतौ' इति शाकटायनः । क्षीरस्वामी तु 'शु श्रु गतौ' इति पठित्वा शवति शृङ्गं प्ररोहः, आश्रृणोति चैत्रायेति चोदाहृत्य 'श्रु श्रवण' इत्यस्य स्थाने 'स्रु गतौ' इत्यपि पपाठ । 'शुसिचिमीनां दीर्घश्च' इति चोणादौ क्रनि शूरशब्दो व्युत्पाद्यते । 'शूरः शवतेर्गतिकर्मणः' इति च नैरुक्ताः । न चान्यः शुर्दृश्यते । उणादिवृत्तौ तु सौत्रोऽयं धातुः ॥

स्थैर्ये ध्रवति गत्यां तु स्थैर्ये च ध्रुवतीति शे ।

'ध्रु स्थैर्ये' । 'शु, दु, द्रु, स्रु गतौ । ध्रु स्थैर्ये च' इति शाकटायनः । 'ध्रु गतिस्थैर्ययोः' ॥

दुनोति दूयते तापे दवतीति गतौ पदम् ॥ २२ ॥

'टुदु उपतापे' । स्वादिः । 'दूङ् परितापे' । दिवादिः । 'दु द्रु गतौ' ॥

अव्यक्तशब्दे कवते कुवते त्वार्तशब्दने ।
कौतीति शब्दमात्रे स्याद्

---

१. द्रुधातुमात्रे प्रदर्शनीये अधिकवचनेन धातुपाठस्थपाठाकारविशेषप्रदर्शनसंरम्भमाविष्कृत्यापीत्यर्थः. २. यद्येष पाठोऽभाविष्यद्, अवश्यमदर्शयिष्यत 'दु द्रु गता'वितिवत्.

'कुङ् शब्दे'। भ्वादिस्तुदादिश्च। अत्रान्त्ये 'गाङ्कुटादि' (१-२-१) सूत्रे हरदत्तः—"आकूतमिति प्रयोगदर्शनात् 'कूङ्शब्द' इति दीर्घान्त" इति। 'अन्ये कूङिति पठन्ति। आकूतमिति प्रयोगदर्शनाद्' इति धनपालः। 'ऊकारान्तोऽप्यङ्गीचक्रे, आकूतम् आकूत्यै इति' इति भूवादि (१-३-१) सूत्रे सुधाकरः। कुङ् कूङिति च शाकटायनः। 'कु शब्दे'। अदादिः। तदेवं यद्यप्येते शब्दमात्रे पठ्यन्ते, तथाप्यर्थविशेषः प्रयोगवशादाश्रीयते। तथा च 'न कवतेर्यङि' (७-४-६३) इत्यत्र न्यासः—'सत्यपि शब्दार्थत्वे भिद्यत एवैषामभिधेयम्। तथा †च कवतिरव्यक्तशब्दे वर्तते। उष्ट्रः कोकूयत इति। कुवतिरार्तस्वरे। कुवते पीडित इति। *कौतीति शब्दमात्र' इति। क्षीरस्वामिमैत्रेयरक्षितौ§ च 'कु शब्द' इत्यत्रैतामेव व्यवस्थामातस्थाते। सर्वत्रैवं प्रयोगविशेषादर्थविशेषोऽप्यनेकार्थवदास्थेयः‡। न पुनः पाठ एव शरणम्॥

रवते रौति शब्दने॥ २३॥

'रुङ् गतिरेषणयोः'। अत्र च रेषणस्य वृकशब्दत्वाच्छब्दन इत्येकं नेतव्यम्। एतच्च गतेरप्युपलक्षणम्। 'रुङ् शब्द' इत्येव तु पाठे सति शक्यमक्लेशेन नेतुम्। यथा त्वत्र

१. अत एतामेव तदनुसारी देव आदद्रे. २. न केवलमर्थभेदः, किन्तु अर्थैक्येऽपि तद्गतविशेषोऽप्यवसातव्यः प्रयोगभेदात्. ३. रेषणपरतया समर्थनीयम्.

†'हि' इति गपुस्तके पाठः. *'कौतिः शब्द' इति गपुस्तके पाठः. §'क्षीरस्वामी मैत्रेयरक्षितश्च' इति घपुस्तके पाठः. ‡'र्थत्ववदास्थेयः' इति गपुस्तके पाठः.

क्षीरस्वामी — "रेषणं हिंसाशब्दः । रवते । अदादौ 'रु शब्दे' रौति" इति, यथा चादादौ "रु शब्दे । रौति । भ्वादौ 'रुङ् गतिरेषणयोः' रवत" इति, तथा चायं पाठो नैवास्तीति गम्यते ॥

यावयेत जुगुप्सायां मिश्रणे यौति बन्धने ।
युनाति च युनीते च

'यु जुगुप्सायाम्' । चितादित्वात् तङ् । यदाह —'आकुस्मादात्मनेपदी' इति । 'चित संचेतन' इत्याद्याः 'कुस्म' इत्यन्ता धातव आत्मनेपदिन इत्यर्थः । "'युज कुत्सायाम्' इत्येके । योजयते" इति क्षीरस्वामी । 'यु मिश्रणे' । अदादिः । 'युञ् बन्धने' । क्र्यादिः ॥

स्तुत्यां नुवाति नौति वा ॥ २४ ॥

'णू स्तवने' तुदादिर्दीर्घान्तः । तथा च 'गाङ्कुटादि' (१-२-१) सूत्रे 'नूत्वा धूत्वा' इति भाष्यम् । 'णु स्तवने' । अदादिः ॥

प्रेरणे सुवाति प्राणिप्रसवे सूयते भवेत् ।
प्राणिगर्भविमोकेऽर्थे सूते शे श्यनि शब्लुकि ॥ २५ ॥

'षू प्रेरणे' । 'षूङ् प्राणिप्रसवे' । अप्राणिप्रसव इत्येके । तथा च क्षीरस्वामी प्रसूनं पुष्पमिति निष्ठानत्वमुदाहृत्याह —'अत एवाप्राणिप्रसव इत्याहुः' इति । न्यासकारस्तु 'स्वरतिसूतिसूयतिधूञूदितो वा' (७-२-४४) इत्यादिषु षूङ्षिषयेषु प्राणीत्येव पपाठ । धातुपाठाश्चैवमेव बहुलमुपलभ्यन्ते । यथा 'प्रसूनं कुसुमं सुमम्' इत्यत्र कविकामधेनुः —"'षूङ् प्राणिप्रसवे' । क्षपणकमतेन† वृक्ष-

†'मते' इत्येव घपुस्तके पाठः.

स्यापि प्राणित्वम् । 'स्वादय ओदित' इति क्तस्य नत्वम्" इति, तथा 'अत एवे'त्युक्तयुक्तिश्च प्रत्युक्ता । तत्र च क्षपणक-ग्रहणं तेषामहिंसायां सूक्ष्मेक्षिकाभिमानात्; न पुनरपरेषामनभि-मतोऽयमर्थ इति । तच्चैतत् प्राणित्वमयुक्तम्, यतो लोक इव व्या-करणेऽपि प्रसिद्धिवशादेव तत्र तत्र प्राण्यप्राणिव्यवस्थास्थीयते । लोके चाप्राणित्वं वृक्षादेः प्रसिद्धम् । तथा च 'ऊङुत' (४-१-६६) इत्यत्र 'अप्राणिजातेश्चारज्ज्वादीनाम्' इति वार्तिकं प्रकृत्यालाबूः कर्कन्धूरित्युदाहरता भाष्यकारेणापि स्थीयते । अत एव मैत्रेयर-क्षितेन 'प्राणिग्रहणमतन्त्रम् । अप्राणिप्रसवेऽपि वर्तते । प्रसूनं धान्यमिति' इत्युक्तम् । 'षूङ् प्राणिगर्भविमोचने' ॥

धूनयति धवति धवते धुनोति धुनुते धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे विधूनने धवति ॥ २६ ॥

'धूञ् कम्पने' । युजादिः प्वादिः स्वादिश्च । तत्राद्ये प्रीञ्वत् त्रैरूप्यम् । क्षीरस्वामी तु 'धावयतीत्येके' इति । मैत्रेयरक्षिताद-यश्च ह्रस्वान्तं चान्त्यमाहुः । तथा च 'घृसृधुवृषिप्रच्छिज्वरित्व-रिभ्यः कित्' इति धुञो धुनिशब्दो भोजदेवेन व्युत्पादयाञ्चक्रे । एभ्यो धातुभ्यः संज्ञायां गम्यमानायां निन् प्रत्ययो भवति । स च किदित्यर्थः । घृणी रश्मिः । सृणिरङ्कुशः । धुनिर्नदी । वृष्णी राजा, यद्वंश्या वृष्णयः । पृश्निरल्पतनुः । 'ग्राहिज्या' (६-१-१६)

---

१. 'अत एवाप्राणिप्रसव इत्याहुः' इति क्षीरस्वाम्युक्तयुक्तिः, चकाराद् 'अ-प्राणिप्रसवे' इति पाठश्च. २. लोकप्रसिद्धिर्नातिलङ्घ्यते इत्यर्थः. ३. प्रीञ्-धातुर्विंशश्लोके विवृतः. ४. एकेषां मते नुग्विधौ 'धूञ्प्रीणोरि'ति पाठात् प्रीणा-तिसाहचर्येण क्र्यादिकस्यैव धूञो ग्रहणं, न तु चौरादिकस्य.

इति सम्प्रसारणम् । 'च्छ्वोः शूडनुनासिके च' (६-४-१९) इति च्छस्य शः । जूर्णिर्वृद्धः । तूर्णिः शीघ्रः । 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (६-४-२०) इत्युपधावकारयोरूठ् । प्रयोगश्च 'न स्नात्वा वासो धुनुयात्' 'ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु गुञ्जन्' इत्यादिर्भूवादि (१-३-१) सूत्रे सुधाकरेण दर्शयाम्बभूवे§ । सर्वथापि—

'धूनयति धवति धवतेऽधुनाद् धुनीते च धूनुतेऽधूनोत् ।
धुनुतेऽधुनोदिति स्युः'

इत्यनेन क्रमेण पठितुं युक्ततरम् । 'धू विधूनने' । तुदादिः ॥

श्नि पुनाति पुनीते स्तां पवने पवते ङितः ।

'पूञ् पवने' । 'पूङ् पवने' ॥

प्रसह्य हृत्यां+ हरणे जहर्त्ति* हरते हरेत् ॥ २७ ॥

'हृ प्रसह्य हरणे'[2] । जुहोत्यादिः । 'हृञ् हरणे' । तत्र चाद्यो घृप्रभृतित्वाच्छान्दसः । स च जिहर्तीति दृश्यते—'अयं स्रुवोऽभिजिहार्ति होमान्' इति । 'भृञामित्' । 'बहुलं छन्दसि' (७-४-७८) इत्यभ्यासस्येत्वम् । घृप्रभृतीनां छान्दसत्वम् 'अर्तिपिपर्त्योश्च' (७-४-७७) इत्यत्र भाष्यतद्व्याख्यानयोर्व्यक्तम् ॥

भृञो बिभर्ति बिभृते भरते भरतीत्यपि ।

---

१. स्वाद्युदाहरणानां विजातीयाव्यवधानं हि स्वादिविषयपक्षभेदप्रतिपत्तौ सौकर्यमादधाति; यथास्थितपाठस्तु प्वादिधातुना व्यवधानान्न तथेति तात्पर्यम्. २. 'करणे' इत्येव माधववृत्त्यादिषु दृश्यते.

---

§'यामासे' इति गपुस्तके पाठः. +'कृत्याम्' इति गपुस्तके पाठः. *'जिहर्ति' इति कपुस्तके पाठः.

ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः ॥ २८ ॥

'डुभृञ् धारणपोषणयोः' । जुहोत्यादिः । टुभृञित्येके । तथा च भृत्रिममित्युक्त्वा 'भरथुरिति केचिदि'ति मैत्रेयरक्षितः । क्षीरस्वामी तु 'टुभृञिति द्रमिडाः । भरथुः' इति । सुधाकरः पुनरथुञ्विधौ टुभृञित्युक्त्वाह – डुभृञं द्रमिडाः पठन्ति । तेन भृत्रिमं भरथुरिति द्वयमिच्छति नन्दी' इति । टुडुभृञित्यनुबन्धद्वयमपि शाकटायनः । तन्मते हि 'अप्रयोगीद्' इतीत्त्वम् । अत्रामोघा– 'इह शास्त्रे उपदिश्यमानो वर्णः समुदायो वा यो लौकिके शब्दप्रयोगे न दृश्यते, स इत्संज्ञो भवति । अत एव चास्य प्रयोगाभावः सिद्धः । उपदेशस्तु कार्यार्थ' इति । तत्र च भरणेन निर्वृत्तं भृत्रिममिति । 'द्वितः क्रिः' (३-३-८८) इति क्रिः । 'क्रेर्मन् नित्यम्' इति मप् । भरणं भरथुः । 'द्वितोऽथुच्' (३-३-८९) इत्यथुच् । 'भृञ् भरणे' । 'वृ वरणे । भृ भर्त्सने च' । प्वादिः । "'वृ भृ भरणे' । 'भृ भर्जने च' भर्जनं पाक" इति क्षीरस्वामी । स चात्र भर्जनाख्यः पाकभेद एव प्रसिद्धो बोद्धव्यः । 'ऋजि, भृजी भर्जने' इत्यत्र च स एवाह – 'भर्जनं पाकप्रकार' इति । भरणपाठे च भरस्य भारपर्यायत्वौचित्यं* व्यक्तम् । स च ऋदन्तपाठफलम् । 'ऋदोरप्' (३-३-५७) इत्यप् ।

ध्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः ।
धरते धारणेऽर्थे तु धरते धरतीत्युभे ॥ २९ ॥

---

१. 'भृ भरणे' इति क्षीरस्वामिपाठे. २. भरश्च भरशब्दश्चेति यावत्.

---

*'यत्वादौचित्यम्' इति घपुस्तके पाठः.

'धृङ्वस्थाने' । तुदादिः । 'रिङ्शयग्लिङ्क्षु' (७-४-२८) इति रिङ् । इयङादेशः । 'धृङ्वध्वंसने' । अविध्वंसन इति क्षीरस्वामी । अपरेऽप्येवं बहवः । 'धृञ् धारणे' । 'धृ धारणे' इत्यपि चुरादौ क्षीरस्वामी । तत्र धारयति धारयते । 'चुरादेराकृतिगणत्वाद् धारयती'ति हेमचन्द्रः । न्यासे तु 'धारेरुत्तमर्ण' (१-४-३५) इत्यादिषु ध्रियतेर्हेतुमण्णिच्येव धारिर्व्युत्पाद्यते । 'षिद्भिदादिभ्योऽङ्' (३-३-१०४) इत्यत्र 'धारा प्रपातन इति वक्तव्यम् । धृतिरन्या' इति भाष्यम् । तत्र च धृतिरन्येति ब्रुवता 'ऋदृशोऽङि गुणः' (७-४-१६) इति गुणे कृते दीर्घत्वनिपातनेन धरतेरेव धारेत्यभिप्रेयते, न पुनः समानार्थत्वेऽपि धारयतेः । यदि च सोऽपि चुरादिष्वपठिष्यत, धारणान्येत्येवावक्ष्यत[1]; कृतं निपातनक्लेशेन ॥

गतौ ससर्ति सरति श्लुशपोर्धावति केचित्[2] ।

'ऋ सृ गतौ' घृप्रभृतित्वाच्छान्दसोऽन्त्यः[3] । स च सिसर्तीति दृश्यते । 'प्र बाहवा पृथुपाणिः सिसर्ति' इति । 'सृ गतौ' । 'सर्तेर्धावादेशो वेगितायां गतौ' इति वार्त्तिकेन सञ्जातवेगायां गतौ शपि धौभावः । क्षीरस्वामी तु चुरादौ 'धृ स्रावण' इति पठित्वा "'धृ सृ आवरणे' इति पूर्वे पेठुः । 'धर स्रावणे' इति दुर्ग" इति । सरतिसिसर्त्योश्च स एवाह — चुरादौ सारयति' इति ॥

---

१. तथा ब्रुवता धारयतेरेव धारेत्यभिप्रैष्यतेत्यर्थः. एवं तु वृद्ध्यैव णिनिमित्तया दीर्घत्वस्य सम्पत्तेर्निपातक्लेशोऽपि परिहृतो भवतीत्याह—कृतमिति. २. विशेषे. स च वेगिता गतिः. ३. आद्यस्तु समनन्तरं व्याख्यास्यते.

तत्रेयर्त्यृच्छतीत्यर्त्तेः श्नि गतौ स्यादृणाति *तु ॥ ३० ॥

तत्रेति पूर्वोक्त एव विषय इत्यर्थः । तेन गतौ श्लुशपोः अर्त्तेः 'ऋ सृ गतौ' 'ऋ गतिप्रापणयोरि'त्यनयोरियार्त्ति ऋच्छतीति भवतीति वाक्यार्थः । तत्र चाद्ये शप्श्लुद्विर्वचनोरदत्वहलादिशेषेषु कृतेषु 'आर्त्तिपिपर्त्योश्च' (७-४-७७) इत्यभ्यासस्येत्वम् । 'अभ्यासस्यासवर्णे' (६-४-७८) इतीयङादेशः । ततो गुणः । अस्य चार्त्तेर्घृप्रभृतित्वेऽपि भाषायामपि प्रयोग इष्यते । तच्च 'बहुलं छन्दसि' (७-४-७८) इत्येवेत्त्वे सिद्धे अर्त्तेः पृथगित्वविधानसामर्थ्यादवसीयत इति 'आर्त्तिपिपर्त्योश्च' (७-४-७७) इत्यत्र भाष्ये स्थितम् । अन्ये 'पाघ्राध्मा' (६-३-७८) इति ऋच्छादेशः । 'ऋ गतौ' । ल्वादिः ॥

हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः ।
करोति कुरुते द्वे द्वे सम्पद्येते§ पदे क्रमात् ॥ ३१ ॥

'कृञ् हिंसायाम्' । 'डुकृञ् करणे' । तथा 'कृञ् करणे' इति भूवादौ क्षीरस्वामी । करोति कृणोति करतीति वा कारुरिति च कस्यांचिदुणादिवृत्तौ दृश्यते । न्यासकारस्तु 'कः करत्करतिकृधिकृतेष्वनदितेः' (८-३-५०) इत्यत्र करतौ व्यत्ययेन[1] शपं ब्रुवन्नैतमनुमन्यते[2] ॥

भक्तौ वृणीते वरणे वृणोति वृणुते वृञः ।
वृञ आवरणे वा णौ वारयेद् वरते वरेत् ॥ ३२ ॥

'वृङ् सम्भक्तौ' । क्र्यादिः । 'वृञ् वरणे' । स्वादिः । 'वृञ्

---

१. 'व्यत्ययो बहुलम्' (३-१-८५) इति विकरणव्यत्यासेन. २. भूवादिम्.

*'च' इति कपुस्तके पाठः. §'म्बध्येते' इति खगपुस्तकयोः पाठः.

आवरणे' । अत्र क्षीरस्वामी—"आवारयति आवरति आवरते । स्वादौ वृणुते वृणोति । क्र्यादौ वृणीते । तुदादौ' वृङ् सम्भक्तौ' व्रियते" इति ॥

ज्ञाने गारयते गिरेन्निगरणे शब्दे गृणाति त्रयं
युक्तं ग्रो गरतीति सेकविषये ह्रस्वान्तधातोः शापि ।
सेके प्रस्रवणे क्रमाच्छपि णिचि स्यातां घरेद् घारयेद्
यद्दीप्तौ क्षरणे जिघर्ति तदिदं केचिद्विदुश्छान्दसम् ॥

'गॄ विज्ञाने' । चितादिः । कॄ इति चन्द्रः । 'गॄ निगरणे' । तुदादिः । निपूर्वताप्राचुर्योपदर्शनार्थो निः । 'अचि विभाषा' (८-२-२१) इति लत्वविकल्पाद् गालयते गिलेदित्यपि द्रष्टव्यम् । 'गॄ शब्दे' । ल्वादिः । एवं त्रिष्पठितस्य गॄ इत्येतस्यैतत्त्रैरूप्यं युक्तम् । अन्त्ययोरेव धात्वोः प्रसिद्धत्वाद्रूपद्वयमेवेति मन्दैर्मा शङ्कीत्याशयः । 'गृ, घृ सेचने' । यथा तु 'तृज्वत्क्रोष्टुः' (७-१-९५)इत्यत्र भाष्यम —'[1]अविशेषविहिताः शब्दा नियतविषया दृश्यन्ते । घरतिरस्मायविशेषेणोपदिष्टः । स घृतं घृणा घर्म इ[2]त्येवंविषय' इति, तथा घरेदिति नेष्[3]यते । देवस्तु मैत्रेयरक्षितेनैकीयमतत्वेन घरतीत्युदाहृतमुपलभ्यैतदभ्यधात् । 'घृ प्रस्रवणे' । 'घृ स्रावण' इति क्षीरस्वामी । 'घृ क्षरणदीप्त्योः' । जुहोत्यादिः । अत्र मैत्रेयरक्षितः—

---

१. अनुपसन्दानबोधितशक्तिका अपि शब्दा उपसन्दानोपजीविसामर्थ्याः प्रयोगतोऽवसीयन्ते इत्यर्थः. २. घरतिर्हि सेचने सामान्यतः पठितोऽपि क्तनग्मन्प्रत्ययोपसन्दानेनैव सर्पिर्दयोष्मार्थोपसन्दानेनैव वा स्वार्थबोधक इत्यर्थः. ३. पद्धत्यादावौपसन्दानिकशक्तियोगिनो गत्यर्थहन्तेरिव घरतेरपि तिङ्विषयत्वाभावादिति भावः.

"'जन जनने' जजन्ति । 'गा स्तुतौ' । जिगाति । 'छन्दसि' इति च्छान्दसावेतौ । घृप्रभृतयोऽपि [1]च्छान्दसा इति केचिद्" इति । (गा स्तुतौ ?) तत्स्थ एवात्र ग्राह्यः केचिच्छब्दो [2]भाष्यानुसारिण इत्येवं व्याख्येयः । तत्रापि जिघर्तीति च्छन्दसि दृश्यते । 'वरिष्ठं वज्रमाजिघर्ति मायनी' इति ॥

प्रीतौ पृणोत्यृदन्तस्य व्यायामे प्रियते पृङः ।

'पृ प्रीतौ' । स्वादिः । 'पृङ् व्यायामे' । तुदादिः । व्याप्रियते ॥

मृणाति हिंसार्थे प्वादेर्मृङस्तु म्रियते पदम् ॥ ३४ ॥

'कॄ हिंसायाम्' । 'मॄ इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामी तु 'मॄ हिंसायाम्' इत्यपि पृथक् पपाठ । किन्तु बॄ इति पवर्गतृतीयोपधतया मैत्रेयरक्षितपठितस्य स्थाने मॄ इति । 'मृङ् प्राणत्यागे' । तुदादिः ॥

स्तॄञः श्नि च्छादने प्वादेः स्तृणीते च स्तृणाति च ।
श्नावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः ॥ ३५ ॥

'स्तॄञ् छादने' । 'स्तृञ् छादने' ॥

दरेद् दृणाति द्रियते क्रमाद् भीदारणादरे ।

'दॄ भये' । घटादिः । अत्र मैत्रेयरक्षितः—"'दॄ विदारणे' । क्र्यादिः । तस्य मित्त्वार्थः पाठः । धात्वन्तराभ्युपगमे दरतीत्येक" इति । धनपालहरियोगिपूर्णचन्द्रास्तु दरतीत्येवाहुः§ । क्षीर-

१. घृप्रभृतिगणान्ते पठितस्य छन्दसीत्यस्य तद्गणीयेषु सर्वेषु सम्बन्धौचित्यादिति भावः. २. भाष्यं च 'अर्तिपिपर्त्योश्च' (७-४-७७) इति सूत्रस्थम्. ३. समाहारद्वन्द्वनिर्देशोऽयम्.

§'वमाहुः' इति घपुस्तके पाठः.

स्वामी त्वाह—"'दॄ भये' । दरति । क्र्यादौ 'दॄ विदारणे' । तस्यैव मित्त्वार्थ इह पाठ इत्येके । दिवादौ दीर्यत इति पञ्चिका । कर्मकर्तरि दीर्यत इत्येक" इति । धनपालशाकटायनौ तु क्र्यादौ च 'दॄ भये' इत्येवाहतुः । 'दृङ् आदरे' । तुदादिः । आद्रियते ॥

पॄणाति पूरणे श्लौ तु पिपर्त्ति णिचि पारयेत् ॥ ३६ ॥

'पॄ पालनपूरणयोः' । प्वादिः । श्लौ त्वयं ह्रस्वान्तः[1] । तथा च 'तं रोदसी पिपृतं सत्यवाचम्' इति श्रूयते । मैत्रेयरक्षितस्तु ह्रस्वान्तं पठित्वा 'दीर्घान्तोऽयमित्येके' इत्याह । तत्फलभेदश्च† पिपृतः पिप्रति पिपूर्त्तः पिपुरतीति । तत्र च 'उदोष्ठ्यपूर्वस्य' (७-२-१०२) इत्युत्वं रपरत्वं च । 'हलि च' (८-२-७७) इति दीर्घः । क्षीरस्वामी तु—दीर्घान्तं पठित्वा 'ह्रस्वान्तोऽयमिति नन्दी' इति । 'पॄ पूरणे' । अत्र च स एवाह —'पॄ इति दुर्गः । पारयति परति' इति । एतच्च चुरादिणिचोऽनित्यत्वाश्रयेण[2] ॥

वॄवॄञोरञितो धातोर्वृणाति वरणे भवेत् ।
वृणाति च वृणीते च वॄञस्तत्रार्थ इष्यते ॥ ३७ ॥

'वॄ वरणे' । 'वॄञ् वरणे' । प्वादिः । वॄवॄञोरिति निर्धारणे षष्ठी । तत्र चाद्यं पवर्गतृतीयादिं बहवः पठन्ति । 'बॄ भरण' इति क्षीरस्वामिशाकटायनौ ॥

सिद्धे पदद्वये वॄञो ञित्त्वाद् यदञितो वचः ।
फले तत् कर्त्राभिप्राये परस्मैपदसिद्धये ॥ ३८ ॥

---

१. अस्यार्थस्तु दीर्घान्तस्येवेत्यर्थः. २. न तु युजादित्वेन.

---

†'दं च' इति गपुस्तके पाठः.

वृञो ञित्त्वाद्वृणाति वृणीते इति सिद्धे वृ इत्यञित्पाठः कर्त्रभिप्राये क्रियाफले परस्मैपदार्थः ॥

जृणाति जीर्यति जरत्येकार्थे जारयत्यपि ।

'जॄ वयोहानौ' । सा च यौवनादेस्त्यागः । प्वादिर्युजादिश्चायम् । तत्राद्ये 'धॄ इत्येक' इति मैत्रेयरक्षितः । अन्त्ये तु क्षीरस्वामी—'जारयति जरति । दिवादौ जीर्यति । क्र्यादौ जृणाति । ज्रीति च नन्दी । ज्रायति ज्रयति । क्र्यादौ जृणाति' इति । 'जॄ ञॄष् वयोहानौ' । दिवादिः । अस्य तु हेतुमण्णिचि । 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाज्जरयतीति द्रष्टव्यम् । 'जनी प्रादुर्भावे' 'क्नसु ह्वरणदीप्त्योः' 'रञ्ज रागे' इत्येते जीर्यतिश्चाम्रूपान्ताश्च धातवो मितो भवन्तीत्यर्थः ॥

कृणन् कृणीते हिंसायां विक्षेपे किरतीति शे ॥ ३९ ॥

'कॄञ् हिंसायाम्' । प्वादिः । 'कृञित्येके' इति क्षीरस्वामी । तिङ्प्रकरणेऽपि शत्रन्तोदाहरणं वृत्तानुरोधात् । 'कृणाति च कृणीते च हिंसायां किरतीति शे' इत्यनुक्तिः 'परस्मैपदाद्येवात्र विवक्षितमि'ति प्रागुक्तमर्थं बालानां व्यङ्क्तुमिति गमयितव्यम् । एवं 'बॅभ्रन् बीभत्सते बन्ध' इत्यत्रापि बन्धे बीभत्सनेऽबभ्रादित्यनुक्तिर्नेतव्या । 'तॄ कॄ हिंसायाम्' इत्यपि प्वादावेव क्षीरस्वामिमैत्रेयरक्षितौ । तत्फलं तु वॄवद् द्रष्टव्यम् । 'कॄ विक्षेपे' । किरतीति ॥

तृसौ चकेत् प्रतीघाते तृसौ च चकते शपि ।

---

१. भूधातुव्याख्यानावसरोक्तम्. २. इदं १२०तमश्लोके. ३. कर्त्रभिप्राये क्रियाफले परस्मैपदसिद्धिरूपं फलं वृधातोरुक्तम् अष्टात्रिंशे पद्ये.

'चक तृप्तौ' । घटादिः । 'चकृ तृप्तौ प्रतीघाते च' । क्वचित् पुनः पठ्यते—

प्रतीघाते च तृप्तौ च चकते चकतीति तु ।
तृप्तिमात्रे चकेरस्य मित्त्वाच्चकयतीति णौ ॥

इति । तयोश्च पाठयोस्तृप्ताविति तृप्तिमात्र इति च घटादिपाठपरम्[1] । शेषं च प्रदेशान्तरपाठपरम्[2] । ततश्च यद् घटादौ च[3] शाकटायनेनोभयार्थत्वमुक्तं, यच्च क्षीरस्वामिना घटादावुभयार्थत्वमन्यत्र तृप्त्यर्थत्वं, तदपि संगृहीतं भवति । धनपालः पुनरात्मनेपदिनं 'चक तृप्ताविति'त्येव पठित्वा तस्यैव 'चक तृप्तौ प्रतीघाते च' इति घटादौ 'घटादयो मित' इति मित्संज्ञार्थं पाठं मन्यमानस्तत्राप्यात्मनेपदमेवोदाजहार[4] ॥

दर्शने लोकते लोकेर्भाषार्थे णौ तु लोकयेत् ॥ ४० ॥

'लोकृ दर्शने' । लोकृ भाषार्थः* । अस्माच्च सकर्मकादेव णिच् स्यात् । यदाह—'आस्वादः सकर्मकाद्' इति । अत्र मैत्रेयरक्षितः—"'स्वाद आस्वादने' आ एतस्मात् स्वादः सम्भवि-

---

१. घटादिपाठतात्पर्यकम्. एवञ्च योऽन्यैस्तृप्तावेव केवलायां धातुः पठितः, तस्यार्थाद् घटादेः 'चकेद्' इति भवति कस्मिन्नर्थे तृप्तौ प्रतीघाते चेति 'तृप्तौ चकेद्' इत्यस्यार्थो वक्ष्यमाणशाकटायनानुरोधी बोध्यः. तथा 'चकतीति तु तृप्तिमात्रे' इत्यस्यापि. २. भ्वादिपाठतात्पर्यकम्. एवञ्च योऽन्यैस्तृप्तिप्रतीघातयोर्धातुः पठितः, तस्यार्थाद् भ्वादेः 'चकते' इति भवति कस्मिन्नर्थे तृप्तावेव केवलायामिति 'प्रतीघाते तृप्तौ च चकते' इत्यस्यार्थो वक्ष्यमाणक्षीरस्वाम्यनुरोधी द्रष्टव्यः. तथा 'प्रतीघाते च तृप्तौ च चकते' इत्यस्यापि. ३. चादन्यत्र. ४ परस्मैपदप्रकरणानुवादसामर्थ्यमनादृत्येति शेषः.

---

*'र्थे' इति गपुस्तके पाठः.

कर्मकादेव णिज् भवतीति मन्तव्यम् । असम्भविकर्मकत्वे व्यावृत्तिः । आङः स्वाद एव सकर्मकादित्येके" । इति । तत्र च सम्भविकर्मकत्वकथनेन सत्यसति वा कर्मणः प्रयोगे तत्सम्भवमात्रेण णिज् भवतीत्युक्तं भवति । *कर्मासम्भवः पुनरनेकार्थत्वेनार्थान्तरवाचितायां यथाप्रयोगं द्रष्टव्यः । क्षीरस्वामीत्वाह—'आङ्पूर्वात् स्वादतेः सकर्मकाण्णिज् भवति । अस्ति कर्म यस्य स सकर्मकः[1] । आस्वादधातुर्णिचमुत्पादयति । 'पय आस्वादयति' इति । धनपालश्च 'आस्वादयति क्षीरम्' इत्युदाहरन्नेत्रैवानुकूलः[2] । तत्र चाभिविधिपक्ष एव युक्तः प्रत्यवभासते, इहाप्याङः पूर्वापरेष्विवाभिविध्यर्थताया एवौचित्यात् । 'आ कुस्मादि'ति हि पूर्वत्राभिविधावाङ् दृष्टः । 'आधृषाद्वे'ति 'आगर्वादि'ति च समनन्तरमेवैवं द्रक्ष्यते । तत्रायमपि तन्मध्यपाती तच्छायश्चाङ् तदर्थ एव व्यक्तमवभासते । तदत्र[3] पक्षान्तरं व्याचक्षाणानामाशयश्चिन्त्यः । अन्ये तु 'आस्वदः सकर्मकाद्' इत्याहुः । 'ग्रस ग्रहण' इत्यारभ्य 'ष्वद आस्वादन' इत्येवमन्ताः[4] ‡ये धातवः पठ्यन्ते, तथा च 'पूरी आप्यायने ष्वदास्वाद' इति श्लोकधातुपाठः, संवरण इति तु क्षीरस्वामिधनपालशाकटायनाः, 'ष्वद आस्वादन' इत्यत्र[5] च क्षीरस्वामी — 'स्वदते', चुरादौ 'स्वद संवरणे स्वादयति' इति, तेभ्य एतेभ्यः सम्भविकर्मकेभ्य एव णिज् भवतीत्यर्थः । एतच्च

१. सकर्मकः प्रयुज्यमानकर्मक इत्यर्थः. तेनाप्रयुज्यमानकर्मको व्यावर्त्यते. २. क्षीरस्वामिपक्षे एव. ३. आङ्विषये. ४. 'ये' इत्यस्य 'तेभ्य एतेभ्य' इति वक्ष्यमाणेनान्वयः. ५. स्वदधातोर्ह्रस्वोपधत्वे प्रमाणमर्थविषयकपक्षभेदानुग्राहि दर्शयति—तथाचेत्यादि. ६. भ्वादौ.

‡'न्ता धा' इति घपुस्तके पाठः. *'कर्मसम्भवः' इति गपुस्तके पाठः.

सकर्मकत्वमन्येष्वपि भाषार्थेषून्नेयम् । अत्र चोत्तरत्र च भाषार्थग्रहणे 'भासार्थ इत्येक' इत्यपि द्रष्टव्यम् । तथा च 'पटपुटे'त्यादौ 'वृतु वृधु भाषार्था' इत्यन्ते दण्डकधातुपाठे मैत्रेयरक्षितः—'भासार्था दीप्त्यर्था इत्येक' इति । क्षीरस्वामी च—'भासा दीप्तिरर्थो येषां ते भासार्थाः' इति । 'भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः । स्त्रीवेषधारी पुरुष' इत्यत्र कविकामधेनुकारश्च दण्डकधातुमेवाश्रित्याह—'कुंसिर्भासार्थः । स्त्रीरूपधारित्वाद् भ्रुवा कुंसयति पुरुषत्वमिति भ्रुकुंसः' । इति । तत्र* भासार्थपक्षे सकर्मकत्वे यत्नः कर्तव्यः । धनपालः पुनरन्यथैवामुं दण्डकं व्याचष्टे—'एते पटादयः सर्वे णिचमुत्पादयन्ति । अन्ये च ये भासार्था धातवः, ते च णिचमुत्पादयन्ति' इति । अत्र चाञ्जसैवानाञ्जस्ये सत्यव्या(सिप्र?)प्त्यपनीत्याशैव शरणम् ॥

अङ्क लक्षण इत्यस्य भवेदङ्कयतीति णौ ।
इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत् ॥ ४१ ॥

'अकि लक्षणे' । तत्रेति लक्षणे । 'अक अग कुटिलायां गतौ' ॥

णिचि बुक्कयतीति स्याद् भाषणे शपि बुक्कति ।

'बुक्क भाषणे' । 'बुक्कनं श्ववृकध्वान' इति तु यादवप्रकाशः । 'बुक्क आभाषण' इति शाकटायनः । अन्ये तु क्षीर-

१. स च भासधातौ णिजर्थान्तर्भावना. २. धनपालव्याख्याने. ३. पूर्वापरधातुष्वास्थितस्यार्थनिर्देशस्य पटादिषु परं त्यागानौचित्याद् धनपालव्याख्यानस्यायुक्तत्वे सतीत्यर्थः. ४. 'बुक्कनं श्ववृकध्वाने भषणं भषितं शुनः' इति अन्तरिक्षकाण्डे शब्दाध्यायः.

*'तत्र तु' इति गपुस्तके पाठः.

स्वामी—'भषण इत्येके । बुक्कति श्वा' इति । मैत्रेयरक्षितस्तैवमे-वोदाहार्षीत् ॥

मर्षणे शीकयेच्छीकेत् सेचने शपि शीकते ॥ ४२ ॥

'शीक आमर्षणे' । युजादिः । 'शीकृ सेचने' । अनुदात्तेत् । एतच्च शीकतीति मन्दैर्मा पाठीत्येवमर्थमुच्यते । अनुपात्ते त्वात्मनेपदचिह्ने* परस्मैपदपाठ एव अन्यथापि वृत्ताविरोधिपाठसम्भवेऽपि शुद्धो बोद्धव्यो यथा बुक्कतीत्यादौ । 'सीकृ इत्यार्या' इत्यपि धनपालः । तत्र चाद्यः पक्षः शीकर इति प्रयोगानुगुणः । योऽपि षोपदेशलक्षणे सीकृपाठ उक्तः, सोऽप्येवं प्रत्युक्तः । शीकृ गत्यर्थ इत्यप्येके । तत्स्थाने षेकृ इत्यन्ये । यदाह क्षीरस्वामी—'शीकृ, सेकृ, स्रेकृ, स्रकि, शकि, श्लकि गत्यर्थाः । शीकेरर्थभेदात् पुनः पाठः । अत एव चन्द्रो नैनमध्यैष्ट । अन्ये षेकृ इति विकल्पेन षोपदेशकार्यार्थं पेठुः' इति ॥

शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे ।
शक्यते शक्यतीत्येवं शपि श्नौ श्यनि च क्रमात् ॥ ४३ ॥

'शकॢ शक्तौ' । 'शक विभाषितो मर्षणे' । विभाषित

---

१. वचनातिरेकेणात्मनेपदावसायेऽभ्युपायाभावादिति शेषः । अत एवैवजातीयके स्थले सर्वत्र 'गत्यां तु लङ्घते' (४५श्लो.) 'पृक्ते संपर्के' (५१श्लो.) इत्यादौ 'अनुदात्तेद्' इति वक्ष्यते । 'तृप्तौ च चकते शपि', 'दर्शने लोकते लोकेः' (४० श्लो.), 'इदितस्त्वङ्कते तत्र' (४१ श्लो.), 'शङ्कते शकि शङ्कायाम्' इत्यत्र तु परस्मैपदपाठे वृत्ताविरोधसम्भवादभ्युपायादात्मनेपदं शक्यावसायमिति 'अनुदात्तेद्' इत्यात्मनेपदचिह्नं न कथितं; न च तज्जातीये स्थले वक्ष्यते 'सेचने सचते'(४६श्लो.) इत्यादौ. २. शीकरानुगुण्येन तालव्यादित्वावधारणे.

---

*'पदभेदे' इति गपुस्तके पाठः.

इत्युभयपदी । रूढं चैतत् तन्त्रान्तरेष्वपि । क्षीरस्वामीत्वाह— 'सहनेऽर्थे शकिधातुर्विभाषितो विकल्पितः, पक्षे दिवादिः, पक्षे स्वादिरित्यर्थः । शक्यति शक्नोतीति । शाकटायनश्चामुमेव विभाषितार्थम्, अस्य चोभयत्र पाठमात्रादेव सिद्धत्वाद्वैयर्थ्यं नूनं मत्वा 'शक मर्षण' इत्येव पपाठ; न पुनः 'शकी' इति । ईदित्वं ह्युभयपदित्वचिह्नं तन्मते । तच्चैतदुभयमपि बहुसम्मते यथोक्तेऽर्थे सम्भवत्ययुक्तमेव ॥

तकेत् तङ्केद्यथासङ्ख्यं हसने कृच्छ्रजीवने ॥ ४३½ ॥

'सहने' इत्यपरः पाठः । 'तक सहने' । क्षीरस्वामी पुनः सहन इत्युक्त्वा 'हसन इति दुर्ग' इति । यत्तु श्लोकधातुपाठे 'फक्क नीचैर्गतौ तक्क मर्षणे बुक्क भाषणे' । इति द्विककारस्ताकिः पठ्यते, तद् 'अचो यद्' (३-१-९७) इत्यत्रत्येन 'ताकिशासियतिजनीनामुपसङ्ख्यानम्' इति भाष्येण विरुध्यते । 'तकि कृच्छ्रजीवने' ॥

अन्वेषणेऽर्थे मृगयेत णौ यौ
मार्गेर्भवेन्मार्गाति मार्गयेच्च ॥

'मृग अन्वेषणे' । कथादित्वाददन्तः । ततश्चातो लोपस्य

---

१. क्षीरस्वाम्युक्तमुभयगणीयत्वमेव. २. इदं च वैयर्थ्यमिति च मत्वेत्यस्य कर्म. ३. दिवादौ स्वादौ च. ४. यथोक्ताविभाषितपदोपादानरहितात् पाठादेव. ५. यत् सूत्रयति शाकटायनः—'ञीदिदपवदानुपसर्गज्ञः' (१-४-६५) इति । ञित ईदितोऽपवदादेश्च कर्तरि फलेशे लस्य तङ् भवतीति च तस्यार्थः. ६. द्विककार एव ताकिधातौ सति ततो यति प्यति वा वृद्ध्यभावस्य तुल्यतया यत्प्रत्ययोपसंख्यानं व्यर्थं स्यादिति तत्साफल्यायैकककार एव धातौ भाष्यसम्मत्यवधारणादिति भावः.

'अचः परस्मिन् पूर्वविधौ' (१-१-५७) इति स्थानिवद्भावाल्लघूपध-गुणाभावः। पदादित्वात् तङ्। यदाह—'आगर्वादात्मनेपदी' इति। 'पद गतौ' इत्याद्या 'गर्व माने' इत्यन्ता ये धातवः कथादिषु पठ्यन्ते, त आत्मनेपदिन इत्यर्थः। अत्र मैत्रेयरक्षितः—'मृग्यतीति कण्ड्वादिपाठात् केचिन्मन्यन्ते'। इति। मार्ग अन्वेषणे॥

लिङ्गेर्गतौ लिङ्गति लिङ्गयेदि-
त्यस्यैव चित्रीकरणार्थवृत्तेः॥ ४४½॥

लिङ्गिर्गत्यर्थः। लिगि चित्रीकरणे॥

भाषणे लङ्घयेच्छोषे लङ्घेद् गत्यां तु लङ्घते॥४५॥

लघिर्भाषार्थः। 'लघि शोषणे'। लघिर्गत्यर्थः। अनुदात्तेत्। लघि भोजननिवृत्तौ चेत्येके। तथा च क्षीरस्वामी—"लघिर्भोजननिवृत्तौ च गत्यर्थश्च। 'नवज्वरे लङ्घनीयः'" इति॥

सेचने सचते तच्च समवाये सचत्यपि।

'षच सेचने'। सेचने तु सचिरुक्तो निरुक्ते—'सिषक्तु, सचत इति सेवमानस्य' इति। अस्यैतौ वाचकावित्यर्थः। षच समवाये। तच्चेति सचते च। क्वचित्तु पठ्यते—

सेचने समवाये च सचते सचति क्रमात्।

इति। तथा च 'अकथितं च'(१-४-५१)इत्यत्र हरदत्तः—केचित्तु परस्मैपदिभिः सह धातुमेनं पठन्ति। षच समवाये।

---

१. दिवादेराकृतिगणत्वात् क्षीयते मृग्यतीत्यादि सिद्धिरित्याहुरिति भट्टोजिदीक्षिताः. २. 'सिषक्तु सचत इत्येते नामनी सेवमानस्य' इति आचार्यभगवद्दुर्ग इदं व्याचष्टे.

रप लप व्यक्तायां वाचि' इति । तदेतत् 'ब्रुविशासिगुणेन च यत् सचत' इति भाष्यौचित्यादयुक्तम् । सचत इति सम्बध्यत इत्यर्थः, समवैतीति यावत् । एवं च 'षच सेचन इत्यस्यानुदात्तेतोऽनेकार्थत्वात् समवाये वृत्तिः' इति हरदत्तोक्तं[1] प्रौढिवादमात्रम् । न्यासे च सचत इत्यस्य 'षच समवाये' इत्येव धातुरुक्तः[2] । एवञ्च परस्मैपदिषु 'षप समवाय' इति पान्तस्यैव पाठः । पान्तकाण्डं चैवमनुसृतं भवति । एवमेव च मैत्रेयरक्षितः शाकटायनश्च । क्षीरस्वामी तु सप्त[3] सप्तिरिति चोदाहृत्य 'सचेति चन्द्रः । सचति सचिव' इत्याह ॥

णौ लोचयति भाषार्थे दर्शने शपि लोचते ॥ ४६ ॥

लोचृ भाषार्थः । 'लोचृ दर्शने' । अनुदात्तेत् ॥

कल्कने मुञ्चते मुञ्चेर्मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न त्वृदित् ॥ ४७ ॥

'मच मुचि कल्कने' । 'कल्कनं दम्भः शाठ्यं च' इति मैत्रेयरक्षितः । कल्कनं दम्भः §कथनं च । मच मुचेति च चन्द्रः । मोचते । 'मुञ्चते' इति क्षीरस्वामी । मच मचीत्येके । तथा च 'मचि कल्कने' 'मचुङ् धारणोच्छ्रायपूजनेषु'* इति शाकटायनः[4] । तेन ह्यनुदा-

---

१. समवाये पठितस्य परस्मैपदित्वपक्षे समवायार्थे 'सचत, इति भाष्यप्रयोगस्योपपत्तये हरदत्तेन कथितम्. २. न पुनरात्मनेपदसिद्धये 'षच सेचने' इति धातुरुक्तः । तथा च षचधातुः समवायार्थकस्तङ्योग्य एवाभिमतो न्यासस्येत्युन्नीयते. ३. 'सप्यशूभ्यां तुद् च' इति सपेः कनिन्प्रत्यये तुडागमे च सप्तन् शब्दः 'क्तिच्क्तौ च संज्ञायाम्' (३-३-१७८) इति सपेः क्तिचि सप्तिशब्दः. ४. अनेन चैवमुकारवान् धातुर्भ्वादौ त्यक्तः फलति । (एकीयपाठे शाकटायनीयपाठे च मकाराः सर्वे मुकारा एव पठ्यन्ते घपुस्तके)

---

§'कथनम्' इति गपुस्तके पाठः. *'धारणोदयपूजनेषु' इति गपुस्तके पाठः.

त्तेत्स्थाने तु इदित्, तत्स्थाने चोदित् क्रियते। धनपालश्चात्रैवानुकूलः। 'मुचू मोक्षणे'। तुदादिः। 'शे मुचादीनाम्'(७-१-५९) इति नुम्। 'मुच प्रमोचने'। एष न त्वृदिदिति। पूर्व एव लृदित्, न त्वयमिति पाठशुद्ध्यर्थमेतत्। तत्र चामुचदिति तु लृदित्त्वफलम्। 'पुषादिद्युताद्यृदितः परस्मैपदेषु' (३-१-५५) इति च्लेरङ्॥

णौ पञ्चयति विस्तारे व्यक्तौ तु शपि पञ्चते।

'पचि विस्तारवचने'। प्रपञ्चयति। विस्तार इत्येवैके। तथाच श्लोकधातुपाठः—'जुड प्रेरणवाची शुठालस्ये गज मार्जे च। शब्दार्थे पचि विस्तारे' इति। तथैव चन्द्रः। पचि व्यक्तीकरणे। पचेति दुर्गः। अनुदात्तेत्॥

वञ्चतीति गतावर्थे वञ्चयेत प्रलम्भने॥४८॥

'वञ्चु गत्यर्थः'। 'वञ्चु प्रलम्भने'। चितादिः॥

पूजायां णौ विभाषार्चेरर्चयत्यर्चतेऽर्चति।
भूवादौ पाठसामर्थ्यात् कर्तृगामिफलेऽर्चति॥४९॥

'अर्च पूजायां' युजादिः स्वरितेत्। ततश्चार्चतीत्यपि तेनैव सिद्धेऽर्चेर्भूवादिपाठः कर्त्रभिप्रायेऽपि क्रियाफले परस्मैपदार्थः। शाकटायनस्य त्वात्मनेपदी॥

गतियाचनयोरञ्चत्यञ्चते णौ विशेषणे।

---

१. 'तातांझथासाथांध्वमिल्वहिमहिङ् ङिदिदिच्छीयसंक्ष्ण्वपस्कानिविशः' (१-४-१) इति शाकटायनसूत्रम्। ङित इदितः शीयादेशात् संक्ष्ण्वादिभ्यश्च धातुभ्यः परस्य लस्य अन्ययुष्मदस्मासु प्रत्येकमेकद्वित्रबहुषु यथासङ्ख्यं त आतां झ, थास् आथां ध्वम्, इल् वहि महिङ् इत्यादेशा भवन्तीति तस्यार्थः. २. तत्स्थाने = इदित्स्थाने. 'उदितः' (४-२-१९७) इति शाकटायनीयं सूत्रम् 'उदितो धातोर्नम् भवति' इत्यर्थकम्. ३. चितादिः = आकुस्मीयः. ४. एवं चास्य मते भूवादिपाठफलं क्रियाफलस्याकर्तृगामित्वेऽप्यात्मनेपदं सम्पद्यते.

अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥ ५० ॥

अत्र त्रिभि,स्त्रिभिः, पञ्चभिश्च पदैः क्रमाद्वाक्यत्रयं बालानां योजनीयम् । 'अञ्चु गतौ याचने च' । '[1]अचु इत्येके' । इति मैत्रेयरक्षितः । '[2]अचूञ् व्ययीगतौ' इति शाकटायनः । तेन चोदित्स्थाने [3]ऊदित् क्रियते । अचि गताविति, अञ्चु गताविति च द्वौ धातू क्षीरस्वामी । तत्र चेदित्त्वफलमञ्च्यत इत्यादौ 'अनिदितां हल उपधायाः क्ङिति (६-४-२४) इति नलोपाभावः । 'अञ्चु विशेषणे' । 'अञ्चु गतिपूजनयोः' ॥

वक्तीति भाषणे वा णौ वाचयेद् वचतीति वा ।

'वच भाषणे' । अदादिर्युजादिश्च । तत्र चान्त्यः पारायणिकैर्नाधीयते इति क्षीरस्वामी । अन्यः पुनः 'अस्यतिवक्तिख्यातिभ्योऽङ्' (३-१-५२) इत्यत्र वृत्तौ परिभाषणे पठ्यते । तथापि परेर्[4]नाधिकार्थत्वाद् भाषणमेवार्थः ॥

पृणक्ति पृक्ते सम्पर्के यौ पर्चयति पर्चाति ॥ ५१ ॥

पृङ्क्त इत्यपरः पाठः । 'पृची सम्पर्के' रुधादिरदादिश्च । अन्त्योऽनुदात्तेत् । अत्र भूवादिसूत्रे सुधाकरः— 'पृचि इति द्रमिडा §वेति नान्दिस्वामी । पृङ्क्त' इति । धनपालश्च सर्वं नान्दि-

---

१. अयं च पाठो 'यः पूर्णादुदचति' (तैत्तिरीयसंहिता. का. ७. प्र. ५. अनु. १.) इत्यादिप्रयोगानुगुणः. २. अित्त्वमीदित्त्वं चोभयपदित्वाय. ३. तथा च शाकटायनोयं — 'त्व्यूदितः' (४-२-१६१) इति । ऊदितो धातोः क्त्वाया इड् वा स्यादिति तदर्थः. ४. अनाधिकार्थत्वात् = धात्वर्थातिरिक्तार्थशून्यत्वाद् धात्वर्थगतविशेषाद्योतकत्वादिति यावत् । 'अधिपरी अनर्थकौ' (१-४-९३) इति प्रसिद्धस्य परेरनर्थकस्यैवायं प्रयोगो, न तूपालम्भरूपविशेषद्योतकस्येति भावः.

---

§'नवेति' इति गपुस्तके पाठः.

स्वामिवदेवास्थित । 'युज, पृच संयमने' । सम्बन्धन इति क्षीर स्वामी ॥

रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने वियोजने ।
संपर्चने च यौ वा णौ रेचयत्यपि रेचति ॥ ५२ ॥

श्ने श्नमि । 'रिच वियोजनसंपर्चनयोः' ॥

शुच्यते शुच्यतीत्येवं पूतीभावे शुचेः श्यानि ।
शोके शोचति

'ईशुचिर् पूतिभावे' । 'शुच शोके' ॥

हिंसायां तर्जने परिभाषणे ॥ ५३ ॥

चर्चत्यध्ययने त्वर्थे भवेच्चर्चयतीति णौ ।

'चर्च परिभाषणहिंसातर्जनेषु' । अत्र[1] धातुवृत्तिकाराः प्रत्येकमव्यवस्थितपाठशता दृश्यन्ते । यदत्र सत्यं, तद्देवा ज्ञातुमर्हन्तीत्यप्याहुः । तत्र च प्राचुर्यात् 'चर्च परिभाषणे' इति नूनं पक्षमाश्रित्य देवः प्रववृते । 'चर्च अध्ययने' । क्वचित्तु पठ्यते—

अध्ययने चर्चयेच्चर्चतीति तु ।
हिंसायां तर्जने शे तु तथैव परिभाषणे ॥

इति । तत्र 'चर्च हिंसातर्जनयोः' । 'चर्च परिभाषणे' इति नूनं पाठौ । परिभाषणसन्तर्जनयोरिति चान्त्यं[2] बहवः पठन्ति । सर्वथापि 'स्वरभेदाद्[3] द्विरुच्यते' इति 'शतुर्वा नुं शे स्यादिति तुदादिता[4]' इति च वक्ष्यमाणनीत्या फलभेदो द्रष्टव्यः ॥

१. अत्र = धातुस्वरूपविषये. २. तौदादिकम् । 'जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः' इति तु सिद्धान्तकौमुद्याम्. ३. इदं पञ्चपञ्चाशश्लोके. ४. इदं सप्तपञ्चाशश्लोके.

सङ्कोचे कुचतीति स्यात् कोचेत् संवर्चनादिषु ॥ ५४ ॥

'कुच संकोचे' । तुदादिः । 'कुच संवर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु' । ज्वलादिः । तत्फलं पुनः 'इगुपधज्ञाप्रीकिरःकः' (६-१-१३५) इति प्राप्ते 'ज्वलितिकसन्तेभ्यो णः' (३-१-१४०) इति पक्षे णः कोचः कुच इति । यस्तु 'कुच शब्दे तारे' इति ज्वलादिभ्योऽन्यत्र पठ्यते, तस्य कोचेत् कुच इति द्रष्टव्यम् । तत्र ज्वलादिषु पाठादेवानयोरपि रूपयोः सिद्धत्वेऽपि कुच एवात्रार्थे यथा स्यात्, न तु कोचोऽपीत्येवमर्थं पृथक् पठ्यते ; न पुनः कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनतारशब्देष्वित्येकीकृत्यवै ॥

वियोजनेऽर्चयेदर्चेद्यौ स्तुतावृचतीत्यृचेः ।

ऋचेर्युजादौ मृग्यः पाठः । 'रिच वियोजने' इति प्रागुक्त[1] एव हि पाठो दृश्यते । 'ऋच स्तुतौ' । तुदादिः ॥

शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते ॥ ५५ ॥
उच्छतीति विवासे स्यादिदितोऽनिदितस्तयोः ।

'उछि उञ्छे' । 'उञ्छो धान्यश आदानं कणिशाद्यार्जनं शिलम्' इति यादवप्रकाशः । श्लोकेऽपि विवास इतिवद् उञ्छे इति सप्तम्येव, न पुनरुञ्छेरिति षष्ठी । विसर्जनीयकल्पनागौरवं चैवं परिहृतम् । यद्येवमुञ्छतीत्येव शशपो रूपं, ततः स्वतः प्राप्ते भूवादावेवायं पठ्यताम् । अथापि 'शतुर्वा नुं शे स्यादिति तुदादिते'ति वक्ष्यमाणनीत्योञ्छन्ती उञ्छतीति नुम्विकल्पार्थं तुदादौ पठ्येत । तथापि न भूवादौ । तदेवं रूपाभेदात् कुतोऽयं द्विष्पठ्यते इत्यत उक्तं स्वरभेदादिति । उञ्छतीत्यापाततो रूपाभेदेऽपि सूक्ष्मेक्षिकायां मध्योदात्ताद्युदात्तत्वाभ्यां रूपभेदोऽप्यस्त्येवेत्यर्थः ।

---

१. द्वापञ्चाशपद्योक्तः.

अत्र हि 'अनुदात्तौ सुप्पितौ' (६-१-४) इत्यनुदात्तस्तिपूशपोरजिति 'धातोः' (६-१-१६२) इत्युदात्त उकारः 'उदात्तादनुदात्तस्य स्वरित' (८-४-६६) इति स्वरितः शप् । 'स्वरितात् संहितायामनुदात्तानाम्' (१-२-३९) इत्येकश्रुतिरिकारः । स एव च प्रचय इत्युच्यते । एवं शप्याद्युदात्तं पदम् । शे पुनः 'आद्युदात्तश्च' (३-१-३) इत्युदात्ते सति मध्योदात्तम् । तथा च 'अनुदात्तं पदमेकवर्जम्' (६-१-१५८) इत्यनुदात्त उकारः । स च 'उदात्तस्वरितपरस्य सन्नतर' (१-२-४०) इत्यनुदात्ततरः । तिपश्चानुदात्तस्वरितौ पूर्ववत् । 'उछी विवास' ईतीदित्त्वेनेदित्त्वाभावान्नुमभावेन तयोः शशपोरुच्छतीति स्यात् । विपूर्वश्चायं प्रायः प्रयुज्यते । 'ततो रजन्यां व्युष्टायाम्' '[2]युच्छन्ती दुहिता दिवः' । 'उषा [3]उच्छदपस्त्रिधः' इति ॥

णौ विच्छयति भाषार्थे गतौ विच्छायतीति शे ॥ ५६ ॥
विच्छेराये शतुर्वा नुं शे स्यादिति तुदादिता ।

विच्छ भाषार्थः । 'विछ गतौ' । 'छे च' (६-१-७३) इति तुक्सिद्धेर्विच्छेत्यपपाठः । तत्र चान्त्याद् 'गुपूधूपविच्छिपणिपनिभ्य आय' (६-१-२८) इत्याये शे च सति विच्छायतीति भवति । अथास्य तुदादिपाठः किमर्थः । न तावत् स्वरार्थः । 'एकादेश उदात्तेनोदात्त' (८-२-५) इत्यनुदात्तस्य शशपोर्विशेषाभावात् । इह हि शे उदात्ते पूर्ववद्धात्वकारोऽनुदात्तः । शपि त्वनुदात्तेऽसावुदात्त इत्येवं सत्यपि विशेषे [4]तयोरेकदेश उदात्त एवेत्यत

१. ईदित्त्वेनेति च्छेदः. २. व्युच्छन्ती (तमांसि) वर्जयन्तीत्यर्थः । इदं तैत्तिरीयब्राह्मणे तृतीयाष्टके प्रथमप्रश्ने तृतीयेऽनुवाकेऽस्ति. ३. विपूर्वत्वव्यभिचरोदाहरणमिदम् । अपोच्छद्=अपवर्जयतीत्यर्थः । एतच्च ऋक्संहितायां प्रथमाष्टके चतुर्थाध्याये चतुर्थवर्गेऽस्ति. ४. धात्वकारशबकारयोः.

आह—शतुर्वा नुं शे स्यादिति तुदादिता । शे हि सति विच्छायती विच्छायन्तीत्यत्र 'आच्छीनद्योर्नुम्' (७-१-८०) इति नुं विकल्प्यते । शपि तु 'शप् श्यनोर्नित्यम् (७-१-८१) इति नित्यं स्यात् ।

अत्र केचित् तुदादिपाठबलाद्विच्छतीत्यपि रूपमिच्छन्ति । 'तुदादिभ्यः शः' (३-१-७७) इति विच्छेः शो विधीयते, न तु विच्छायेः, विच्छेरेव तुदादिषु पाठात् । तच्चैतद् विच्छेः शविधानम् आये नित्ये सत्यायान्ताद् भवत् परिक्लिश्येत । एवं चा'यादय आर्धधातुके वा' (३-१-३१) इत्यत्र 'शपि नित्यम्' इति भाष्ये शब्ग्रहणं विच्छेः शेऽप्यायस्य विकल्पे सत्याञ्जस्येनावकल्पेत । न पुनः शिद्विकरणोपलक्षणतया कथञ्चिन्नीयेत । तथा च सुधाकरः—'विच्छेस्तुदादिषु पाठो ज्ञापकः सार्वधातुकेऽप्यायप्रत्ययोऽनित्य इति । तेन विच्छतीति सिद्धम्' इति । 'छ्वोः शूडनुनासिके च (६-४-१९) इत्यत्र न्यासकारश्च—'गां विच्छतीति गोविड्' इति । †यन्नुंविकल्पः फलमित्युक्तं, तुदादिपाठात् तदपि

१. आयादेशाभावपक्षे शे सति रूपमिदम् । अपिशब्दसङ्ग्राह्यं तु विच्छायतीति आयान्तादौत्सर्गिके शपि द्रष्टव्यम्. २. एवञ्च = शेऽप्यायस्य नित्यत्वे च. ३. दोषपरिहारार्थं 'आयादयः शपि नित्यम्' इति कश्चिन्न्यासभेदोऽयम् । अनेन च शपोऽन्यत्र सर्वत्रायप्रत्ययस्य विकल्पः स्वरसतः प्रतीयते. ४. कैयटेन तु नीयते, यत् स आह—"ननु तौदादिकत्वाद्विच्छेः शेन भाव्यं, न तु शपा । एवं तर्हि न्यासभेदोपलक्षणार्थमिदमिति 'शिति नित्यम्' इति तु न्यासः कर्तव्यः" इति । एवं च शेऽप्यायस्य नित्यत्वं फलति । विच्छेः शविधानस्यायप्रत्ययान्तार्थत्वं च गुपादिष्वनुबन्धकरणस्य सन्नन्तसमुदायार्थत्ववदुपपत्स्यत इति पूर्वोक्तः परिक्लेशोऽपि न.

†'यच्च नुम्' इति गपुस्तके पाठः.

सम्भवतीति तुदादिपाठस्येदमेव फलं न्याय्यम् । एवं च नुंविकल्पाद्विच्छन्ती विच्छतीत्येव युक्तम् । विच्छायतीत्यौत्सार्गिकः शबेवेति नित्यो नुम् ॥

रजते रजतीत्येव रज्यते रज्यतीत्यपि ॥ ५७ ॥

रागार्थे शप्श्यनोर्द्वे द्वे

'रञ्ज रागे' । 'दंशसञ्जस्वञ्जां शपि' । 'रञ्जेश्च' (६-४-२६) इति, 'अनिदिताम्'[1] (६-४-२४) इति नलोपः ॥

गतौ वजति वाजयेत् ।

'वज, व्रज गतौ' । 'वज मार्गसंस्कारगत्योः' । मार्गण इति धनपालः । 'वज, मार्गेति द्वौ धातू इत्यन्ये' इति क्षीरस्वामी । व्रजेति चन्द्रः । 'व्रज मार्गसंस्कार' इति दुर्गः । उभयोरप्यनयोर्वजव्रजपक्षयोर्मार्ग(ण?)संस्कार इत्येवार्थस्तन्त्रान्तरे पठ्यते ॥

दीप्तौ शप्येजते तत्र भवेदेजति कम्पने ॥५८॥

'एजृ भ्रेजृ भ्राजृ दीप्तौ' । 'एजृ कम्पने' ॥

वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति ।

'वृजी वर्जने' । रुधादिर्युजादिश्च । तत्र चाद्ये वरण इति धनपालशाकटायनौ । 'वृजि वर्जने' । अदादिरनुदात्तेत् । ईदित्पाठे तु नुमभावाद्वृक्त इति पाठः । तथा च क्षीरस्वामी । वृजि इति पठित्वा 'वृजी इति दौर्गाः । वृक्ते वर्जिता वृक्तः' इत्याह । तत्र चान्त्ये 'श्वीदितो निष्ठायाम्' (७-२-१४) इतीडभावः । शाकटायनस्य त्वयं सम्पर्चने । यदाह—'विजुङ् वृजुङ् वृजैङ्

---

१. अनेन नलोपो दैवादिके.

सम्पर्चने' इति । तेन च [1]ईदित्स्थाने ऐदित् क्रियते ॥

गर्जेद् गृञ्जेद् गजेद् गञ्जेच्छब्दने गाजयेण्णिचि ॥५९॥

'गज गाजि गृज गृजि मुज मुजि शब्दार्थाः' । मज मुजीति क्षीरस्वामी चन्द्रश्च । 'मृज मृजीत्यप्याहुरि'ति च[†] । 'गज मदने च' । शब्देऽस्य पाठो मदने [2]प्रयोगाप्राचुर्यार्थो नूनम् । यदाह 'अघि मघि लघि गत्याक्षेपे । मघि कैतवे च' इत्यत्र मैत्रेयरक्षितः—'पूर्वमस्य पाठः कैतवार्थस्यान्वा[3]चितत्वद्योतनाय' इति । [4]व्यभिचरति चैतद् 'वृषु पृषु मृषु सेचने । मृषु सहने च' इत्यादौ । [5]गज शब्दार्थः । अत्र च गर्जतीत्येतद् 'गर्ज शब्द' इत्यस्यापि कामं द्रष्टव्यम् ॥

धर्जेद् धृञ्जेद् ध्रजेद् ध्रञ्जेद् ध्वजेद् ध्वञ्जेद् गतौ शापि ।

'ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ' ॥

शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥ ६० ॥

मार्ष्टि शुद्धौ तथा §मार्जेः शब्दार्थाद् मार्जयेण्णिचि ।

'मृजू शौचालङ्कारयोः' । मृजूषिति क्षीरस्वामी; षकारोऽर्थ इति च । तच्चिन्त्यम्, मृजेति भिदादिपाठात् सिद्धेः । 'मृजेर्वृद्धिः' (७-२-११४) इति वृद्धिः । 'मृजू शुद्धौ' । अदादिः ।

---

१. 'न डीयश्च्यैदिद्वेटोऽपतः' (४-२-१४३) इति शाकटायनः । 'डीयश्चिभ्यामैदितो विकल्पितेटश्च क्त्वोरिड् न भवति, न पतः' इति च तदर्थः. २. चार्थान्वाचययोगेन मदनरूपार्थस्यानुषङ्गिकत्वसम्पादनात् तस्मिन् धातोः प्रयोगाप्राचुर्यं फलतीत्यभिप्रायः. ३. अन्वाचितत्वं = अन्वाचययुक्तत्वं । तद्द्योतनाय. ४. 'मृषु सहने च' इत्यत्र हि चशब्दः समुच्चयार्थ एवाश्रयणीयो, नत्वन्वाचयार्थः सहने प्रयोगप्राचुर्योपलम्भात्. ५. 'गज मार्ज शब्दार्थौ' इति चुरादौ पठितः.

---

†'चाह' इति गपुस्तके पाठः. §'मार्ज शब्दार्थे' इति खपुस्तके पाठः

मार्ज शब्दार्थः । तथा 'गज गजी'त्यत्र क्षीरस्वामी मृज मृजि इत्यप्याह मार्जति मृञ्जतीति ॥

वेवेक्तीति पृथग्भावे विविक्ते च भये पुनः ॥ ६१ ॥
विनक्ति विजते

'विजिर् पृथग्भावे' । जुहोत्यादिः । 'णिजां त्रयाणां गुणः श्लौ' (७-४-७५) इत्यभ्यासस्य गुणः । 'ओविजी भयचलनयोः' । रुधादिस्तुदादिश्च ॥

सर्गे सृज्यते सृजतीति च ।

'सृज विसर्गे' । दिवादिस्तुदादिश्च । लोके त्वनुपसृष्टः सृजिः सृष्टौ प्रसिद्धः कर्षतिरिवाकर्षण इत्यतो विसर्ग इति नोक्तं 'कर्षत्याकर्षण' इत्यत्रेव विलेखन इति ॥

ऋञ्जते भर्जने गत्याद्यर्थे स्यादर्जते त्यृजेः ॥ ६२ ॥

'ऋजि भृ (जि?)जी भर्जने' । 'ऋज गतिस्थानार्जनोपार्जनेषु' इति मैत्रेयरक्षितः । ऊर्जनेष्विति क्षीरस्वामिशाकटायनधनपालाः । अनुदात्तेत् ॥

प्रतियत्नेऽर्जयेदर्जेरर्जतीत्यर्जने पदम् ।

'अर्ज प्रतियत्ने' । अत्र 'उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु' (६-१-१३९) इत्यत्र वामनः—'सतो गुणान्तराधानमाधिक्याय वृद्धस्य वा तादवस्थ्याय समीहा प्रतियत्नः' इति । अत्र चान्तरो-

१. एतच्च ५९ श्लोके गर्जेदित्यंशव्याख्यायामुक्तम् . २. अयं स्वरितेत् . ३. 'कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे' इति १७८तमे श्लोके. ४. काशिकाकारः. ५. वृद्धियुक्तावस्थायाः प्रच्युतिपरिहारायेत्यर्थः. ६. अन्तरशब्दस्यान्यवाचिन उपादानेन.

त्त्या प्रागेव गुणे सति पुनराधानं किमर्थमित्यत उक्तम् 'आधिक्याये'ति । अधिकस्येत्युक्तौ च गुणान्तराधानेनैवाधिक्यं मायादित्यन्यैकृतमप्याधिक्यं संगृहीतं 'वृद्धस्ये'ति । अर्थान्तरे स्वयमर्जिः प्रसिद्धः — 'द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयाद्' इति । अर्ज षर्ज अर्जने ॥

निङ्क्ते नेनेक्ति नेनिक्ते शौचेऽर्थे पोषणे तथा ॥ ६३ ॥

'णिजिर् शौचपोषणयोः' । रुधादिर्जुहोत्यादिश्च ॥

युनक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि ।
युजेः संयमनार्थे वा णौ योजयति योजति ॥ ६४ ॥

'युजिर् योगे' । 'युज समाधौ' । अनुदात्तेत् । 'युज पृच संयमने' ॥

भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने ।
[क्रमेण

'भुजो कौटिल्ये' । 'भुज पालनाभ्यवहारयोः' । तुदादी रुधादिश्च । 'भुजोऽनवन' (१-३-६६) इति तङ् ॥

प्रतियत्नेऽर्जेरर्जयेदर्जनेऽर्जति ।]

ये तु प्रागेव 'प्रतियत्नेऽर्जयेद्' इत्याद्यपाठिषुः, तेऽत्र 'क्रमेण' इत्यादि न पठन्त्यर्थाभेदात् ॥

सेवायां भजते भजेदिति भजेर्विश्राणने भाजयेद्
आमर्दे तु भनक्ति भाजयति णौ भाजेः पृथक्कर्मणि ।

---

१. विद्यमानत्वेन ज्ञाते सतीत्यर्थः. २. अन्येन गुणान्तराधानातिरिक्तेन स्वभावादिना कृतम्. ३. अयमनुदात्तेत् । अन्यस्तु स्वरितेत्.

भाषार्थे णिचि भञ्जयेद्

'भज सेवायाम्' । 'भज विश्राणने' । 'भञ्जो आमर्दने' । नोपधोऽयम् । चुत्वेन ञकारः । तेन 'श्नान्नलोप' (६-४-२३) इति नलोपः 'पूर्वत्रासिद्धम्' (८-२-१) इति चुत्वस्य तत्रासिद्धत्वात् । 'भाज पृथक्कर्मणि' । तच्च पृथक्करणम् । [1]भजि भाषार्थः ।

अभिहिते त्वर्थे पदं तुञ्जये-

द्धिंसायां शपि तुञ्जतीत्यनिदितस्तस्यां तुजेस्तोजति ॥

तुजि भाषार्थः । अभिहितोऽर्थो भाषायामित्युक्तोऽर्थः । वक्ष्यमाणापेक्षया विशेषद्योतकस्तुः; पादपूरणो वा । 'तुज तुजि हिंसायाम्' । 'तुजि पालने च' ॥

सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥ ६६ ॥

'तर्ज, भर्त्स सन्तर्जने' । †चितादिः । 'तर्ज भर्त्सने' । अर्थैक्येऽपि धातुपाठवशात् पृथक्कथनम् ॥

वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति ।

'पिजि वर्णे' । अदादिरनुदात्तेत् । 'पृजिरित्येके' इति मैत्रेयरक्षितः । 'पिजुङ् संपर्चन' इति शाकटायनः । पिजि भाषार्थः । 'तुजि पिजि हिंसाबलादाननिकेतनेषु' इत्यर्थान्तरेऽपि चौरादिकौ तुजिपिजी स्तः ।

गुञ्जेदव्यक्तशब्दे स्याच्छब्दमात्रे गुजेदिति ॥ ६७ ॥

'गुजि अव्यक्तशब्दे' । गुज इत्यपरे । तथा च क्षीर-

---

१. अयं पटपुटादिदण्डके पठितः । एवं तुजिपिज्यादयो द्रष्टव्याः.

---

† 'चितादी' इति घपुस्तके पाठः.

स्वामी – 'अनिदित्येके' इति । सुधाकरश्च भूवादि (१-३-१) सूत्रे 'अनिदित्पारायणेष्वपाठि, गोजति जुगोजेत्याद्युदाहृतेः । *पक्षे पुनरिदिदेव गीतः' इति । शाकटायनः पुनर्गुज गुजीति पठन् पक्षद्वयमपि परिजग्राह । 'गुज शब्दे' । तुदादिः ॥

भृज्जते भृज्जति भ्रस्जेर्भर्जने भर्जते भृजेः ।

'भ्रस्जु पाके' । 'ऋजि भृजी भर्जने' ॥

प्रकाशे लजयेद् व्रीळे लज्जते लजते पदे ॥ ६८ ॥

लञ्जेल्लाजेल्लजेल्लाजेदित्येते भर्त्सने शपि ।

'लज प्रकाशने' । कथादिः । 'लजि इत्येके' इति मैत्रेयरक्षितः । तदा लञ्जयेदिति पठितव्यम् । लञ्जापयेदिति शाकटायनः । 'कथादिपातिस्फायोऽग्लग्वम्' (४-१-१९७) इत्यगागमश्च । कथादीनां पातेः स्फायतेश्च अक्, लक्, वम् इत्येत आगमा णौ क्रमाद् भवन्तीत्यर्थः । ततो वृद्धिपुकौ । 'ओलजी, ओलसी §व्रीळने' । तुदादी । तत्र च शो भवन् 'तास्यनुदात्तेङ्गिदुपदेशाल्लसार्वधातुकमनुदात्तमङ्ङिद्वत्' (६-१-१८६) इति तिङ्यनुदात्ते उञ्छतिवदुदात्तः । 'लज लाजि भर्त्सने' । 'लाज लजि भर्त्सने च' । अत्र मैत्रेयरक्षितः – 'चकारो भिन्नक्रमः । एतावपि भर्त्सने पठ्येते इत्यर्थः' । इति । 'लज लजि भर्त्सने । लाज लाजि भर्जने च' इति तु क्षीरस्वामी । 'लज लजु भर्त्सने' । लाज लाजु भर्जने चे'ति पठन् शाकटायनोऽप्यत्रैवानुकूलः । एवञ्च भ(र्ज?)र्त्सनग्रहणं भर्जनस्यापि काममुपलक्षणं द्रष्टव्यम् । लञ्जयेदिति च क्षीरस्वामिनः पक्षे, तेन लजेरपि पट-

*'लक्ष्ये' इति गपुस्तके पाठः. § 'व्रीले' इति गपुस्तके पाठः.

चुटादिदण्डके 'तुजि पिजी'त्यत्र च लजि लुजीत्यपि पाठात् ॥

भङ्गे रुजति हिंसायां रोजयेदिति णौ रुजेः ॥ ६९ ॥

'रुजो भङ्गे' । तुदादिः । 'रुज हिंसायाम्' । ग्रसादित्वात्[1] सकर्मकादेव णिच् ॥

घाटयेद् घण्टयेत् सङ्घभाषयोर्घटते मितः ।
क्रमाद्विकासे शशपोः स्फुटति स्फोटते पदे ॥ ७० ॥
स्फोटयेत् स्फोटतीति द्वे भेदे विशरणे क्रमात् ।

अत्र घाटयतिस्फोटयत्योर्विवदन्ते । तत्र धनपालस्तावत्— "'चटास्फुट भेदने' उच्चाटयति आस्फोटयति । 'घट च सङ्घाते' । चकारात् पूर्वौ चात्रार्थे णिचमुत्पादयत" इति । शाकटायनस्तु—'चटास्फुटौ घट च हन्त्यर्था' इति । क्षीरस्वामी तु "'चट स्फुट भेदने' चाटयति स्फोटयति । 'घट च' घटधातुश्च भेदने वर्तते । 'हन्त्यर्थाः' । हन्त्यर्थाश्च धातवो णिचमुत्पादयन्ति" इत्युक्त्वा दर्शनान्तरमप्याह — "'घट च हन्त्यर्थाः' । चटस्फुटधातू द्वौ घट च धातुस्त्रय एते हन्त्यर्था हन्तिना समानार्था णिचमुत्पादयन्ति" इति । मैत्रेयरक्षितस्तु—"'चट स्फुट भेदने' । घट सङ्घाते' 'हन्त्यर्थाश्च' । येऽन्येषु नवसु गणेषु हिंसार्थाः पठ्यन्ते, त इह द्रष्टव्याः" इति । तत्र नवस्विति शबादिविकरणविषयेषु भूवादिप्रभृतिषु । इहेति चुरादौ । एतेषु च पक्षेष्वन्त्यस्यानुकूलं[2] दैत्रम् । घट घटि भाषार्थौ । ततश्चार्थौ[3] यथासङ्ख्यं न भवतः । 'घट चेष्टायाम्' । तस्य तु मित्त्वाद्धेतुमण्णिचि घटयेत् । स्फुट विक-

---

१. आस्वादीयत्वात् . २. आनुकूल्यं च 'भेदे स्फोटयेद्' इति, 'सङ्घे घाटयेद्' इति च कथनात् स्पष्टम् . ३. घाटयतेरपि भाषार्थकत्वादित्यर्थः.

सने' । 'स्फुटिर्विशरणे' । स्फुटेति चन्द्रः । इरित्फलं तु 'इरितो वा' (३-१-५७) इत्यङ्विकल्पः । अस्फुटत् । अस्फोटीत् ॥

प्रमर्दने चाक्षेपे च मुटेदाद्ये तु मोटति ॥ ७१ ॥
सञ्चूर्णने चुरादेर्णौ मोटयेदतङस्त्रयः ।

'मुट आक्षेपप्रमर्दनयोः'* । तुदादिः । 'मुट प्रमर्दने' 'पुडि' इति धनपालः । शाकटायनश्च 'पुडु' इति पठन्नत्रैवानुकूलः । क्षीरस्वामी त्वेतौ पाठौ मुटि मुडि इत्यपरौ चावोचत् । मैत्रेयरक्षितस्तु 'मुडि खण्डन' इत्यत्राह — 'पुडि चेत्येक' इति । 'मुट सञ्चूर्णने' ॥

हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत् ॥ ७२ ॥

'अट्ट अतिक्रमहिंसनयोः' । अत्र मैत्रेयरक्षितः — "दोपधोऽयमिति स्मर्यते । 'ष्टुना ष्टुः' (८-४-४१) इत्यत्र न्यासकारेण तु तकारोपधोऽयमित्युक्तम्" इति । क्षीरस्वामी तु 'पक्षद्वयेऽपि पाठेऽत्र ष्टुत्वं न कृतमसन्देहार्थम्' इत्यप्याह । 'अन्ये अड्डेत्याहुः इति च । तत्र चाद्ये पक्षे संश्चङोः कृतयोः 'नन्द्राः संयोगादय' (६-१-३) इति दकारवर्जे द्विरुक्तौ ष्टुत्वे 'पूर्ववत्सन' (१-३-६२) इति तङि च कृते अट्टिटिषते आट्टिटादिति भवति । अन्त्ये त्व-

१. 'आद्ये' इत्यस्य विवरणमिदम्. २. 'डान्तपाठः प्रकरणविरोधादुपेक्ष्यः' इति माधवः. ३. उपधाभूतस्य तकारस्य ष्टुत्वे तस्य 'पूर्वत्रासिद्धीयमद्विर्वचन' इति सिद्धत्वाद् टकारद्वयसहितस्य द्वित्वे 'हलादिः शेषः' (७-४-६०) इति निमित्तटकारनिवृत्त्या नैमित्तिकस्य ष्टुत्वस्य निवृत्तौ तकार एवाभ्यासेऽवतिष्ठत इति भावः । 'निमित्तापाये नैमित्तिकस्याप्यपायः' इत्येतदनाश्रयेण तु अटिट्टिषते आटिट्टद् इत्येव रूपं माधवो मन्यते.

* 'आक्षेपमर्दनयोः' इति गपुस्तके पाठः.

तिट्टिषते आतिट्टदिति । 'अट्ट अनादरे' ॥

घट्टयेद् घट्टते द्वे स्तां चलने णौ शापि क्रमात् ।

'घट्ट चलने' । अन्त्योऽनुदात्तेत् ॥

णौ लोटयति भाषार्थे लुट्येल्लोटति लोटने ॥ ७३ ॥
लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत् ।
रोटते प्रतिघातेऽर्थे रोषे रोटयतीति णौ ॥ ७४ ॥

लुट भाषार्थः । 'लुट विलोटने' । दिवादिर्भूवादिश्च । अत्र भूवादिसूत्रे सुधाकरः—"'लुड विलोडन' इति डान्तः । लान्तोऽपि तु दद्दशे । लोलः । 'लोलद्भुजाकारबृहत्तरङ्गः' इति माघे । 'डलयोरेकत्वस्मरणामिति केचिद्' इति वा प्रतिविधेयम्' इति । 'रुट लुट प्रतीघाते' । अनुदात्तेतौ । ठान्ताविमावित्येके । तथा च क्षीरस्वाम्येवमेव पठित्वाह—"रुट लुट इत्येके । 'बाधृ लोटन' इति लिङ्गाद्" इति । तथा 'रुट दीप्तावि'त्यप्यनुदात्तेत्सु स एवाह । लुटि इति तु शाकटायनः । रुट लुट इति हरियोगी । 'रुटि लुटि स्तेये' । क्षीरस्वामी तु—'रुठि लुठि इत्येके । रुण्ठति लुण्ठति' इति । रुडु लुडु इति डान्तकाण्डे शाकटायनः । 'लुण्ट स्तेये' । लुण्ठेति क्षीरस्वामी । लुण्डेति शाकटायनः । तत्र चाद्य एव पाठो 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (३-२-१५५) इति सूत्रपाठानुसारी । यस्तु लुटीत्यनेन लुण्टाक इति निर्वाहः क्षीरस्वामिनः, सोऽपि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि'ति नीत्या विरुध्यते । लुटीत्यस्य हि लुण्टभावो लाक्षणिकः । स च लुण्टे-

---

१. अयं चुरादिः. २. लुण्ट लुण्ठ लुण्डेषु. ३. इदिता.

त्येव प्रतिपदोक्ते धातौ सम्भवति कथङ्कारं गृह्येत, लुण्टेत्यस्यैव झटिति परिस्फुरणात् । 'कुट्टि लु(ण्टि?)ण्डिवृङ्जल्पभिक्षादाकट्' (४-३-२५५) इति शाकटायनानुसारेण कुट्ट लुण्डेत्येव पाठपरिकल्पनेऽपि टकारसाहचर्यादनाञ्जस्यं व्यक्तमेव । 'रुष रोषे । रुट इत्यप्येके' इति मैत्रेयरक्षितः । 'रुट भाषार्थे' इति च क्षीरस्वामी ॥

कूटयेताप्रसादे णौ कूटेर्दाहे तु कूटयेत् ।

'कूट अप्रसादे' । चितादिः । 'कुट प्रतापन इत्येके' इति मैत्रेयरक्षितः । स एव तु पाठः प्रायेण दृश्यते । तदा 'कोटयेत प्रतापे णौ' इति पठितव्यम् । 'कुट्ट प्रतापने' । कुट्टयेतेति क्षीरस्वामी । 'कुट्ट छेदनपूरणयोरि'ति च चुरादावेवाह । कुत्सनयोरिति तु बहवः । छेदन इत्येव पुनः 'जल्प भिक्ष' (३-२-१५५) इत्यत्र जिनेन्द्रः । एवमेव च दुर्गः । सर्वथापि तस्य कुट्टयतीति द्रष्टव्यम् । कुटपक्षे तु 'कुट कौटिल्य' इत्यस्य तुदादेः कुटतीति । 'कूट दाहे' । कथादिः । तत्फलं पुनरचुकूटदित्यत्र 'नाग्लोपिशास्वृदिताम्' (७-४-२) इति ह्रस्वाभावः । परितापन इति तु मैत्रेयरक्षितः । 'केत श्राम कुण गुण चामन्त्रण' इति चकारादामन्त्रणेऽप्ययं वर्तते । केत ग्रामेति मैत्रेयरक्षितपाठेऽप्यत्रांशे न विवादः । बहुनुमतत्वात् परमाद्यमेव पाठमभिरोचयामहे ॥

भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् पुटेत् ॥ ७५ ॥

पुट भाषार्थः । 'पुट संसर्गे' । कथादिः । पुट संश्लेषे । तुदादिः ॥

---

१. चितादेर्बहिरित्यर्थः. २. चकारेण कूटानुकर्षणांशे. ३. समाहारद्वन्द्वोऽयम्.

नृतौ नटत्यवस्पन्दे चुरादेर्णिचि नाटयेत् ।

'नट नृतौ' । नृतौ *नृत्ताविति च क्षीरस्वामी । उभयथापि नर्तन इत्येवार्थः । तच्च नाट्यम्, यत्कारिषु नटव्यपदेशः । न तु मार्गदेशीशब्दाभ्यां प्रसिद्धं नृत्यं नृत्तञ्च,यत्कारिषु नर्तकव्यपदेशः। तत्र च वाक्यार्थाभिनयो नाट्यम् । पदार्थाभिनयस्तु नृत्यम् । अभिनयशून्यः पुनः शास्त्रोक्तभङ्ग्या गात्रविक्षेपो नृत्तमिति तद्विदः । नैघण्टुकानां तु 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्' इत्यभेदव्यवहारो निरूढलक्षणयैव नेयः, 'अन्यायश्चानेकार्थत्वम्' इति न्यायात् । 'नट अवस्पन्दने' । तच्च नाट्यम् । नाट्य इत्येव चन्द्रः । अत्र च णोपदेशाणोपदेशविभागो 'णो नः' (६-१-६५) इत्यत्र भाष्ये दर्शितः—'सर्वे नादयो णोपदेशा नृतिनन्दिनर्दिनाङ्किनाटिनाथृनाधृनृवर्जम्' इति । केचित् पुनस्थान्तमेवात्र पठन्ति, न धान्तम । तथा च 'णाधृ नाथृ याच्ञोपतापैश्वर्याशीष्षु' इत्यत्र मैत्रेयरक्षितः—'आद्यो णोपदेशः, नेतर' इति । (नृत?) नृ इति प्रायो न पठन्ति । तथा च श्रीधरो नृत्यागेन नृत्यादीन् पठित्वा 'एतान् सप्त वर्जयित्वा' इत्याह । नटिश्चुरादिण्यन्तो† नाटिः । 'नृती गात्रविक्षेपे' । 'टुनदि समृद्धौ' । 'नर्द गर्द शब्दे' । शाकटायनन्यासे तु णोपदेशो वायम् । 'नक्ठक नाशने' । 'नृ नये' । तत्र च प्रणटति प्रनाटयति इत्यादौ 'उपसर्गादसमासेऽपि णोपदेशस्य' (८-४-१४) इति णत्वं तदभावश्च णोपदेशाणोपदेशफलम् । घटादौ चायं नटिः पठ्यते ।

१. घटादिरत्वदीर्घार्ह इति न गृह्यते.

*'नृत्तावित्यपि' इति गपुस्तके पाठः. †'दिण्येन्तो' इति गपुस्तके पाठः.

अर्थपाठे त्वस्य विवदन्ते। तत्र तावन्नृताविति नृत्ताविति गताविति च पक्षत्रयं मैत्रेयरक्षितः प्रतिपेदे। क्षीरस्वामी तु — 'नट नतौ नटयति शाखाम्। नृत्तौ तु नाटयति' इति॥

भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत्॥ ७६॥
वण्टयेद्वण्टतीत्येते णिशपोः स्तां विभाजने।
णावदन्ताद्वटेर्ग्रन्थे वटयेद्वेष्टने वटेत्॥ ७७॥

पट भाषार्थः। 'पट वट ग्रन्थे'। *कथादिः। स च वेष्टनमिति क्षीरस्वामी। 'अट पट गतौ'। 'वटि विभाजने'। चुरादिः कथादिभूर्वादिश्च। तत्र च कथादौ वटेत्येके। तथा च मैत्रेयरक्षितो वटेति पठित्वा 'वटीत्येके' इत्याह। तदा वटयेदित्यपि द्रष्टव्यम्। वण्टापयेदिति तु शाकटायनः। तच्च लञ्जापयेदितिवन्नेयम्। मैत्रेयरक्षितश्चाह — 'अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यपरे। वण्टापयति लञ्जापयति' इति। चुरादौ तु स एवाह — 'वटि विभजन इति भूवादौ पठ्यते। ततो हेतुव्यापारे णिचि विभाजनेऽर्थे वण्टयतीति सिध्यति। किन्त्वेसौ[2] कर्त्रभिप्राये क्रियाफले आत्मनेपदी। अनेन[3] पुनस्तत्रापि वण्टयतीति[4]। अन्ये पुनर्वैचित्र्यार्थमस्योपादानमिच्छन्ति' इति। तदा[5] 'णिशपोः स्तां विभाजने' इत्येतद्विभाजने विभजने चेति व्याख्येयम्। भाजेर-

१. नमयतीत्यर्थः. २. हेतुण्यन्तः. ३. चौरादिकेन. ४. इदं च प्रयोजनं चुरादिण्यन्तेभ्यो 'णिचश्च' (१-३-७४) इत्यात्मनेपदाभावपक्षे। पक्षान्तरे तु चुरादौ पाठो वैचित्र्यार्थ इत्याह — अन्ये पुनरिति. ५. भौवादिकस्य विभजनार्थत्वे.

*'कथादी' इति घपुस्तके पाठः.

रपि पृथक्कर्मकर्मणो विभजनार्थत्वसम्भवाद् । बहुसम्मतत्वाद्वो-भयत्रापि विभाजन इत्येव युक्तं पाठं मन्यते । क्षीरस्वाम्यादयः पुनर्बहवश्चुरादिं डान्तं पठन्ति । डान्तकाण्डं चैवमनुसृतं भवति । शाकटायनः पुनर्भूवादिमपि डान्तकाण्ड एवाध्यगीष्ट । 'वट वेष्टने' । 'वट भट परिभाषणे' इति च घटादौ पठ्यते । बटेत्यप्याद्यो बहुषु कोशेषु दृश्यते ॥

श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् ।
लुण्ठेल्लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥ ७८ ॥
रुण्ठतीति गतौ रोठेदुपघाते-

'लुठ श्लेषणे' । तुदादिः । 'लुड इत्येके' इति मैत्रेयरक्षितः । डान्तकाण्डं चैवमनुसृतं भवति । लुठतीति लक्ष्यदर्शनात् तुदादौ पाठ इति भूवादौ क्षीरस्वामी । 'लुठि आलस्ये गतिप्रतिघाते च' । 'रुठ लुठ उपघाते' । 'उठ इत्यप्येक' इति मैत्रेयरक्षितः । उठ इत्येव धनपालः । क्षीरस्वामी त्वेवमेव पठित्वा 'रुठ लुठेत्यपि दौर्गाः' इत्याह । ऊठ इत्येव शाकटायनः । 'लुठ प्रतीघाते' । अत्र भूवादिसूत्रे सुधाकरः—'लुट प्रतिघाते इति लुटवद् द्वितीयान्तोऽपि प्रलुठितो लोठमान इति प्रयोगदर्शनादूरीकृतः' इति । कैयटस्तु 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (३-१-७) इत्यत्र लुलुठिषत इति भाष्यं व्याचक्षाण आह—'रुठ लुठ प्रतिघाते इति द्युतादौ पठ्यते' इति । 'रुठि लुठि गतौ' ॥

---

१. पृथक्कर्म पृथक्करणं विभजनं, तत्क्रियेत्यर्थः. २ विभाजनशब्दार्थद्वयकल्पनाक्लेशमरोचयमानो देवाभिप्रायमन्यथा विवृणोति—बहुसम्मतत्वाद्वेति.

ऽथ कण्ठते ।

शोके यौ कण्ठयेत् कण्ठेत् कठेत् स्यात् कृच्छ्रजीवने ॥

अथशब्दः पूर्वार्थान्वयाशङ्कापरावृत्तिपरः । 'कठि शोके'[1] । 'कठ कृच्छ्रजीवने' । एष्वाद्योऽनुदात्तेत् ॥

गतिप्रतिहतौ शोठत्यालस्ये शोठयेदिति ।

'शुठ गतिप्रतीघाते' । शूठ इति क्षीरस्वामी । प्रतीघात इति धनपालः । तथा च 'कुठि च' इत्युत्तरधातौ कुण्ठ इत्यादौ प्रतिहतिमात्रं प्रतीयते । 'अनिशित इत्यर्थे' इति च स एवाह । 'शुठ आलस्ये' ।

शुण्ठयेच्छुण्ठतीत्येवं शोषणे णौ शपि क्रमात् ॥ ८० ॥

'शुठि शोषणे' । अत्र णौ क्षीरस्वामी — 'केचिदेनमे-कारन्तं पठन्ति । लक्ष्यतस्तदपि प्रमाणम्' इति । तदा शोठये-दिति पठितव्यम् ।

शठयेच्छठयेदेते द्वे सम्यगवभाषणे ।
गत्यसंस्कारधात्वर्थे शाठयेच्छाठयेदिति ॥ ८१ ॥
कैतवे शठतीति स्याच्छ्लाघायां शाठयेत णौ ।

'शठ श्वठ सम्यगवभाषण' इति मैत्रेयरक्षितः । कथादी । सम्यगाभाषण इति दुर्गः । सम्यगाभाषणे सम्यग्वचनक्रियाया-मिति क्षीरस्वामी । सम्यग् भाषण इति शाकटायनः । 'शठ श्वठ असंस्कारगत्योः' । 'श्वठि इत्येके' इति मैत्रेयरक्षितः । 'शठ कैतवे च' । चकारात् पिठ हिंसासंक्लेशनयोरित्युक्तावर्थौ गृह्येते ।

---

१. 'इह शोक आध्यानम्' इति माधवः. २. अनिदितमित्यर्थः.

क्षीरस्वाम्यादयः पुनश्चकारं नैव पठन्ति । 'शठ श्लाघायाम्' । चितादिः ॥

मण्ठते शपि शोकार्थे मठेन्मदनिवासयोः ॥ ८२ ॥

'मठि शोके' । 'मठ मदनिवासयोः' ॥

वण्ठते त्वेकचर्यायां स्थौल्ये शपि वठेदिति ।

'वठि एकचर्यायाम्' । अनुदात्तेत् । 'वठ स्थौल्ये' ।

मुण्डते मार्जने मुण्डेः खण्डने शपि मुण्डति ॥ ८३ ॥

'मुडि मार्जने' । 'शोधन इत्यर्थः' इति च धनपालः । मज्जन इत्यन्ये । तथा च क्षीरस्वामी—'मज्जनं शुद्धिर्न्यग्भावश्च' इति । 'मुडि खण्डने' । क्षीरस्वामीत्वाह—"अर्थभेदात् पुनः पाठः । अत एव 'मुडि खण्डनप्रमर्दनयोः' इति कैण्ठः । शुठीति कौशिकदुर्गौ । शुण्ठति" इति । 'मुट प्रमर्दन' इत्यत्रापि (ठा?) डान्तेन मुडीति पाठात् पुनः पाठः ॥

भूषार्थे मण्डतीति स्यात् तत्र मण्डयतीति णौ ।

---

१. मूलेऽर्थनिर्देशस्योपलक्षणतामाश्रित्यान्योऽपि परस्मैभाषः प्रमर्दनार्थो मुट-प्रसक्तावुक्तः क्षीरस्वाम्यनुसरणे सङ्ग्राह्यः स्यादित्येवं रूपं विशेषमाविष्कर्तुमाह—क्षीरस्वामीत्वाहेति. २. कण्ठः=सरस्वतीकण्ठाभरणं, तत्कर्त्ता भोजदेव इति यावत् । एतदन्तवाक्यानुवादेनोपपत्तौ 'शुठीति' इत्यादिकमधिकमनुवदन्नेवं मन्यते—सति शुठिपाठे खण्डनप्रमर्दनाभ्यां सह शोषणग्रहणस्याप्यत्रैव सुकरतया 'शुठि शोषण' इति पृथङ् न पाठ्यं स्यादिति युक्त्या यथायं शुठिपाठो न गणितोऽस्माभिः (८०श्लोके.), तथा मुडिपाठे सति प्रमर्दनेन सह खण्डनग्रहणस्यापि कर्तुं शक्यतया 'मुडि खण्डन' इति पृथङ् नापठिष्यतेति युक्त्या प्रमर्दनार्थे मुडिपाठोऽयं नादर्त्तव्य इति. ३. क्षीरस्वाम्युक्तोऽयं पुनःपाठः कस्य पठितस्येत्येतद् विवृणोति—मुटेति.

मण्डते वेष्टने

'मडि भूषायाम्' । णौ तु हर्षे चेत्यधिकम् । 'वडि वेष्टने मडि च' । क्षीरस्वामी त्वाह — "'वडि विभाजने । मडि च' । पृथक्सूत्रादर्थान्तरेऽपि । नन्दी तु 'वडि विभाजने । मडि वेष्टन' इति च भङ्क्त्वा पठति" इति । तच्चार्थान्तरं प्रयोगतोऽवगन्तव्यम् ॥

स्तुत्यामीड्ढे तत्रेडयेण्णिचि ॥ ८४ ॥

'ईड स्तुतौ' । आद्योऽदादिरनुदात्तेत् ॥

मन्थार्थे खण्डते खण्डेर्भेदार्थे खण्डयेण्णिचि ।

'खडि मन्थे' । स च मन्थनम् । 'खड खडि कडि भेदे' । तत्र च खडेत्यस्य खाडयतीति द्रष्टव्यम् ॥

हेडतेऽनादरे हेडेर्वेष्टने हिडयेन्मिथः ॥ ८५ ॥

होडतीति गतौ होडेर्होडतेऽनादरे पुनः ।

'हेडृ होडृ अनादरे' । अनुदात्तेतौ । 'हेड वेष्टने' । घटादिः । तत्र च भितां ह्रस्वो भवन् 'एच इग्घ्रस्वादेश' (१-१-४८) इतीगेव भवति । हेतुमण्णिच्त्वात्तु 'णिचश्चे' (१-३-७४) त्यात्मनेपदमप्यूह्यम् । अण्यन्तावस्थायां तु हेडतीति द्रष्टव्यम् । 'हुडृ होडृ गतौ' । हुडृ हूडृ इति धनपालशाकटायनौ । क्षीरस्वामीत्वाह — "'हूडृ हुडृ हौडृ गतौ' हूडति होडति हौडति । होडृ इति चन्द्रः । होडति" इति ॥

---

१. अस्य धात्वन्तरत्वे वा पूर्वपठितात्मनेपदिधात्वनुवादरूपत्वे वा परस्मैपदिपक्षौ निवेशादित्याशयः । अत्र माधवः — 'इहायमनृदित् पठ्यते, पूर्वस्त्वृदिदिति धात्वन्तरत्वं नाशङ्क्यं, यत ऋदितोऽननुवादेऽपि भित्त्वाद्ध्रस्वत्वेन भाव्यमित्युत्सृष्टानुबन्धोऽयमनुवादोऽनादरार्थस्य हेडतेः' इति.

कण्डयेदिति भेदे णौ मदे तु शपि कण्डते ॥ ८६ ॥

'कडि भेदे'। स चात्रावघातः। 'कडि मदे'। अनुदात्तेत्। कडेर्भूवादितुदाद्योः पाठात्[2] कडतीत्यपि भवति। क्षीरस्वामी तु भूवादौ परस्मैभाषमपि कडीत्येव पठित्वाह—'कडेति दुर्गः' इति ॥

लाडयत्युपसेवायां विलासे तु लडेच्छपि।

'लड उपसेवायाम्'। 'लड विलासे'। 'लड ईप्सायां वे'ति च क्षीरस्वामी। लळयोर्लडयोश्च कैश्चिदविशेषाश्रयणाल्लाळयति ललनेत्यपि भवति। घटादौ पुनः पठ्यते। 'जिह्वोन्मथने लडिः' इति। जिह्वाया उन्मथने[3] लडिर्मिङ्गवतीत्यर्थः। लडयति जिह्वाम्। कौमारास्त्वाहुः—'अन्ये जिह्वोन्मथने इति द्वन्द्वं[4] व्याचक्षते। तदा लडयति शत्रुमित्यपि भवति' इति। क्षीरस्वामी तु—"जिह्वोन्माथनयोर्लडिः'। लड विलास इत्ययं भूवादिर्जिह्वाविषयायां क्रियायामुन्माथे च मित्। लडयति जिह्वाम्। लडयति दधि। अन्यत्र लाडयति मित्रम्। जिह्वोन्मथन इति गुप्तः। 'जिह्वाशतान्यल्लडयत्यभीक्ष्णम्'" इति। धनपालस्तु—'जिह्वोन्मथने लडिः। आर्याणान्तु जिह्वान्मथनयोरिति पाठः' इति ॥

मृडेर्मृण्णाति सुखने तत्रैव मृडतीति शे ॥ ८७ ॥

'मृड सुखने'। क्र्यादिः तुदादिश्च। अन्ये त्वाद्यं 'मृद क्षोदे, मृड सुखने च' इति पठन्ति। तथाच 'गुध रुषि मृद

---

१. 'कड मदे' इत्येवंरूपात्. २. अस्योभयत्र पाठफलं तु 'स्वरभेदाद् द्विरुच्यत' इति (५९श्लो.) पूर्वोक्तनीत्यावगन्तव्यम्. ३. उन्मथनं=क्षोभणम्. ४. समाहारद्वन्द्वम्.

संक्षोदे मृड सुखनार्थे च कुन्थ संक्लेशे' इति श्लोकधातुपाठः । क्वचित्तु 'मृड च' इति क्षोदार्थतैव दृश्यते ॥

वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत् ।

'कुडि वैकल्ये' । शाकटायनः पुनष्टकारान्तमध्येऽमुमध्यैष्ट । क्षीरस्वामी त्वाह—'कुठीति कौशिकदुर्गौ । कुण्ठति कुण्ठः' इति । 'कुडि दाहे' । अनुदात्तेत् । 'कुडि रक्षणे' ॥

तोडनार्थे तुडेस्तुण्डेस्तुडेत् तोडति तुण्डते ॥ ८८ ॥

तुड्योस्तुण्डेश्च तुडेदित्यादि भवतीत्यर्थः । 'तुड तोडने' । तुदादिः । 'तुड़ तोडने' । तूड़ इति शाकटायनः । 'तुडि तोडने' अनुदात्तेत् । तच्च दारणं हिंसा [1]च । यदाहान्त्ययोः क्षीरस्वामी ॥

§कल्याणे [2]भण्डयेद्भण्डेः परिहासे तु [3]भण्डते ।
प्रेरणे जोडयेच्छे तु बन्धने जुडतीति च ॥ ८९॥

'जुड बन्धे' । तत्र चैवं यथापठितेऽर्थे जोडयेदिति जुडतीति च भवतीति वाक्यार्थसमुच्चये चकारो व्याख्येयः; न पुनर्बन्धन एव जोडयेदिति च भवतीति ॥

सङ्घाते पिण्डयेत् पिण्डेस्तत्रैव शपि पिण्डते ।

'पिडि सङ्घाते' । अन्त्योऽनुदात्तेत् ॥

---

१. 'च यदा' इत्यस्य स्थाने 'चेत्या' इति पठनीयं भाति. २. 'भडि कल्याणे'. ३. 'भडि परिभाषणे'. अनुदात्तेत्. तच्च परिहासः सनिन्दोपालम्भश्च । 'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम्' इत्यमरः । "'परिहास' इति देवः । 'परितो भाषणं पारिभाषणम्' इति स्वामी" इति माधवः.

---

§ इदमर्धं गपुस्तके न पठ्यते.

कणेः कणाति शब्दार्थे काणयेण्णौ निमीलने ॥ ९० ॥

कण शब्दार्थः । 'कण निमीलने' । घटादौ च 'कण रण गतौ' इति पठ्यते । तस्य तु हेतुमण्णिचि कणयेत् । शब्दार्थस्य तु काणयेदित्येव ॥

भूवाद्योर्घुणिघूर्ण्योः स्तां घोणते घूर्णते शपि ।
भ्रमणेऽत्र तुदाद्योः शे स्यातां घुणति घूर्णति ॥ ९१ ॥

'घुण घूर्ण भ्रमणे' । अत्रेति भ्रमण एवेत्यर्थः ॥

अणेरणाति शब्दार्थे प्राणने त्वण्यते श्यनि ।

अण शब्दार्थः । 'अण प्राणने' । अनुदात्तेत् । अनेति शाकटायनः । तवर्गान्तकाण्डं चैवमनुसृतं भवति ॥

मितः श्रणाति दानार्थे श्राणयत्यत्र णौ पदम् ॥ ९२ ॥

'चण शण श्रण दाने' । घटादयः । 'गताविल्येक' इति मैत्रेयरक्षितः । मित्फलं पुनः श्रणयतीति हेतुमण्णिचि ह्रस्वः । श्रण दाने' । विपूर्वश्चायं दृश्यते । 'विश्राणनं वितरणम्' इति ॥

व्रणेच्छब्दार्थविषये व्रणयेद् गात्रचूर्णने ।

'व्रण शब्दार्थः' । 'व्रण गात्रचूर्णने' । कथादिः ॥

आमन्त्रणे तु कुणयेच्छब्दे चोपकृतौ कुणेत् ॥ ९३ ॥

'कुण आमन्त्रणे' । कथादिः । 'कुण शब्दोपकरणयोः' । तुदादिः ॥

बन्धनेऽन्तति सातत्यगमनेऽतति

---

१. गत्यर्थस्यैव घटादावनुवादादिति भावः. २. 'अण रण वण' इत्यादिदण्डके पठितः. ३. अणरणादिदण्डकपठितः.

'अति अदि बन्धन' इति मैत्रेयरक्षितः । 'तान्तं द्रमिडाः पठन्ति । आर्यास्तु दान्तम् इति धनपालः' । क्षीरस्वामी तु अति अदीत्येव पठित्वा तथैव चोदाहृत्याह—"अतेः पाठोऽनार्षः । अन्ये 'अदि इति बन्धन' इति पेठुः । तनुयाञ्चकार[1]" इति । 'अत सातत्यगमने' ॥

चिन्तयेत् ।

स्मृत्यां चेताति संज्ञाने तत्र चेतयते णिचि ॥ ९४ ॥

'चिति स्मृत्याम्' । 'चिती संज्ञाने' । 'चित सञ्चेतने' । इति मैत्रेयरक्षितः । संवेदन इति बहवः ॥

कृणत्ति कृन्ततीत्येते वेष्टने छेदने क्रमात् ।
कीर्त्तयेदिति संशब्दे

'कृती वेष्टने' । रुधादिः । 'कृती छेदने । मुचादिः' । 'कृत[2] संशब्दने' । 'उपधायाश्च' (७-१-१०१) इतीत्वं रपरत्वं च । 'उपधायां च' (८-२-७८) इति दीर्घः ॥

गत्यर्थे पतयेत् पतेत् ॥ ९५ ॥

'पत गतौ वा' । कथादिः । केचित् तु वेति न पठन्ति । तथैव[3] च 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (३-२-१५८) इत्यत्र वृत्तौ[3] दृश्यते । वापाठे तु सति यावदुपयुक्तं वृत्तिकृता पठितमिति[4] कल्पनीयम् । तत्र च वापाठपक्षे तस्य णिज्विकल्पार्थत्वात् पतेत्यस्य पतयेत् पतेदिति भवति;' पतॢ गतौ,

---

१. 'इन्ताञ्चकार' इति पाठः स्यात्. २. 'पत गतौ' इत्येवेत्यर्थः. ३. काशिकायाम्. ४. वाशब्दस्तु प्रकृतानुपयोगान्न पठित इति तात्पर्यम्.

इत्यस्य तु पतेदित्येवेति। विकल्पफलं पुनर्लुङादावपतीत्। पताञ्चकार। अपप्तत्। पपातेत्यादिषु द्रष्टव्यम्। तत्र च पतामित्यत्र 'कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' इति वार्तिकेनाम्। अपप्तदित्यत्र लृदित्त्वादङ्। 'पतः पुम्' (७-४-१९) इति पुम्॥

यतते तु प्रयत्नार्थे निराकारे तु यातयेत्।

'यती प्रयत्ने'। 'यत निकारोपसंस्कारयोः'। निराकार इति तु पाठो दृश्यते। 'निराकारः परिभव' इति च क्षीरस्वामी। उपस्कारोपसंस्कारयोः पुनः *पाठकृतो विप्रवदन्ते। तथा चाख्यातनिघण्टुः—'यत्ने प्रैषे निराकारे यातयेदप्युपस्कृतौ' इति। श्लोकधातुपाठश्च—'यत उपसंस्कारनिकारार्थः स निरश्च धान्यधनवाची' इति॥

वर्तयेद् भाषणार्थे णौ वर्तने शपि वर्तते॥ ९६॥

वृतु भाषार्थः। 'वृतु वर्तने'। अनुदात्तेत्॥

ग्रथ्नातीति तु सन्दर्भे ग्रन्थयेद् ग्रन्थतीति यौ।
कौटिल्ये ग्रन्थते ग्रन्थेर्ग्रथयेद् ग्रथति ग्रथेः॥ ९७॥

'ग्रन्थ सन्दर्भे'। क्र्यादिः। 'अनिदिताम्' (६-४-२४)इति नलोपः। 'श्रन्थ ग्रन्थ सन्दर्भे'। 'ग्रथि कौटिल्ये'। अनुदात्तेत्। 'ग्रथ बन्धने'। युजादिः॥

---

५. अणिच्ककथादेर्भ्वादेश्च रूपे को विशेष इत्याकाङ्क्षायामाह—विकल्पफलमिति. २. परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः. ३. धान्यधनविषयक्रियावाचीत्यर्थः। ऋणं निर्यातयतीति यथा. ४. एतदनुवादे 'णौ वर्तयति भाषार्थे' इति पाठो दृश्यते १३१ श्लोकविवरणे.

---

*'पाठका' इति गपुस्तके पाठः.

हिंसासंक्लेशयोर्मन्थेन्मथेन्मथ्नाति लोडने ।

[1]मथि हिंसासंक्लेशयोः । क्षीरस्वामी तु मन्थेति पठित्वा [2]मथ्यत इति चोदाहृत्य 'माथि इति दौर्गाः । मन्थ्यत' इत्याह । 'मथे विलोटने' । 'मन्थ विलोटने' । क्र्यादिः । भूवादौ चामुं मैत्रेयरक्षितः पठति । चन्द्रदुर्गौ च । §तदा मन्थेदित्येतद्विलोटनेऽप्यावृत्त्या कामं व्याख्यायताम् ॥

कुथ्नाति कुन्थेत् संक्लेशे पूतीभावे तु कुथ्यति ॥ ९८ ॥

'कुन्थ संक्लेशे' । क्र्यादिः । संश्लेषणे इत्येके । तथा च 'संश्लेषणे संश्लेषणक्रियायाम्' इति क्षीरस्वामी । कुथि हिंसासंक्लेशयोः । कुथ पूतिभावे । दिवादिः ॥

प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः ।
पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः ॥ ९९ ॥

'प्रथ प्रख्याने' । आद्यो घटादिरनुदात्तेत् । तत्र च हेतुमण्णिचि मित्त्वाद्ध्रस्वे प्रथयति । अन्ये तु 'नान्ये मितः' इत्यमित्त्वान्न ह्रस्वः । 'प्रथ प्रक्षेपे' । केचित् पुनर्घटादौ च पृथिं पठन्ति । तथा च क्षीरस्वामी—"पृथु विस्तारे । पर्थति । 'प्रथेः षिवन् सम्प्रसारणं चे'ति प्रथेः सम्प्रसारणविधानादनार्षममुं मन्यन्ते" इति । 'यदप्रथयत् तत् पृथिव्यै पृथिवित्वम्' । इत्यस्य [3]श्रौतस्य

१. 'कुथि पुथि लुथि मथि मान्थि हिंसासंक्लेशयोः' इत्यत्र पठितः । मान्थिस्तु न दृश्यते सिद्धान्तकौमुद्याम्. २. अनिदितामिति नलोपादिति भावः. ३. श्रुतिसिद्धस्येत्यर्थः । उदाहृतं च वाक्यं तैत्तिरीयब्राह्मणे प्रथमाष्टके प्रथमप्रश्ने तृतीयानुवाकेऽस्ति.

§'तथा' इति गपुस्तके पाठः.

निर्वचनस्यानार्षपक्ष एवाञ्जस्यम् । अन्यथा हि यदपर्थयदित्येव निर्ब्रूयात् । सर्वथापि प्रथेर्घटादिपाठे तत्फलं 'घटादयः षित' इति षित्त्वादङि सति प्रथेति रूपं द्रष्टव्यम् । येऽमी घटादय आत्मनेपदिनः पठितास्ते षिद्वद् भवन्तीत्यर्थः ॥

क्रथत्ययौ यौ हिंसायां क्राथयेत् क्रथते क्रथेत् ।

'श्रथ श्लथ क्रथ क्लथ हिंसार्थाः' । घटादयः । 'क्रथ हिंसायाम्' । स्वरितेत् । शाकटायनस्य तु परस्मैपदी । अपरे पुनरेनं न पठन्ति । तथा च 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' (२-३-५६) इत्यत्र चोरयोत्क्राथयतीत्यत्र निपातनाद्वृद्धिरिति वृत्तिः । सति हि चौरादिके 'नान्ये मित' इति मित्त्वनिषेधादयत्नसिद्धा वृद्धिर्न निपातनसाध्या ॥

पुथ्येत् पुन्थति हिंसार्थे भाषार्थे पोथयेदिति ॥ १०० ॥

'पुथ हिंसायाम्' । दिवादिः । पुथि हिंसासंक्लेशयोः । पुथ भाषार्थः ॥

दौर्बल्ये श्रथयेत्प्रयत्नविषये स्याच्छ्राथयेन्मोक्षणे
यौ तु श्राथयति श्रथत्यपि च वा णौ श्रन्थयेच्छ्रन्थति ।
सन्दर्भे श्नि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते
शैथिल्ये-

---

१. अयुजादौ. २. स्वरितेत्त्वादेव णिजभावपक्षे पदद्वयमुदाहृतं 'क्रथते क्रथेद्' इति. ३. नाटसाहचर्याद्व्याख्यानाच्च निपातनं णिज्विषयम्, घटादिपाठस्तु मित्त्वेन 'चिण्णमुलोः' (६-४-७३) इति दीर्घार्थः, पाठे ह्रस्वोच्चारणं च दीर्घणिचोरभावे श्रवणार्थमिति वृत्त्याशयः.

'शॄर कृप श्रथ दौर्बल्ये '। कथादयः । 'श्रथ प्रयत्ने' । इति मैत्रेयरक्षितः । प्रतिहर्ष इति बहवः । 'श्रथ मोक्षणे' । 'श्रथ हिंसायाम्' इत्यपरे । तथा च 'श्रथ क्रथ हिंसु हिंसायाम्' इति शाकटायनः । 'श्रन्थ ग्रन्थ सन्दर्भे' । 'श्रन्थ विमोचनप्रतिहर्षयोः' । ये तु 'श्रन्थ ग्रन्थ सन्दर्भ' इत्यपि क्र्यादौ पठन्ति, तथा च 'सन्दर्भे श्रन्थनक्रियायां श्रन्थग्रन्थधातू वर्तेते' इति क्षीरस्वामी; तेषां सन्दर्भ इत्येतद्यथाश्रुतं श्रन्थातीत्यनेनैव सम्बन्धनीयम् । वा णौ इत्यनेनैव पूर्वधातोरवच्छेदः† सिद्धः । 'श्रथि शैथिल्ये' ॥

ऽथ पथेर्गतौ पथति णौ पन्थेर्गतौ पन्थयेत् ॥ १०१ ॥

'पथे गतौ' । एवं च 'पथेर्गतौ' इत्यत्रापि काममस्यैवैकारस्य पूर्वरूपम् । तत्फलं पुनरपथीदित्यत्र 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' (७-२-५) इति वृद्ध्यभावसंसूचनं । 'पथि गतौ' ॥

क्लिन्दते क्लिन्दतीत्येवमिदितः परिदेवने ।
क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत् ॥ १०२ ॥

'क्लिदि परिदेवने' । अकर्त्राभिप्राये कर्त्राभिप्राये च क्रियाफले द्वैरूप्यार्थो द्विपाठः । एवञ्च 'इदितोः परिदेवन' इति पठितुं युक्तम् । 'क्लिदू आर्द्रीभावे' । ऊदित्त्वफलं तु क्लेत्ता क्लेदिता

---

१. दन्त्यादित्वेनापि पाठो दृश्यते. २. पाठेऽस्मिन्नरुचिस्तु रूपभेदाभावेन विमोचनप्रतिहर्षाभ्यां सहैव सन्दर्भग्रहणे कार्ये पृथक् पाठो न कर्तव्य इति । अत एव 'ग्रन्थ सन्दर्भ' इत्येव तत्प्रसक्तावुक्तम्. ३. 'ङसिङसोश्च' (६-१-११०) इति. ४ एकारान्तानुकरणफलम्. ५. एक एव धातुः पदद्वयवानुदाहृत इति भ्रमानुत्पादायेति शेषः.

---

†'दासिद्धे' इति गपुस्तके पाठः.

इत्यादौ 'स्वरतिसूतिसूयती'ति (७-२-४४) इड्विकल्पः; न पुनः पाठशुद्ध्या पदशुद्धिरेव। वक्ष्यति च 'इटा भिदेति'[1] ॥

आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्णिचोः।

'ष्वद ष्वर्द आस्वादने'। अनुदात्तेतौ। 'ष्वद आस्वादने'। विस्तृतश्चायं 'भाषार्थे यौ तु लोकयेद्'[2] इत्यत्र। यस्तु स्वाद आस्वादन इत्येव भूवादावपि पठ्यते, तस्य तङि स्वादत इति द्रष्टव्यम् ॥

अर्दयेदर्दतेऽर्देर्द्यौ हिंसनेऽर्दति याचने ॥ १०३ ॥

'अर्द हिंसि हिंसायाम्'। आद्यः स्वरितेत्। शाकटायनस्य त्वात्मनेपदी। 'अर्द गतौ याचने च' ॥

मेदते मेद्यतीत्येते स्नेहने मिन्दयेण्णिचि।
ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥ १०४ ॥

'ञिमिदा स्नेहने'। भूवादिर्दिवादिश्च। 'मिदेर्गुणः' (७-३-८२) इति गुणः। 'मिदि स्नेहने'। क्षीरस्वामी तु 'मिद स्नेहने। मेदयती'त्युक्त्वा 'कैश्चिदिदित् पठ्यते' इत्याह। 'मिद मेद मेधाहिंसनयोः'। थान्तावेतावित्येके। व्यक्तं चैतत् क्षीरस्वामिवृत्तौ। धान्तावपरे। तथा च 'षिद्भिदादिभ्योऽङ्' (३-३-१०४) इत्यत्र मेधाशब्दव्युत्पादने जिनेन्द्रः पपाठ। भोजदेवस्तु 'रिखिलिखिशुभिसिधिमिधिगुधिभ्यो गुणश्च' इत्यङ्विधौ मिधेर्गुणं च विदधद् मेधिं नानुमन्यते। कौमाराश्चात्रैवानुकूलाः। तत्र च रिखिः सौत्रो लिख्यर्थः। सेधा सत्त्वम्। गोधा प्रकोष्ठत्राणम्। शिष्टं स्पष्टम्। सर्वथापि 'प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे' इत्येवात्रा-

---

१. ११९ तमश्लोके. २. ४० श्लोके.

त्राप्युभयाविवक्षायामृदितोरिति युक्तं पठितुम् । 'इदितः परिदेवने' इत्यत्रैव वा जात्याख्यायामेकवचनम् । ऋदित्त्वफलं तु 'णौ चङ्युपधाया ह्रस्वः' (७-४-१) इति ह्रस्वेनामीमिददिति प्राप्ते 'नाग्लोपिशास्वृदिताम्' (७-४-२) इति निषेधादभिमेददिति रूपम् ॥

आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥ १०५ ॥

'कदि क्रदि क्लदि आह्वाने रोदने च' । 'कदि क्रदि क्रद क्लद वैक्लव्ये' । क्षीरस्वामी तु 'कदि क्रदि क्लदि वैक्लव्ये' इत्युक्त्वा 'वैकल्य इति चन्द्रः । कद क्रद क्लदेति नन्दी' इत्याह । सर्वथापि क्लन्द्यादेरपि क्लन्दतीत्यादि यथार्हमूह्यम् ।

अथ मितोरिति किमर्थं, नहि तावद्ध्रस्वार्थं, 'नुंविधावुपदेशिवद्वचनम्' इति वार्तिकाद् 'इदितो नुं धातोः' (७-१-५८) इति धातुग्रहणबलादेव वा धातुसंज्ञासमनन्तरमेव नुमि कृतेऽका-

---

१. एवञ्चार्थनिर्देशे न यथाश्रुतं श्लोके. २. एते घटादयः. ३. आदिना क्लदते क्रदते. ४. उन्द्यादेर्नकार इव नुम् इदितो धातोरुपदेशावस्थायां सान्निहितो वक्तव्य इति वार्तिकार्थः । तेनाङ्गोऽपि नुम भाविन्यङ्गत्वे पूर्वमेव भवतीति 'कुण्डा हुण्डा' इत्यादौ 'गुरोश्च हलः' (३ ३-१०३) इत्यप्रत्ययो गुरुमत्त्वसम्पत्त्या सिध्यति. ५. तासिसिचोरिदित्त्वाभावेऽपि 'मन्ता अमंस्त' इत्यादौ 'अनिदिताम्' (६-४-२४) इति प्राप्तुवन्नुपधानकारलोपो डादेशनिमित्तस्य टिलोपस्याभीयासिद्धत्वात्, 'हनः सिच्' (१-२-१४) इति सिचः कित्त्वविधानेन 'आहसाताम्' इति नलोपार्थेन सिजाश्रयोपधानलोपाभावज्ञापनाच्च वारयितुं शक्य इत्यत इकारवैयर्थ्ये स्थिते उच्चारणमात्राय च 'च्लेः सच्' 'स्यतासौ' इत्येवमकारस्य पाठे प्राथम्यान्न्याय्ये तावतैव 'अच्छैत्सीत्' इत्यादौ नुमागमाप्रसङ्गाद्धातोरिदितो व्यावर्त्यस्यालाभाद् धातुग्रहणमचारितार्थं सद् धातूपदेशावस्थोपलक्षणार्थं विज्ञायते; तथा च भाष्यं — 'धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुंविधानम्' इति । तेन वार्तिकफलस्य सूत्रत एव सिद्धेराह — **धातुग्रहणबलादेव वेति.**

रस्यानुपधात्वेन 'अत उपधाया' (७-२-११६) इति वृद्धेरभावाद्ध्रस्वविधेर्वैयर्थ्यात् । न च 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (६-४-९३) इति दीर्घार्थः, 'ऊदुपधाया गोहः' (६-४-८९) इत्यत उपधाया इत्यत्रानुवृत्तेरुपधाया एव मितां ह्रस्वदीर्घयोर्विधानाद्, अत्र चानुपधात्वात् । न च घटादिपाठबलादनुपधात्वेऽपि दीर्घः सिध्यति । पित्त्वार्थतयापि पाठोपपत्तेरित्यत आह —

मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥

पित्त्वं खल्वङि कन्दा क्रन्देति रूपार्थम् । तयोश्च 'गुरोश्च हलः' (३-३-१०३) इत्यप्रत्ययेनैव सिद्धेर्मित्त्वार्थ एवायं पाठ इति तद्बलादनुपधात्वेऽपि अक्रान्दि अक्रन्दि क्रान्दं क्रन्दम् । अक्रान्दि अक्रन्दि क्रान्दं क्रन्दमिति वैकल्पिको दीर्घः सिध्यतीत्यर्थः । एवं क्लन्देरप्यूह्यम् ॥

गात्रप्रक्षरणे स्विद्येत् स्वेदते स्नेहमोकयोः* ।

'ष्विदा गात्रप्रक्षरणे' । दिवादिः । तथा च 'निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः' (१-२-१९) इत्यत्र हरदत्तः — ञिष्विदा स्नेहनमोचनयोरित्यस्य भौवादिकस्य ञीतो ग्रहणं । न तु ष्विदा गात्रप्रक्षरण इत्यस्य दैवादिकस्य, ञीद्भिः साहचर्यात् । अस्य चाञीत्त्वाद्' इति । 'ञिष्विदा स्नेहनमोचनयोः' । अनुदात्तेत् । क्षीरस्वामी तु 'ञिक्ष्विदा' इति क्षकारादिं पठित्वाह—'ञिष्विदेति नन्दी' इति ॥

क्ष्वेदत्यव्यक्तशब्दार्थे क्ष्विद्याति स्नेहमोक्षयोः ॥ १०७ ॥

---

*'मोक्षयोः' इति गपुस्तके पाठः.

'ञिक्ष्विदा अव्यक्ते शब्दे' । 'ञिक्ष्विदा स्नेहनमोचनयोः' । दिवादिः । मोहनयोरित्यपि बहुषु ग्रन्थेषु दृश्यते ॥

ज्वलादेश्च तुदादेश्च सीदेद् विशरणादिके ।
पद्यतेरर्थ आसीदेदासादयति चाङि यौ ॥ १०८ ॥

'षद्लृ विशरणगत्यवसादनेषु' । तुदादावप्येवमेव धनपालः । विशरण इत्येव मैत्रेयरक्षितो दुर्गश्च । 'विशमृशणुदप्रवेशामर्शक्षेपेषु षद्लृ विशरणार्थः' इति च श्लोकधातुपाठः । अवसादन इत्येव क्षीरस्वामिशाकटायनौ । अत्र च ज्वलादित्वात् सीदतीत्यर्थे साद इति पक्षे णः । अन्यदा[§] सद इति पचाद्यजेव । तुदादित्वफलं तु स्वरभेदनुंविकल्पौ पूर्वोक्तावेव च द्रष्टव्यौ । 'आङः षद पद्यर्थे' । आङः परः षदधातुः पदेरर्थे गतावन्यत्रापि यथाप्रयोगं विकल्पेन णिचमुत्पादयतीत्यर्थः । आङीति चाङ्युपपदे । तत्र[1] चासीदेदित्यन्यो[2]ऽयं मन्यामहे । शदिसहचरितयोर्ज्वलादितुदाद्योरेव सद्योः सीदादेशस्य न्याय्यत्वात् । तथा च तद्विधौ तावेव न्यासकृता पठितौ—'षद्लृ विशरणगत्यवसादनेष्विति भौवादिकः । षद्लृ विशरणे तौदादिकः' । इति ॥

व्यक्तवाचि वदेद्वा णौ वादयेद् वदते वदेत् ।
सन्देशे

'वद व्यक्तायां वाचि' । 'वद सन्देशे' । स्वरितेत् । शाकटायनस्य तु आत्मनेपदी । यदाह—'वदि सन्देशवचने' इति ।

---

१. तत्र=तयोर्युजाद्युदाहरणयोः. २. आसदादिति तु न्याय्यमित्यभिप्रायः.
३. साहचर्यं च धातुपाठे.

---

§ 'अन्यथा' इति गपुस्तके पाठः.

धनपालस्तु 'पद† सन्देशवचने पादयति पदति । [1]अन्यत्र प(द्य?) दयते' इति । वदि अभिवादनस्तुत्योरित्यस्य च वन्दत इति द्रष्टव्यम् ॥

श्यानि गत्यर्थे पद्यते पदयेत णौ ॥ १०९ ॥

'पद् गतौ' । दिवादिः कथादिश्च । आगर्वादित्वात् तङ् ॥

णौ देवशब्दे गदयेद् व्यक्तवाचि गदेच्छपि ।

'स्तन गदी देवशब्दे' । स च पर्जन्यध्वनिः । स्तनश्च गदिश्च स्तनगदी इत्यदन्तोपदेश एव गदिः । 'इक्श्तिपौ धातुनिर्देशे वक्तव्यौ' इतीक्प्रत्ययं कृत्वा अतो लोप इत्यल्लोपेनात्र निर्दिश्यत इत्याहुः । 'स्तन गद' इत्येव चन्द्रः । केचित्तु गादिमीदितमेवेच्छन्तः कथादिकाण्डपाठबलादेवादन्तत्वं कल्पयन्ति । तथा च 'स्तन गदै इति' शाकटायनः । तन्मते तु 'कथादिपाति' इत्यक् । 'गद व्यक्तायां वाचि' ॥

नदत्यव्यक्तशब्दार्थे भाषार्थे नादयेदिति ॥ ११० ॥

'णद अव्यक्ते शब्दे' । णद भाषार्थः । 'टुनदि' इत्यस्य नन्दतीति द्रष्टव्यम् ॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दतीत्येवं लाभे वेदयते णिचि ॥ १११ ॥

'विद सत्तायाम्' । दिवादिरनुदात्तेत् । 'विद ज्ञाने' । अदादिः । 'विद विचारणे' । रुधादिः । 'विद् लाभे' । मुचादिः ।

---

१. कथादावागर्वीये २. लजिप्रसङ्गे विवृतमेतत्.

---

† धनपालवाक्यस्थानां पकाराणां स्थाने वकारा एव पठ्यन्ते घपुस्तके.

इरित्पाठः पुनः प्रामादिकः। तथा च सर्वैर्लुङि अविददिति नित्य एवाङ् उदाजह्रे। 'विद चेतनाख्याननिवासेषु'। चितादिः। निपातनेष्विति धनपालशाकटायनौ ॥

दैन्येऽर्थे खिद्यते खिन्ते परिघाते तु खिन्दति।

'खिद दैन्ये'। दिवादिः रुधादिश्च। 'खिद परिघाते'। मुचादिः। §"परितापे परितापनक्रियायामि'ति क्षीरस्वामी ॥

स्तुत्यादौ मन्दते हर्षे माद्येन्मादयते णिचि ॥ ११२ ॥

'मदि स्तुतिमोदमदस्वप्नगतिषु'। अत्र क्षीरस्वामी— "स्वप्नेनालस्यं लक्ष्यते। चन्द्रस्तु 'मदि जाड्ये' इत्येवाह" इति। 'मदी हर्षे'। 'शमामष्टानाम्' (७-३-७४) इति दीर्घः। 'मद तृप्तियोगे'। चितादिः। तृप्तिशोधन इत्यन्ये। तथा च 'तृप्तिशोधने तर्पणशुद्धौ' इति क्षीरस्वामी। हर्षयति ग्लपयति वेत्याद्यर्थे तु मदयति मदयत इति भवति। 'मदी हर्षग्लेपनयोः'† इति घटादौ पठ्यते। अत्रार्थे माद्यतिर्मित् स्यादित्यर्थः ॥

यौ वा णावपवारणे छदत इत्येकं द्वितीयं छदेदन्यच्छादयतिच्छदेदिति पुनः स्यादूर्जनेऽर्थे मितः।
यत्तुच्छन्दयतीति णौ नुमि पदं तत् संवृताविष्यते

'छद अपवारणे'। स्वरितेत्। शाकटायनस्य तु परस्मैपदी। 'छदिरूर्जने'। घटादिः। तच्च बलनं प्राणनं वा। अत्र च 'धात्वन्तराभ्युपगमे दरतीत्येके' इत्यादिपूर्वोक्तरीत्यनुसारेण छदे-

१. ग्लेपनयोरिति पठित्वा 'ग्लेपनं दैन्यम्' इति माधवः. २. इदं च षट्त्रिंशश्लोकव्याख्याने द्रष्टव्यम्.

§ 'परिघाते' इति गपुस्तके पाठः. † 'ग्लापनयोः' इति गपुस्तके पाठः.

दित्युक्तम् । क्षीरस्वामिमैत्रेयरक्षितौ तु 'छद अपवारणे' इति यौजादिकस्यैवच्छदेरूर्जने छदयतीति मित्त्वार्थो घटादौ पाठ इत्याहतुः । 'छदि संवरणे' । 'छदेति तु बहवः । उरश्छदो दन्तच्छद इत्युदाजहार च क्षीरस्वामी । शाकटायनः पुनरात्मनेपदिष्वमुं‡ पपाठ ॥

संसर्गे णिचि मोदयेदिति भवेद्धर्षे पुनर्मोदते ॥ ११३ ॥

'मुद संसर्गे' । 'मुद हर्षे' । अनुदात्तेत् ॥

प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे ।
कुत्सायां सन्निकर्षे वा कुत्सामात्रे तु निन्दति ॥ ११४ ॥

'णिद णेद कुत्सासन्निकर्षयोः' । रूपभेदस्तु निनिदे निनेदे इत्यादौ व्यक्तः । 'णिदि कुत्सायाम्' ॥

छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्नमि ॥ ११५ ॥

'छृदी स्थाने' छृदेति धनपालशाकटायनौ । तत्र चाद्ये छृण्णमन्त्ये छृदितमिति फलभेदः । क्षीरस्वामिनस्तु पकारान्तोऽयम् । यदाह—"'चृप छृप तृप दृप सन्दीपने' । संदीप्तिक्रियायां चृपादयश्चत्वारो धातवो वर्त्तन्ते । चर्पयति छर्पयति" इत्यादि । 'उच्छृदिर् दीप्तिदेवनयोः' ॥

सिधेः सिध्यति संराद्धौ सेधतीत्युदितो गतौ ।
शास्त्रमाङ्गल्ययो रूपमूदितस्तदिटा भिदा ॥ ११६ ॥

---

१. 'श्वीदितो निष्ठायाम्' इतीटो निषेधात्.

---

‡ 'ष्वप्यमुम्' इति घपुस्तके पाठः.

'षिधु संराद्धौ' । 'षिधु गत्याम्' । एवमेव च बहवः । न्यासे तु 'एकाच उपदेशेऽनुदात्तात्' (७-२-१०) इत्यत्र 'अस्योदित्त्वमेनार्षम्' इति स्थितम् । तत्र चोदित्त्वे 'उदितो वा' (७-२-५६) इति क्त्वायामिड्विकल्पात् सिद्धा सिधित्वा सेधित्वेति भवति । अनुदित्त्वे तु स्वतः प्राप्तनित्येट्त्वमेवावतिष्ठते इति सिद्धेति न भवति । अत्र च 'रलोव्युपधाद्धलादेस्संश्च' (१-२-२६) इति किद्वद्भावविकल्पात् पक्षे गुणः । 'षिधू शास्त्रे माङ्गल्ये च' । 'शासनं शास्त्रमि'ति मैत्रेयरक्षितः शाकटायनश्च । 'षिधू शिष्टौ' इत्येव च चन्द्रः । 'शास्त्रं शास्त्रविषयं शासनम् । माङ्गल्यं मङ्गलविषया क्रिया' इति क्षीरस्वामी । शासनाद्धि शास्त्रमिति शास्त्रविषयक्रियापि शासनमेवेत्याशयः । तादिति सेधतीत्येतदेवेत्यर्थः । इटा भिदेति सेद्धा सेधितेत्यादौ 'स्वरतिसूति' (७-२-४४) इति इड्विकल्पेनास्य पूर्वस्मात् सिधेर्भेद इत्यर्थः ॥

शुन्धयेच्छुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि ।
शुद्धौ शुन्धति भूवादेः शुधेः शौचे तु शुध्यति ॥ ११७ ॥

'शुन्ध शौचकर्मणि' । स्वरितेत् । शाकटायनस्य त्वात्मनेपदी । 'शुन्ध शुद्धौ' । 'शुध शौचे' । दिवादिः ॥

शर्धते शब्दकुत्सायामुन्दे शर्धति शर्धते ।
हिक्कादौ शर्धयत्यस्य शृधेः प्रसहने णिचि ॥ ११८ ॥

'शृधु शब्दकुत्सायाम्' । सा च पायुशब्दत्वादिति क्षीरस्वामी । 'शृधु मृधु उन्दे' । स च क्लेदः । हिक्कादित्वं पुनरुभयप-

---

१. 'षिध गत्याम्' इति निरुकार एव पाठः सिद्धान्तकौमुद्याम् .

दित्वे हेतुः । भूवादौ 'हिक्क अव्यक्ते शब्दे' इत्यारभ्य केचित् स्वरितेतः पठ्यन्ते । तेषु चायं श्रृधिः । 'श्रृधु प्रसहने' ॥

बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम् ।
बुधिरो बोधनार्थस्य बोधते बोधतीत्यपि ॥ ११९ ॥

'बुध अवगमने' । दिवादिर्भूवादिश्च । 'बुधिर् बोधने' । क्षीरस्वामी तु 'बुध' इति पठित्वा 'बुधिरिति नन्दी' इत्याह ॥

बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।
यत्तु बीभत्सते तत् स्याद् वैरूप्येऽर्थे बधेः सनि ॥

अपरे पुनः पठन्ति —

[बध्नन् बीभत्सते बन्धे बाधयेदिति संयमे ।]

'बन्ध बन्धने' । क्र्यादिः । 'बध संयमने' । 'बध बन्धने' । 'गुप्तिज्किद्भ्यः सन्' (३-१-५) 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३-१-६) इति सन् । अभ्यासेकारस्य च 'सन्यतः (७-४-७५)इति कृतस्य दीर्घः । संश्चास्माद्वैरूप्य इष्यत इत्याहुः । तच्च बीभत्सैव । एवं च बन्धे इत्यपि बन्धे पठितस्येत्यर्थः । अत्र च सन्नन्तस्याप्यवयवद्वारानुदात्तेत्त्वादात्मनेपदम् । तद्वारा हि समुदाय एव गवादाविव लिङ्गमासज्यते । गुपादीनां त्रिमुनिसम्मतेन नित्यसन्नन्तत्वेन केवलेषु गोपत इत्यादेस्तत्फलस्याभावात् जुगुप्सादेश्च समुदायस्यानुपदेशात् । न च नित्यसन्नन्तत्वे वृत्त्युक्तं गोपयतीत्यादि न सिध्येत् । यथासम्भवं प्रकृत्यन्तरात् स्वार्थाणि-

१ आदिना तेजयत्यादिपरिग्रहः. २. अन्या भूवादौ पठिता 'गुप गोपन' इत्याद्या नित्यसन्विषया प्रकृतिः, अन्या च चुरादौ पठिता भूवादौ चार्थान्तरे पठितेत्याशयः.

जादिना तत्सिद्धेः । व्यक्तं चैतत् 'पूर्ववत् सनः' (१-३-६२) इत्यत्र भागवृत्तौ ॥

गुधेर्गुध्नाति रोषेऽर्थे गुध्येत्तु परिवेष्टने ।

'गुध रोषे' । क्र्यादिः । 'गुध परिवेष्टने' । दिवादिः ॥

रुन्धे रुणद्ध्यावरणे कामेऽनावनुरुध्यते ॥ १२१ ॥

'रुधिर् आवरणे' । 'अनौ रुध कामे' । दिवादिः । अनुदात्तेत् । अनावित्यन्वित्युपसर्गे सति ॥

राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात् ।

'राध साध संसिद्धौ' । 'राधोऽकर्मकाद्वृद्धावेव' । राधेरकर्मकाच्छ्यन् इत्येतावानेवात्र विवक्षितोऽर्थः । वृद्धिग्रहणन्त्वकर्मकक्रियोदाहरणमात्रम् । एवमकारश्चैवमर्थात् सिद्धाया व्यावृत्तेरनुवादमात्रम् । तथा च 'कर्मवत् कर्मणा तुल्यक्रियः' (३-१-८७) इत्यत्र भाष्यम्—'राध्यत्योदनः स्वयमेव' इति । अत्र हि सिध्यतीत्यर्थः; नतु नदी राध्यतीतिवद् वर्धत इति । तथैव 'राधीक्ष्योर्यस्य विप्रश्नः' (१-४-३९) इत्यत्र वृत्तिः । 'देवदत्ताय राध्यति । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः' इति ॥

ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि ॥ १२२ ॥

'ऋधु वृद्धौ' । आद्यः स्वादिः ॥

गृधेर्गृध्यति काङ्क्षायां गर्धेस्तत्रैव गर्धयेत् ।

'गृधु अभिकाङ्क्षायाम्' । दिवादिः । 'गर्ध अभिकाङ्क्षायाम्' ॥

---

१. वक्ष्यमाणभाष्यवृत्त्यानुगुण्याय यथाश्रुतान्वयपरित्यागेन व्याचष्टे—राधेरिति. २. सकर्मकव्यावृत्तेरित्यर्थः । एवञ्चैवकारस्य भिन्नक्रमतया 'अकर्मकाद्' इत्यनेनान्वयः फलितः. ३. दैवस्य कर्मणो धात्वर्थेऽन्तर्भावादकर्मकत्वं द्रष्टव्यम् .

छेदने पूरणे चार्थे वर्धेर्वर्धयतीति णौ ॥ १२३ ॥
तदेव रूपं भाषार्थे वृधेर्वृद्धौ तु वर्धते ।

'वर्ध च्छेदनपूरणयोः' । वृधु भाषार्थः । 'वृधु वृद्धौ' । अनुदात्तेत् ॥

याचने वनुते शब्दे सम्भक्तौ च वनेदिति ॥ १२४ ॥
क्रियासामान्यवृत्तेश्च तदेव स्यात् पदं मितः ।

'वनु याचने' । तनादिः । 'वनोति वनुतः वन्वन्ति । ववान ववनतुः ववनुरिति चान्द्रा उदाहरन्ति' इति ब्रुवन्मैत्रेयरक्षितः परस्मैपदिनञ्चैनं मेने । 'ष्टन वन शब्दे । 'वन षण सम्भक्तौ' । 'अर्थभेदाद्विष्पाठ' इति मैत्रेयरक्षितः । 'ष्टन ध्वने'ति तु क्षीरस्वामी । 'कगे नोच्यते' । 'वनु [1]च नोच्यते' । अस्यायमर्थ इति नोच्यते । क्रियासामान्यमस्यार्थ इति यावत् । 'इह शास्त्रे नोच्यत' इत्येके' इति मैत्रेयरक्षितः । शास्त्रान्तरात् प्रयोगोऽस्यावगन्तव्य इति यावत् । क्षीरस्वामी तु—'अस्यायमर्थ इति नोच्यते' । अनेकार्थत्वान्नोच्यत इति योऽर्थस्तत्रार्थे कगिरित्येके' इति । [2]अन्त्ये तु स एवाह—'क्रियासामान्यवाचित्वान्नोच्यते' इति । मित इति । एतच्च मित्त्वमनुपसर्गस्य विकल्प्यते, सोपसर्गस्य तु नित्यम् । वानयति वनयतीति यदाह—'ज्वलह्वलह्मलानामनुपसर्गाद्वा' । 'ग्लास्नावनुवमां च' इति । एषामनुपसर्गाणां मित्त्वं वा भवती-

---

१. न केवलं कगेरर्थावचनं, किन्तु वनेश्चेत्येवमर्थं चकारः । समुच्चेयं च व्यवहितं स्मारयितुं 'कगे नोच्यते' इत्यस्योपन्यासः. २. वनुधातौ इत्यर्थः स्यात् .

त्यर्थः । एतच्च 'अनन्तरस्य विधिर्वा' इति न्यायान्न[1] वनोतेः । धनपालस्तु तमेव[2] प्रस्तुत्याह—'वनुं घटादिषु पठन्ति द्रमिडाः । तेषां मित्संज्ञा । वनयति । आर्यास्तु विभाषामित्त्वमिच्छन्ति । तेषां वानयति वनयति' इति ॥

स्तम्भे मानयते ज्ञाने मन्यते मनुते पदम् ॥ १२५ ॥
पूजायां मानयेन्मानेद् यौ मीमांसेत तङ्सनोः ।

'मन स्तम्भे' । चितादिः । 'मन ज्ञाने' । दिवादिः । 'मनु अवबोधने' । तनादिः । 'मान पूजायाम्' । भूवादौ त्वयमनुदात्तेत् । 'मान्बधे'ति (३-१-६) सनि 'अवयवे कृतं लिङ्गम्' इति न्यायेन तङ् । संश्चास्मात् जिज्ञासार्थादित्याहुः[3] । विचारणार्थादिति तु भोजीया मीमांसकाश्च । 'मीमांसा स्याद्विचारणा' इति च नैघण्टुकाः । एवं[4] च जिज्ञासाशब्देनापि वा विचारणैव लक्ष्यताम् ॥

ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेच्छपि ॥ १२६ ॥

घटादौ चायं कैश्चित् पठ्यते । तथा च 'ध्वन शब्द इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामिधनपालावप्यत्रैवानुकूलौ । 'दलिवलिस्खलिरणिध्वनिक्षपित्रपयश्च' इति च भोजदेवः । एते च मित्संज्ञा इत्यर्थः ॥

शब्दे च देवशब्दे च स्तनति स्तनयेत् क्रमात् ।

'ष्टन वन शब्दे' । 'स्तन गदी देवशब्दे' । नचास्यापि

---

१. न वनोतेः = न तानादिकस्य, किन्तु घटादौ प्राक्पठितस्यैवेत्यर्थः । घटादिपठितश्चोदित्करणसामर्थ्यादन्यो धातुः, न तानादिकानुवाद इत्ययमर्थः 'तदेव (वनेदित्येव) पदम्' इति वदता देवेनैव सूचित इत्यभिप्रायः. २. वनोतिमेव. ३. तथा च काशिका — 'मानेर्जिज्ञासायाम्' इति. ४. एवञ्च = बहुसम्मत्या मीमांसाशब्दस्य विचारणावाचकत्वे च.

दन्त्यपरसादित्वात् षोपदेशत्वम् । स्म्याद्येकाच्साहचर्यादनेकाचां नैतदित्याहुः । व्यक्तं चैतत् क्षीरस्वामिमैत्रेयरक्षितवृत्त्योः ॥

श्रद्धोपकरणार्थस्य तनेस्तनाति तानयेत् ॥ १२७ ॥
दैर्घ्यार्थस्योपसर्गात्तु विस्तारे तनुतेऽतनोत् ।

'तनु श्रद्धोपकरणयोः' । (†धनपालशाकटायनौ?) 'उपसर्गाच्च दैर्घ्ये' । उपसर्गात्तनेर्दैर्घ्येऽर्थे णिज् भवतीत्यर्थः । आतनति आतानयेत् । 'तनु विस्तारे' ॥

दाने सनोति सनुते सम्भक्तौ तु सनेदिति ॥ १२८ ॥

'षणु दाने' । तनादिः । 'वन षण संभक्तौ' ॥

णौ गोपयति भाषार्थे निन्दायां से जुगुप्सते ।
गोपायेद्रक्षणे त्वाये व्याकुलत्वे तु गुप्यति ॥ १२९ ॥

गुप भाषार्थः । 'गुप गोपने' । अनुदात्तेत् । गोपनकुत्सनयोरिति मैत्रेयरक्षितः । **निन्दायामिति** । अत्र 'गुप्तिज्किद्भ्यः सन्' (३-१-५) इत्यत्र जयादित्यः—'निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते' इति । 'गुपू रक्षणे' । 'गुपूधूप' (३-१-२८) इत्यादिनायः । 'गुप व्याकुलत्वे' । दिवादिः ॥

धूपायतीति सन्तापे भाषार्थे धूपयेदिति ।

'धूप सन्तापे' । धूप भाषार्थः ॥

क्षिप्यति प्रेरणे शे तु क्षिपति क्षिपते पदे ॥ १३० ॥

'क्षिप प्रेरणे' । अत्र भूवादिसूत्रे सुधाकरः—"'संपृचादि' (३-२-१४२) सूत्रे पारायाणिकैरनुक्तोऽपि क्षिपिर्दैवादिको जया-

---

१. एषां गुपादिषु यथासङ्ख्यं सम्बन्धः.

---

† अतः प्राक् 'चन श्रद्धोपहननयोरिति' एतावद् गलितमिति प्रतिभाति.

दित्येनोररीचक्रे 'क्षिप प्रेरणे इति दिवादिस्तुदादिश्च गृह्यते' इति वदता । अत एव व्यासप्रयोगः—

'द्वाविमावम्भसि क्षिप्य गळे बद्ध्वा महाशिलाम् ।
धनिनं चाप्रदातारं दरिद्रं चाप्रवासिनम् ॥ '

इति । 'संक्षिप्य संरम्भमसाद्विपक्षम्' इति भट्टिः । नो खलु पारायणिकैरप्रदर्शनादभावानुमानं, लक्ष्यपारतन्त्र्येण तेषामवस्थानात्, शिष्टप्रयोगोपगीतनाम्नः शब्दराशेरनाश्रयणे प्रधानाविरोधाल्लक्षणस्यालक्षणत्वं मा भूदिति" इति ॥

सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् ।
ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च ॥ १३१ ॥

'तप सन्तापे' । 'तप दाहे' । युजादिः स्वरितेत् । शाकटायनस्य त्वात्मनेपदी । 'तप ऐश्वर्ये वा' । तपेत्ययं धातुरैश्वर्ये तङ्श्यनौ वोत्पादयतीत्यर्थः । एवं च दिवादित्वेनैव तदविनाभूतमनुदात्तेत्त्वमपि दर्शितं द्रष्टव्यम् । पतेत्येके । तथा च 'इरज्यति पत्यते क्षयति राजतीति चत्वार ऐश्वर्यकर्माणः' इति नैरुक्ताः । केचित्तु वेत्येतद् 'वावृतु वरणे' इत्युत्तरधात्वंशमाहुः । तथा च 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' इति भट्टिः । एवं च 'णौ वर्त्तयति भाषार्थे' इत्यत्र 'वरणे श्यनि वृत्येत' इत्यप्यनुक्तिः शोभतेतराम् ॥

आक्रोशे शप्यते शप्येच्छपते शपतीति च ।

---

१. तत्सम्बद्धम्. २. अपिशब्दग्राह्यं श्यन्विषयत्वम्. ३. एतच्च 'वर्तयेद् भाषणार्थे णौ' इति प्राक् (९६. श्लोके) पठितस्योपलक्षणं यथाश्रुतपाठस्य काप्यदर्शनात्.

उपालम्भे शपेर्वाक्यात् तङि स्याच्छपते पदम् ॥ १३२ ॥

'शप आक्रोशे' । दिवादिर्भूवादिश्च । **वाक्यादिति** । 'शप उपालम्भने' इति वार्तिकेन । उपालम्भन इत्येव तु प्रायः पठन्ति । तदात्राप्युपालम्भ इति पाठः । तत्र वाचा शरीरस्पर्शनमुपालम्भनम् । तच्चैतज्जयादित्यमतम् । एतच्च 'त्वत्पादौ स्पृशामि नैतन्मया कृतमित्येवंविधः शपथविशेषः' इति व्याचख्युः[1] । सुधाकरश्चाह—'वाचा शरीरस्पर्शने=तव शरीरं स्पृष्ट्वा शपे इति यल्लोकप्रसिद्धं तत्र शपेस्तङ्' इति । कैयटस्तु 'उपलम्भनं प्रकाशनम्' इति । भागवृत्तिकारः पुनः प्राह—'शपेरुपलम्भने प्रकाशने कथने वर्तमानादात्मनेपदं भवति । देवदत्ताय शपते । देवदत्तं यत्किञ्चित्कथयतीत्यर्थः । वाचा शरीरस्पर्शनमुपालम्भनमित्यदः कस्यचित् काव्यम्' इति । तत्र च श्लाघह्नुङ्स्थेति (१-४-३४) सम्प्रदानत्वाच्चतुर्थी । शाकटायनस्त्वाह—'उपलम्भनं प्रकाशनं देवदत्ताय शपते । देवदत्तं प्रकाशयति । एवम्भूतोऽसाविति देवदत्तमाचष्ट इत्यर्थः । अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भनम् । देवदत्ताय शपत इति । प्रोषिते देवदत्ते तस्य भावाभावयोरुपलब्धव्ययोः कंचिदासेवते[2]' इति । चान्द्रभोजकौमारास्तु 'शपः शपथे' इत्येवमाहुः । तदेतेष्वपि पक्षेषु लक्ष्यवशादेव समस्तस्य व्यवस्थास्थेया ॥

तृप्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृप्तावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत् ॥ १३३ ॥

---

१. हरदत्तमिश्राः. २. एवञ्च देवदत्तभावाभावान्यतरविषयं स्वाभिप्रायमाविष्करोतीत्यर्थ उदाहरणस्य फलितः.

'तृप प्रीणने' । तच्च 'पीयूषस्येह तृप्तुतम्' इत्यादिदर्शनात् तृप्तिरेव । केचित् पुनः स्वादौ तृपिं न पठन्ति । तथा च 'क्षुभ्नादि' (८-४-३९) सूत्रे न्यासकृता 'व्यत्ययो बहुलम्' (३-१-८५) इतिच्छान्दसोऽत्र श्नुरुक्तः । अत्र च 'क्षुभ्नादिषु च' इति णत्वाभावः । तेषु च तृप्नोतिशब्दस्यैव पाठात् तसादिषु णत्वं भवत्येव । अतृप्नोत् तृप्नोत्वित्यत्र तु 'एकदेशविकृतमनन्यवद् भवति' इति न्यायान्न भवति । 'तृप तृप्तौ' । तुदादिश्चायम् । सन्दीपन इति तु युजादौ क्षीरस्वामी । प्रीणन इति बहवः ॥

संघाते डेपयेतेति क्षेपे डिपति डिप्यति ।
डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः ॥ १३४ ॥

'डिप सङ्घाते' । चितादिः । 'डिप क्षेपे' ॥

कल्पते शपि सामर्थ्ये कल्पयत्यवकल्कने ।
अदन्तस्य कृपेर्णौ तु दौर्बल्ये कृपयेदिति ॥ १३५ ॥

'कृपू सामर्थ्ये' । 'कृपो रो लः' (८-२-१८) इति लः । 'कृपेश्च' इति 'कृपेस्तादर्थ्ये' इति वा णिच् । ते (*) 'भावयत्यवकल्कने' इत्यत्र दर्शिते । 'दार कृप श्रथ दौर्बल्ये' ॥

क्षम्पेः क्षम्पयति क्षान्त्यां प्रेरणे क्षपयेदिति ।

'क्षपि क्षान्त्याम्' । 'क्षप प्रेरणे' । भीमसेनेन कथादिष्वपठितोऽप्ययं 'बहुलमेतन्निदर्शनम्' इत्युदाहरणत्वेन धातुवृत्तौ पठ्यते ॥

---

१. न केवलमयं युजादिः, किन्तु तुदादिरपीत्यर्थः. २. इदं तृतीयश्लोके.

---

* 'च' इति पाठः स्यात्.

दिवादेः कुप्यति क्रोधे भाषार्थे कोपयेत् कुपेः ॥ १३६ ॥

'कुप क्रोधे' । कुप भाषार्थः ॥

आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे ।
व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति §पदं भवेत् ॥

'आपॢ लम्भने' इत्यत्र मैत्रेयरक्षितेनापत इत्यात्मनेपदमप्युदाहृतमुपलभ्यते । दैववशात्तु तस्यापि[1] नैतदस्तीति प्रतीयते । तदनुसारेणैव हि प्रायेण देवः प्रवर्त्तमानो दृश्यते । 'आपॢ व्याप्तौ' ॥

स्पर्शे चुपति मन्दायां गतौ तु शपि चोपति ।

'चुप स्पर्शे' । तुदादिः । 'दीर्घोऽकितः' (७-४-८३) इत्यत्र भाष्ये चेच्छिद्यते चोच्छुप्यते इति 'छे च' (६-१-७३) इत्युदाहरणाच्छकारादिरयं[2] युक्तः । 'चुप मन्दायां गतौ' ॥

शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥ १३८ ॥
तत्रैव शशपोस्तुम्पेदर्दने तुम्पयेण्णिचि ।

'तुप तुम्प हिंसायाम्' । अत्र च 'अनिदिताम्' (६-४-२४) इति नलोपे कृते 'शे तृम्फादीनाम्' इति वार्तिकेन नुम् । आदिशब्दः प्रकारार्थः सादृश्यार्थः । तेन तुदादिषु ये नोपधाः पठ्यन्ते, ते तृम्फादयः । 'तुबि तुपि अर्दने' इति मैत्रेयरक्षितः । लुबि तुबीत्येव बहवः ॥

लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥ १३९ ॥

'लुबि तुबि अर्दने' ॥

---

१. मैत्रेयरक्षितस्यापि. २. भौवादिकस्तु चादिरेव सर्वसम्मतः.

---

§ 'भवेत् पदम्' इति गपुस्तके पाठः.

हिंसायां वक्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।

'चुबि हिंसायाम्' । 'चुठि इत्येके' इति मैत्रेयरक्षितः । 'चुबि वक्रसंयोगे' ॥

णिचि कुम्बयतीति स्याच्छादने शपि कुम्बति ॥ १४० ॥

'कुबि छादने' ॥

गार्ध्ये लुभ्यति मोहार्थे तुदादेर्लुभतीति शे ।

'लुभ गार्ध्ये' । दिवादिः । तच्चाभिकाङ्क्षा । 'लुभ विमोहने' ॥

दृभी भये विभाषा णौ स्यातां दर्भति दर्भयेत् ॥ १४१ ॥
अनीदितश्च सन्दर्भे दृभति ग्रन्थ ईदितः ।

विभाषेत्याद्यनुकर्षणार्थश्चः । तत्र चाणिच्पक्षे 'दृभी भये' 'दृभ सन्दर्भे' इत्यनयोरीदितो दृब्धामिति भवति, अनीदितस्तु दृभितमितीत्यभिप्रेत्य **अनीदित** इत्युक्तम् । बहवस्त्वन्त्यं न पठन्ति । 'दृभी ग्रन्थे' । तुदादिः । स च ग्रन्थनम् ॥

स्तभ्नाति स्तभ्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः ॥
स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि ।

'क्र्यादिभ्यः श्ना' । 'स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु स्कुञ्भ्यः श्नुश्च' (३-१-८२) इति सौत्रयोर्धात्वोः श्नुश्नौ । 'ष्टभि स्कभि प्रतिबन्धे' । अनुदात्तेतौ । 'औपदेशिकोऽयं टकारो न तु ष्टुत्वनिबन्धन इत्येके' । इति क्षीरस्वामिमैत्रेयरक्षितौ । तदा ष्टम्भते इत्येवं रूपम् । स्कन्भुस्कुन्भ्वोः पुनः स्कभ्नाति स्कुभ्नुयात् स्कुभ्नाति स्कुभ्नुयात् स्कम्भत इति सुशकमूहितुमित्याशयः । 'ष्टुभु स्तम्भे' ॥

हिंसाभाषणयोः शोभेच्छोभार्थे शुभतीति शे ॥ १४३ ॥
शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तङः समम् ।

'शुभ शुम्भ भाषणे हिंसायां च' । क्षीरस्वामी " 'शुम्भ भाषणे हिंसायां च' भासन इति च दुर्गः । षोपदेशोऽयमिति गुप्तः 'सावष्टम्भनिषुम्भसंभ्रमनमद्भृगोले' त्यादिदर्शनाद्" इत्याह । धनपालशाकटायनौ (त ?) यथा दुर्गः । 'शुभ शुम्भ शोभार्थौ' 'शुभ दीप्तौ' । तत्र च तङोऽन्यच्छुम्भेरपि सममित्यर्थः, हिंसाद्यर्थत्रये शशपोः शुम्भतीति भवतीति यावत् । तृन्फादित्वान्नुम् ॥

क्षुभ्नाति क्षोभते क्षुभ्येदिति सञ्चलने क्षुभेः ॥ १४४ ॥

'क्षुभ सञ्चलने' । क्र्यादिर्भ्वादिर्दिवादिश्च । मध्यमोऽनुदात्तेत् । आद्ये 'क्षुभ्नादिषु च' (८-४-३९) इति णत्वाभावः ॥

नभ्येन्नभ्नाति नभते हिंसायां तत्तुभेः समम् ।

'णभ तुभ हिंसायाम्' । दिवादिः क्र्यादिर्भ्वादिश्च । अन्त्योऽनुदात्तेत् ॥

जृम्भणे जम्भते याभे जम्भेन्नाशे तु जम्भयेत् ॥ १४५ ॥

'जभ जृभि गात्रविनामे' । 'राधिजभोरचि' (७-१-६१) इति नुम् । 'जभीत्येके' इति मैत्रेयरक्षितः । तदा निष्ठायां जब्धम् । अन्यदा जभितम् । 'भयविपरीतो मैथुने' । विपरीत इति यभेत्यर्थः । 'जभ इत्येके' इति मैत्रेयरक्षितः । जभ चेति धनपालः । यभजभेति शाकटायनः । न्यासे तु 'राधिजभोः' (७-

---

१. यथा दुर्गः=दुर्ग इव तावपि भासने इत्यर्थं वदत इत्यर्थः. २. ईदित्त्वे.

१-६१) इत्यादौ जभ जृभि गात्रविनाम इत्येव पाठात् जभि-मैथुने नास्तीति गम्यते, वृत्तौ च 'रैभिश्च भान्तेष्वथ मैथुने यभिः' इत्यत्र रब्धा यब्धेत्येवोदाहृतेः । 'जभि नाशने' ॥

प्रेरणे लाभयेल्लाभेः प्राप्त्यर्थे लभते शपि ।

'लाभ प्रेरणे' । कथादिः । तत्फलं पुनरललाभदित्यत्रा-ग्लोपित्वाद्ध्रस्वाभावः । 'लभेति सभ्या' इति क्षीरस्वामी । 'डुल-भष् प्राप्तौ' ॥

अषितः क्षाम्यति क्षान्तिः क्षमूषः क्षमते क्षमा ॥ १४६ ॥

'क्षमू सहने' । 'शमामष्टानां दीर्घः' (७-३-७४) इति दीर्घः । 'क्षमूष् सहने' । अनुदात्तेत् । षित्त्वादङ् । स च 'स्त्रियां क्तिन्' (३-३-९४) इत्यस्यापवादः । अषितस्त्वौत्सर्गिकः क्तिन्नेव भव-तीति क्षान्तिरित्युक्तम् । 'अनुनासिकस्य क्विझलोः क्ङिति' (६-४-१५) इति दीर्घः ॥

गत्यादावमतीति स्याद्रोगे स्यादामयत्यमेः ।

'अम गत्यादिषु' । ते च 'कन दीप्तिकान्तिगतिषु । ष्टन वन शब्दे । वन षण सम्भक्तौ' इति समनन्तरोक्ताः । "अपरे 'अव रक्षणगती' त्यादयो गत्यादय इत्याहुः" इत्यपि धनपालः। 'अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचन-क्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु' इति विदूरे व-क्ष्यमाणा अपि गृह्यन्ते इत्याहुरित्यर्थः । 'अम रोगे' । 'आद्यन्त-वदेकस्मिन्' (१-१-२१) इति अमन्तत्वेऽपि 'न कम्यमिचमाम्'

---

१. अनिट्कारिकेयम्

इति मित्त्वनिषेधादमेर्हेतुमाण्णिच्यप्यामयतीति द्रष्टव्यम् । अयं च निषेधः कमिचमिसाहचर्याद्भौवादिकस्यैवार्हतीति 'नान्ये मित' इत्येव चुरादिणिचि निषेद्धव्यम् ॥

चलने भ्रमति भ्रम्येच्छमादेर्भ्राम्यति भ्रमेत् ॥ १४७ ॥

'भ्रमु चलने' । 'भ्रमु अनवस्थाने' । दिवादिः । 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमत्रसित्रुटिलषः' (१-३-७०) इत्यादिना वा श्यन् ॥

यमेरुपरमे यच्छेद्यमयेत् परिवेषणे ।

'यमु उपरमे' । 'उदित्त्वमस्य केचिन्नेच्छन्ति' इति मैत्रेयरक्षितः । क्षीरस्वामी तु यमेत्येव पठित्वाह—'उदिदिति श्रीभोजः' इति । तत्फलं तु यत्वेत्येव प्राप्ते यमित्वेतीड्विकल्पः । 'अनुदात्तोपदेश' (६-४-३७) इत्यादिना नलोपः । 'इषुगमियमां छः' (७-३-७७) । 'इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् । इष्यति इष्णाति' इति भाष्याद् इषेत्येवार्षः पाठः । 'यम च परिवेषणे' । अत्रार्थे यमिर्णिचमुत्पादयति मिच्च भवतीत्यर्थः । 'यमोऽपरिवेषणे' इति तु क्षीरस्वामिधनपालौ । घटादावप्येवमेव पठन्ति । अर्थे त्वस्य विवदन्ते । तत्र क्षीरस्वामी तावद्—'यम उपरम इत्यस्य धातोः परिवेषणादन्यत्रैवार्थे मित्संज्ञा । यमयति नियमयति संयमयति । परिवेषणे तु यामयति श्राद्धे । यामयति चन्द्रम्' इति । एवमेव च चान्द्रकौमारभोजीयाः । मैत्रेयरक्षित-

१. अन्यथा दिवादिकचाद्योरुदित्त्वाभावेन हलि च्छत्वाप्रसङ्गाद् इष्यतीष्णातीत्यनयोः अहलीति निषेधोदाहरणत्वमसङ्गतं स्यात् । 'इषु इति वक्तव्यम्' इति वाच्ये तथानुक्त्या च तुदादावप्यननुबन्ध एव पाठो वार्तिककारस्य. २. 'यमोऽपरिवेषणे' इत्येव सर्वे पठन्तीत्यर्थः.

स्तु "अपरिवेषणे यमिर्न मित् । यामयति । परिवेषणे यमयति ब्राह्मणान् । कथं नियमयति संयमयतीति । 'तत्करोति' इति प्रातिपदिकाण्णिच्प्रत्ययः" इति । धनपालश्च निषेधपक्षमेव पर्यग्रहीत् । 'न पादम्याङ्यम' (१-३-८९) इत्यत्र च जयादित्यः — "आयामयते 'यमोऽपरिवेषणे' इति मित्संज्ञा प्रतिषिध्यते" इति । व्यानञ्ज चैतज्जिनेन्द्रः — "'न कम्यमिचमाम्' इत्यतो नेति वर्तते" इति । 'अनन्तरस्य विधिर्वा' इति च नीतिः 'नेति वर्तते-इत्येतदेवानुवर्तते 'घटादयो मितः' इति मित्त्वविधेः प्रतिषेधान्त' रितत्वात् । शाकटायनः पुनर्घटादौ चुरादौ च पक्षद्वयमपि परिजग्राह । तत्र च क्षीरस्वाम्यादिपक्षे यामयेदिति कामं पठितव्यम् । धनपालपक्षेऽप्येवमेव चुरादौ द्रष्टव्यम् । शाकटायनपक्षे पुनरुभयत्राप्युभयमिति विभागः ॥

स्यमेः स्यमति शब्दार्थे वितर्के स्यामयेत णौ ॥ १४८ ॥

'स्यमु स्वन ध्वन शब्दे' । 'स्यम वितर्के' । चितादिः । 'नान्ये मित' इति मित्त्वाभावः । पूर्वस्य हेतुमण्णिचि मित्त्वात् स्यमयेत् स्यमयेतेति द्रष्टव्यम् । न्यासकारस्तु 'नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः' (६-२-१३३) इत्यत्र स्यालशब्दव्युत्पादनार्थं 'स्यल वितर्के' इत्यपाठीत् ॥

आलोचने शामयते शाम्यत्युपशमे श्यनि ।

'शम लक्ष आलोचने' । चितादिः । 'शमु उपशमे' । घटादौ च 'शमो दर्शने' इति पठ्यते । शाम्यतेर्दर्शनेऽर्थे मित्संज्ञा न भवतीत्यर्थः । अदर्शने भवतीति तु क्षीरस्वामी । एवमेव चान्द्र-

१. एतदेव = 'नेति वर्तते' इत्येवंरूपं विवरणमेव । अनुवर्तते = अनुगृह्णाति.

कौमारभोजीयाः। धनपालस्तु 'दर्शने न भवती' त्युक्त्वा 'अदर्शने इत्येके' इत्याह। शाकटायनश्चात्रैवानुकूलः। एषु च 'अनन्तरस्य विधिर्वे'ति नीत्या प्रथम एव पक्षो युक्तः। नञ्प्रश्लेषक्लेशश्चैवं परिहृतो भवति। तत्र च दर्शने निशामयति रूपमिति भवति। अन्यत्र निशमयति श्लोकं, शमयति रोगमिति॥

भामेर्भामयति क्रोधे तत्रैव शापि भामते॥ १४९॥

'भाम क्रोधे'। आद्यः कथादिः। अन्त्योऽनुदात्तेत्॥

वित्तत्यागे व्यययति व्ययति व्ययते गतौ।

'व्यय वित्तसमुत्सर्गे'। कथादिः। 'व्यय गतौ'॥

पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि॥ १५०॥

'पूरी आप्यायने'। दिवादिर्ग्रसादिश्च॥

स्तेये चोरयतीति स्याण्णिचि चोरयते चुरेः।

केचित्त्वेतन्न पठन्ति। 'चुर स्तेये'। 'चुर छेदने'। तुदादिः। णिच्चास्माद्धेतुमाण्णिच्। चोरयत इत्येतच्च चोरयतीत्यस्याप्युपलक्षणम्। **इति स्यादि**त्येतद्वा चुरेरित्यनेन सम्बद्ध्य चुरश्चोरयतीति स्यात्, चोरयत इति चेति व्याख्येयम्। चुरतीति तु वाच्ये णिचा निर्देशो वैचित्र्यार्थः। सर्वथाप्यत्रार्थतः शब्दतश्चाञ्जस्यं नैव पश्यामः। 'छुर च्छेदने' इत्येव च पाठः। तथा च 'सामोन्मुखेनोच्छुरिता प्रियेण' इति भट्टिः। 'स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम्' इत्यमरसिंहश्च। तच्चैतत्

---

१. ते च क्षीरस्वामिपक्ष्याः. २. स च मित्त्वप्रतिषेधपक्षः. ३. क्लेशो ह्ययमवर्जनीयो मित्त्वविधिवादिनो दर्शने मित्त्वं मा भूदिति. ४. आस्वादीय इत्यर्थः.

'छुर च्छेदने क्तः । यावादि (५-४-२९) कन्नि'ति कविकामधेनौ व्याख्यातम् । 'कृन्तत्यचोटयदचुण्टयदच्छुरच्च' इत्याख्यातनिघण्टुश्च । तदेवमपाठपक्ष एव न्याय्यः, चितादौ चेच्छुरिर्न दृश्यते ।

स्तेये चोरयतीति स्याच्चुरेश्छेदे चुरेदिति ।

इति तु क्वचित् पाठः । तदापि चकारादित्वमयुक्तमेव । यदा तु छकारादिरेवापठ्यत, तदापि कथञ्चित् सादृश्यं नेयम् ॥

शूरयेतेति विक्रान्तौ शूर्यते स्तम्भहिंसयोः ॥ १५१ ॥

'शूर वीर विक्रान्तौ' । पदादी । 'शूरी हिंसास्तम्भयोः' । दिवादिरनुदात्तेत् ॥

गुरते गूरयेतेति शे णावुद्यमने तङि ।
श्यनि गूर्यत इत्येवं गतिहिंसनयोस्तङि ॥ १५२ ॥

'गुरी उद्यमने' । तुदादिः । 'गूर उद्यमने' । चितादिः । 'धूरी गूरी हिंसागत्योः' ॥

संशये चारयेद्गत्यां चरति

'चर संशये' । 'चर गतौ भक्षणे च' । यथा तु 'भक्षणेऽपि प्रयुज्यते चरिः' इति मैत्रेयरक्षितः, तथा नायं पाठोऽस्ति । अपि त्वर्थवशेन केनाचित् प्रक्षिप्त इति गम्यते; तथा 'चर गतिभक्षणयोरि'ति ॥

---

१. छेदनार्थे चुरतीत्याख्यातस्य सत्त्वे तदत्रापठिष्यत. २. उक्तप्रकारेण तुदादेर्णिजुदाहरणस्य चकारादित्वस्य चासामञ्जस्यादित्यर्थः. ३. इदमर्धं रान्तशेषतया दैवग्रन्थे पठ्यते 'गतौ शलती'ति (१५४) श्लोकात् प्राक्. ४. आगर्वीयावित्यर्थः. ५. मैत्रेयोक्तिपर्यालोचनया 'चर गतौ भक्षणे च' इति वा 'चर गतिभक्षणयोः' इति वा पाठो नास्तीति प्रतीयते इति वाक्यार्थः.

ईरयतीरति ।

ईरेः क्षेपे विभाषा णौ लुकीर्त्ते गतिकम्पयोः ॥ १५३ ॥

'ईर क्षेपे' । 'ईर गतौ कम्पने च' । अनुदात्तेत् । गतावित्येव बहवः ॥

गतौ शलति संवृत्यां चलने शलते शलेः ।

'शल हुल पतृ गतौ' । ज्वलादयः । 'शल श्वल्ल आशुगमने' इति ज्वलादौ क्षीरस्वामी । श्वल श्वल्लेति तु मैत्रेयरक्षितः । तत्र चाद्यं पाठमाश्रित्य गतावित्येवोक्तम् । पाठान्तरेऽपि वा गतिग्रहणेनाशुगतिरपि कामं गृह्यते । 'शल चलनसंवरणयोः' ॥

समाधौ शीलतीति स्याच्छीलयत्युपधारणे ॥ १५४ ॥

'शील समाधौ' । 'शील उपधारणे' । तच्चाभ्यासः ॥

कलेः कालयति क्षेपे गतिसङ्ख्यानयोर्द्वयोः ।
कलयेच्छब्दसङ्ख्यानविषये कलते शपि ॥ १५५ ॥

'कल विल क्षेपे' । 'कल गतौ सङ्ख्याने च' । कथादिः । 'कल शब्दसङ्ख्यानयोः' ॥

महत्त्वे पोलाति पुलेर्णौ तु तत्रैव पोलयेत् ।

'पुल महत्त्वे' । तुदादौ चायं क्षीरस्वामिनः । भूवादौ च स एवाह — 'तुदादौ पुलती'ति । तदा पुलेदिति[1] पाठः । चुरादौ तु समुच्छ्राय इति पपाठ ॥

सङ्घाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥

'पूल सङ्घाते' । पूर्ण इति तु चुरादौ क्षीरस्वामी । पूणेति

---

१. पुलेरित्यस्य स्थाने.

शाकटायनः । कोशशुद्धिस्त्वीदृशेषु कीदृशीति न विद्मः ॥

मूलेः प्रतिष्ठितौ मूलेद्रोहणे मूलयेदिति ।
वेलेत्तु चलने वेलेर्वरणे विलतीति शे ॥ १५७ ॥
क्षेपे णौ वेलयेद्

'वेलृ चलने' । 'विल वरणे' । 'विल क्षेपे' ॥

भृत्यां चालयेत् कम्पने चलेत् ।

'चल भृतौ' । 'चल कम्पने' । अस्य तु हेतुमण्णिचि 'कम्पने चलिरि'ति मित्त्वाच्चलयेदिति द्रष्टव्यम् । कम्पनात्त्वन्यत्र चालयति[1] सूत्रमर्थं वेति ॥

फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥ १५८ ॥
आदितोऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।

'ञिफला विशरणे' । अस्याकर्मकत्वाद् भावे क्तः, 'गत्यर्थाकर्मके' (३-४-७२) त्यादिना कर्तरि च, 'क्तोऽधिकरणे चे' (३-४-७६) त्यधिकरणे च । तत्रान्त्ययोः 'आदितश्च' (७-२-१६) इतीटि प्रतिषिद्धे 'उत् परस्यातः' 'ति च' (७-४-८८) इत्युत्वे च कृते 'अनुपसर्गात् फुल्ले' (८-२-५५) त्यादिना निष्ठातकारस्य लत्वनिपातनात् फुल्लम् । आद्ये तु 'विभाषा भावादिकर्मणोः' (७-२-१७) इतीट्प्रतिषेधाविकल्पात् फलितं च । क्तश्चायं 'ञीतः क्तः' (३-२-१८७) इति वर्तमाने भवति, नतु भूते 'तक्रकौण्डिन्य'न्यायेन बाधात् 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधकः' इति चाहुः । येन नाप्राप्त इति च यस्मिन् प्राप्त एवेत्यर्थः । अपरे पुन-

---

१. क्षिपत्यन्यथाकरोति वेत्यर्थः.

भूतेऽपि भवतीत्यूचुः । 'शबर्या पूजितः सम्यग्' इत्यादिप्रयोगाश्चात्रैवानुगुणाः[1] । 'अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः' इति भोजदेवः । आह स्म चैतत्सर्वं सुधाकरः—"'अनेन वर्तमाने क्तेन भूते प्राप्तः क्तो बाध्यते' इति भर्तृहरिः । भाष्य-(टकार?) टीकाकृतस्तु भूतेऽपि भवतीत्यूचुः[2] । तथा च पूजितो गतः पूजितो यातीति भूतकालो वाच्यः । नतु पूज्यमानो वर्तमान" इति । 'फल निष्पत्तौ' । अस्य चानादित्वादनिट्त्वोत्त्वयोरसम्भवेन फुल्लाभावाद् अन्त्ये इत्युक्तम् ॥

†विदारणे शपि दलेद् दालयेदिति णौ दलेः ॥ १५९ ॥

'दल विदारणे' । अन्त्यो ग्रसादिः । विशरणे त्वाद्यं बहवः पठन्ति । 'दलन्ति ककुभानि चे'ति दण्डिनः प्रयोगः । सर्वथाप्यस्य 'दलिवली'ति मित्त्वाद् दलयेदित्यपि विशरणे द्रष्टव्यम् ॥

श्लेषे मिलेत् सङ्गमे तु मिलते मिलतीति च ।

'मिल श्लेषणे' 'मिल[3] सङ्गमे' । तुदादी । अत्र मैत्रेयरक्षितः—'मिल श्लेषण इत्येके पठन्ती'ति । कौमाराः पुनरमुमेव पठन्ति । शृङ्गारप्रकाशे तु 'मिलन्त्याशासु जीमूता' इत्यपठितधातुषु मिलतिः प्रदर्शितः ॥

अर्दने देवयेद् दीव्येत् क्रीडादौ परिकूजने ॥ १६० ॥

---

१. आनुगुण्यं च शबर्येति तृतीयानिर्देशस्य द्रष्टव्यम् । अन्यथा हि 'क्तस्य च वर्तमाने' (२-३-६७) इति षष्ठ्या भाव्यम्. २. 'ज्ञातमिति तु भूतेऽपि भवति तेनेत्यधिकारात् तृतीयान्तादुपज्ञातेऽर्थेऽण्प्रत्ययविधानाद्' इति 'मतिबुद्धि' (३-२-१८८) इति सूत्रे कैयटः. ३. अयं स्वरितेत्.

---

† इदमर्धं 'फलेर्विशरणे फुल्लम्' इत्यतः प्राक् पठितं कपुस्तके.

देवयेतेदितो दिन्वेद् देवेर्देवेत देवने ।

'दिवु अर्दने' । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' । 'दिवु परिकूजने' । चितादिः । 'हिवि दिवि धिवि जिवि प्रीणनार्थाः' । 'तेवृ देवृ देवने' । अनुदात्तेतौ ॥

माने गर्वयते दर्पे गर्वतीति भवेच्छपि ॥ १६१ ॥

'गर्व माने' । पदादिः । 'कर्व खर्व गर्व दर्पे' ॥

ष्ठीवति ष्ठीव्यतीत्येते स्यातां निरसने ष्ठिवेः ।

'ष्ठिवु निरसने' । अन्त्यो दिवादिः । 'सादेशे सुब्धातुंष्ठिवुष्वक्कतीनां प्रतिषेधः' । इति वार्तिकेन सत्वाभावः । 'ष्ठिवुक्लमुचमां शिति (७-३-७५) इति दीर्घः ॥

पूरणे पूर्वतीति स्यात् पूर्वयेण्णौ निकेतने ॥ १६२ ॥
पूर्व्यतीति तु यत् स्वप्ने तत् कण्ड्वादिषु दर्शनात् ।

'पुर्व पर्व मर्व पूरणे' । 'उपधायां च' (८-२-७८) इति दीर्घः । 'पुर्व निकेतने' । तच्च निवासः । 'पूर्व भावे स्वप्ने च' । कण्ड्वादिगणपाठेषु पूर्वशब्दो न दृश्यते । यस्त्वयं दर्शितः, सोऽप्येवं लोटोऽर्थनिर्देश एव भवेत् । तथा चामोघायां वृत्तावर्थनिर्देशाद्विना शाकटायनः कण्ड्वादीन् पठन् पूर्वशब्दं न पपाठ । गणपाठे तु लोटो धौर्त्ये पूर्वभावे स्वप्ने चेत्यर्थत्रयं निर्दिदेश ॥

व्यक्तोक्तौ क्लेशते क्लेशेः क्लिश्नाति तु विबाधने ॥ १६३ ॥
दिवादेरुपतापेऽर्थे तङि स्यात् क्लिश्यतेपदम् ।

'क्लेश व्यक्तायां वाचि' । अनुदात्तेत् । बाधन इति दुर्गः । 'क्लिशू विबाधने' । क्र्यादिः । क्लिशु उपतापे ॥

दंशने दशतीति स्यात् तत्र दंशयते णिचि ॥ १६४ ॥
भाषणे दंशयेत्

'दंश दंशने'। 'दंशसञ्जे'ति (६-४-२५) नलोपः। 'दशि दंशने'। चितादिः। दंशेत्येके। तथा च दंश् इति* । शाकटायनः पुनर्दशुङिति। दशि भाषार्थः ॥

काशेर्दीप्तौ काश्येत काशते।

'काशृ दीप्तौ'। दिवादिर्भूवादिश्च। अनुदात्तेत् ॥

लिश्यते लिशतीत्येवमल्पीभावे गतौ क्रमात् ॥ १६५ ॥

'लिश अल्पीभावे'। दिवादिः। तुदादिश्चायं क्षीरस्वामिधनपालयोः। 'लिश गतौ'। तुदादिः। तयोरनुमतोऽयं पाठः। द्विष्पाठस्त्वेवमर्थभेदान्नूनम्। एवं तु 'लिश गत्यल्पीभावयोरि'त्यनुक्तिर्वैचित्र्यार्था ॥

व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने।

'अशू व्याप्तौ'। स्वादिः। 'अश भोजने' क्र्यादिः ॥

बाधने स्पर्शने चार्थे हिक्कादौ स्पशते स्पशेत् ॥ १६६ ॥
ग्रहणे श्लेषणे चार्थे चुरादौ स्पाशयेत णौ।

'स्पश स्पर्शबाधनयोः'। क्षीरस्वामी तु 'पषेत्येके। पाषण्डः पाषाणः' इत्याह। दुर्गशाकटायनयोश्चैष एव पक्षः। तत्र चाद्यः पाठः 'प्रतिस्पशोऽविसृजतूर्णितमः' 'यतो व्रतानि पस्पशे' 'शब्दविद्येव नो भाति राजनीतिरपस्पशा' इत्यादिप्रयोगानु-

* इदं वाक्यं दंशेति पाठं संवादयितुं प्रवृत्तमिव भासते। पदभ्रंशश्चात्रार्थाप्रतीतेरनुमातव्योऽस्ति.

गुणः । पाषण्डादिस्तु 'पष अनुपसर्गाद्' इत्यस्य कथादेर्भविष्यति; 'पष बन्धने' इत्यस्यैव वा युजादेः । 'पश बन्धने' इत्यत्र मैत्रेयरक्षितः—'पष बन्धन इति युजादावेके पठन्ति' इति । अव्युत्पन्नो वास्तु । 'स्पश ग्रहणश्लेषणयोः' । चितादिः ॥

भ्राशते भ्लाशते दीप्तौ भ्राश्यते भ्लाश्यते तथा ॥ १६७॥

'टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ' । 'वा भ्राशे'ति (३-१-७०) वा श्यन् ॥

झषेज्झषेत संवृत्यामादाने हिंसने झषेत् ।

'झष आदानसंवरणयोः' । झष हिंसार्थः ॥

इष्णात्याभीक्ष्ण्य इच्छायामिच्छेद् गत्यर्थ इष्यति ॥

'इष आभीक्ष्ण्ये' । पौनःपुन्यं भृशार्थो वाभीक्ष्ण्यम् । तद्विषयायां क्रियायामित्यर्थः । तथा च श्रूयते—'पुर इष्णाति पुरुहूतः पुर्वीः' इति । अत्र ह्यासुरीणां पुरूणां पुराममीक्ष्णं हननादिरर्थो गम्यते । 'इषु इच्छायाम्' । यथा तु 'तीषसहलुभरुषरिष' (७-२-४८) इत्यत्र " 'इषेस्तकारे श्यन्प्रत्ययात् प्रतिषेधः' इह मा भूत् प्रेषिता प्रेषितुं प्रेषितव्य"मिति भाष्यं, तथा इषेत्येव पाठः । यदाह कैयटः—"इषु इच्छायामिति केचित् तौदादिकमुदितमधीयते । अन्ये तु उदित्त्वस्य प्रयोजनमपश्यन्त इष इच्छायामिति पठन्ति । ये त्विह 'तीषुसहे'ति पठन्ति । तन्मतेनेह विशेषणार्थ उकारः । तत्र वार्तिककारमतेन त्रयोऽपीषयोऽननुबन्धकाः; इह च तीषसहेति पाठः । तदाह इषेरिति" इति । अत्र च 'तीषे'त्यनेनैव क्त्वायामिड्विकल्पः सिद्धः । 'शतुर्वा नुमि'ति

चोक्तमेवोन्नेयम् । 'इषुगमियमां छः' (७-३-७७) । 'इष गतौ' । दिवादिः । 'जेषृ णेषृ एषृ प्रेषृ गता'वित्यस्य तु तङि एषते । अत्रैव तु क्षीरस्वाम्याह — 'चुरादावप्येषयती'ति ॥

ईषतीतीष उञ्छेऽर्थे गत्यादावीषते भवेत् ।

गत्यादाविति । ईष इत्येव । 'ईष उञ्छे' । 'ईष गतिहिंसादर्शनेषु' ॥

घुषेर्विशब्दनादौ णौ घोषयत्यविशब्दने ॥ १६९ ॥
घोषतीतीदितो घुंषेद् घुंषते कान्तिकर्मणि ।

'घुषिर्विशब्दने' । तच्च शब्देन स्वाभिप्रायप्रकाशनम् । धातूनामनेकार्थत्वेनार्थान्तरस्यापि सम्भवादादिशब्दः प्रकारार्थो व्याख्येयः । यदि तु 'विशब्दनार्थे णौ' इति पाठः स्यात्, तदा न कश्चित् क्लेशः । 'घुषिरविशब्दने' (७-२-२३) इत्यत्र विशब्दने विभाषा घुषेर्णिज् भवतीति भाष्ये[1] स्थिते घोषतीत्यपि भवति । 'घुषिरविशब्दार्थः' । घुषिर् इत्ययं धातुः यथाप्रयोगं विशब्दनादन्यत्रार्थे वर्तत इत्यर्थः । शब्दार्थ इति तु क्षीरस्वामिधनपालभागवृत्तिकाराः । शब्द इति चन्द्रदुर्गौ । 'घुषृ शब्दे' इति शाकटायनः । तेन चेरित्स्थाने ऋदित् क्रियते । अस्मिंश्च पाठे अस्यैवानेकार्थत्वेन विशब्दनार्थत्वस्यापि सम्भवाद् विनापि णिज्विकल्पेन विशब्दनेऽपि घोषतीति सिध्यति । प्रपञ्चितं चैतत् प्रक्रियारत्ने । 'घुषि कान्तिकरणे' । 'घषि करणे' इत्यन्ये । घसी-

---

१. इत्थं हि भाष्यम् — 'किमर्थमविशब्दने इत्युच्यते । न विशब्दने चुरादिणिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदविशब्दने इत्याह, तद् ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज भवतीति'.

त्यपरे । तथा च क्षीरस्वामी—"'घसि करणे' । घंसते । चन्द्रो घषीत्याह । घंषते । 'घुषि कान्तिकरणे' इति दुर्गः" इति ॥

ईर्ष्यायामादरे चार्थे क्रमात् सूर्क्ष्यति सूर्क्षति ॥ १७० ॥

'सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः' । 'षूर्क्ष आदरे' इति च अनादरे इति च बहवः । क्षीरस्वामी 'षूर्क्ष्य अनादरे' इति पठित्वाह—'षान्तोऽयमिति चन्द्र' इति । तत्र च 'सोमेन[1] यक्ष्यमाणो नर्तुं सूर्क्ष्येन्न नक्षत्रम्' इति दर्शनाद्यथादैवमेव[2] युक्तम्[3] ॥

धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति ।

'पुष धारणे' । ग्रसादिः । 'पुष पुष्टौ' । दिवादिः क्र्यादिर्भ्वादिश्च । 'पूष वृद्धौ' इत्यस्य तु पूषति ॥

म्लेच्छने म्रक्षयेन्म्रक्षेत् सङ्घाते

'म्रक्ष म्लेच्छने' । तच्चाव्यक्तवाग् अपशब्द इत्यर्थः । 'म्लेच्छो हवा एष यदपशब्दः' इति च श्रूयते । 'म्रक्ष सङ्घाते' ॥

दाहकर्मणि ॥ १७१ ॥

प्लोषति प्लुष्यतीति स्तां प्लुष्णाति स्नेहनादिषु ।
प्रुष्णाति च प्रोषति च दाहे

'श्रिषु श्लिषु प्रुषु प्लुषु दाहे' । 'प्लुष दाहे' । पुषादिः । क्षीरस्वामीत्वन्यथापि[1] दिवादावमुं पपाठ । तत्फलभेदः पुनरप्लुषदप्लोषीदित्यङो भावाभावौ । 'प्रुष प्लुष स्नेहनसेचनपूरणेषु' ।

---

१. सोमेन यक्ष्यमाणो 'वसन्ता ब्राह्मणोऽग्निमादधीत' 'उत्तरयोः फल्गुन्योरग्निमादधीत' इत्यादिऋतुनक्षत्राणि नाद्रियेतेत्यर्थकम् आपस्तम्बश्रौतसूत्रमिदम्. २. दैवोक्तमादरार्थत्वमेव धातोर्युक्तं, न पुनरन्योक्तमनादरार्थत्वमित्यर्थः. ३. पुषादेर्बहिरपि.

क्र्यादिः। एवं चैतेष्वेव क्र्यादिपाठात् 'बन्धने जुडतीति च' इतिवत् दाहेऽर्थे प्रोषतीति चेति वाक्यार्थसमुच्चय एव चः; दाह एव वा प्रागुक्तरूपयोः समुच्चयेन चात्रात्यन्ताय व्यवहितान्वयः, दाहग्रहणेनैव तयोरपि धिया सान्निधानात् ॥

भूषति भूषयेत् ॥ १७२ ॥

अलङ्कृतौ

'भूष अलङ्कारे' ॥

क्षमायां यौ मर्षेन्मर्षेत मर्षयेत्।
मृष्यते मृष्यतीति स्यात् सहने शपि मर्षति ॥ १७३ ॥

'मृष तितिक्षायाम्'। स्वरितेतौ। दिवादिश्चान्त्यः। शाकटायनस्य त्वाद्य आत्मनेपदी। 'पृषु वृषु मृषु सेचने'। 'मृषु सहने च' ॥

सेचने मेषतीति स्यात् स्पर्धायां मिषतीति शे।
व्याप्तौ वेवेष्टि वेविष्टे विषेर्वेषति सेचने ॥ १७४ ॥
विप्रयोगे विषेः क्र्यादेर्विष्णातीति पदं भवेत्।

'जिषु विषु मिषु सेचने'। 'मिष स्पर्धायाम्'। 'विषॢ व्याप्तौ'। जुहोत्यादिः। 'उदिदित्येके' इति क्षीरस्वामी। 'आर्याणामुदित्। द्रमिडानां लृदित्' इति धनपालः। पुषादि (३-१-५५) इत्यत्र सुधाकरश्च—"द्रमिडानामविषत्। आर्याणां तु 'शल इगुपधादनिटः क्सः (३-१-४५) अविक्षादिति नन्दी" इति। 'निजां त्रयाणां गुणः श्लौ' (७-४-७५) 'विष विप्रयोगे' ॥

---

१. इदं ८९ श्लोके. २. श्लोषति श्लुष्यतीत्यनयोः.

श्लिष्यत्यालिङ्गने दाहे श्लेषाति श्लेषणे णिचि ॥ १७५ ॥
श्लेषयेत्

'श्लिष आलिङ्गने' । दिवादिः । अत्रार्थे आङ्पूर्वत्वं प्रायिकमेव । यदाह भट्टिः—'मा न श्लिक्षः प्रियं प्रिये' इति । माघश्च—'श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीम्' इति । 'श्लिषु दाहे' । 'श्लिष श्लेषणे' ॥

क्रमतोऽलीके तुष्टौ हर्षाति हृष्यति ।

'हृषु अलीके' । 'हृष तुष्टौ' । दिवादिः ॥

शक्तौ वर्षयते सेके वर्षेत् स्नेहे तु वर्षते ॥ १७६ ॥

'वृष शक्तिसम्बन्ध' इति तु प्रायस्तन्त्रान्तरेऽपि पठ्यते । 'वृषु सेचने' । 'वर्ष स्नेहने' । अनुदात्तेत् ॥

भक्षयत्यदने भक्षेः शपि भक्षति भक्षते ।

'भक्ष अदने' । 'भक्ष भक्षणे' । 'भ्लक्षेत्येक' इति मैत्रेयरक्षितः । भ्रक्षेति क्षीरस्वामी । यथा तु 'गतिबुद्धी' (१-४-५२) त्यत्र 'भक्षेरहिंसार्थस्य' इति वार्तिकं प्रकृत्य 'भक्षयति पिण्डं देवदत्त' इत्येवोक्तं भाष्ये न पुनर्भक्षतीत्यपि, तथा भक्षतिर्नैवास्तीति गम्यते ॥

कान्तौ लष्यति लष्येत श्यनि वा लषते लषेत् ॥ १७७ ॥

'लष कान्तौ' । **श्यनि वेति** । वा भ्राशेति (३-१-७०) विकल्पेन श्यनि । ततश्च फलतः पुनःपाठं मत्वेदमुक्तम् । एतच्च क्रमुप्रभृतीनामपि कामं द्रष्टव्यम् ॥

कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे ।

'कृष विलेखने' । कर्षतिस्त्वाकर्षणे प्रसिद्धः ॥

शिषोऽसर्वोपयोगे यौ शेषयेच्छेषतीत्युभे ॥ १७८ ॥
लुङ्यभावादङोऽशेषीच्छिनष्टीति विशेषणे ।

'शिष असर्वोपयोगे' । 'शिष हिंसार्थे' इत्यस्यापि शेषतीति द्रष्टव्यम् । लुङीति । लृदित्त्वाभावादस्य लुङ्यङोऽभावः । 'शिषॢ विशेषण' इत्यस्य तु रुधादेर्लृदित्त्वादशिषदित्यङ् भवति । विपूर्वश्चायमत्रार्थे प्रयुज्यते । अत्र चाशेषीदित्ययुक्तम्, 'शिषिं पिषिम्' इत्यनिट्कारिकाप्रामाण्याच्छिषिमात्रस्यानिट्त्वेन 'शल इगुपधादनिटः क्सः' (३-१-४५) इति क्से सति आशिक्षदित्येव युक्तत्वात् ॥

शपि रोषति हिंसायां रोषे रुष्यति रोषयेत् ॥ १७९ ॥

रुष हिंसार्थः । 'रुष रोषे' । दिवादिश्चुरादिश्च ॥

चुम्बने परिमाणे च निक्षेन्निक्षयते क्रमात् ।

'णिक्ष चुम्बने' । 'निक्षति चुम्बति निंस्ते तन्व्या§ मुखपङ्कजं प्रेयान्' इति च सुन्दरपाण्डयः । रोषे इति तु 'वा निंसनिक्षनिन्दाम्' (८-४-३३) इत्यत्र न्यासः — 'णिक्ष परिमाणे' । चितादिः । निष्केत्येव तु दृश्यते । मैत्रेयरक्षितेन च निष्कमित्युदाहृतम् ॥

जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥ १८० ॥
प्रीतिसेवनयोरिष्टं तुदादेर्जुषतेपदम् ।

'जुष परितर्कणे' । 'परितर्पणे परितृप्तिक्रियायाम्' इति क्षीरस्वामी । 'जुषी प्रीतिसेवनयोः' ॥

---

§ 'तस्या' इति पाठस्याप्यनुकूलोऽक्षरविन्यासः.

धृषेः प्रसहने यौ स्तां धर्षयेद् धर्षतीत्युभे ॥ १८१ ॥
प्रागल्भ्यार्थे तु धृष्णोति परस्मैपदिनावुभौ ॥ १८१½ ॥

'धृष प्रसहने' । 'धृषा प्रसहन' इति शाकटायनः । 'ञि-धृषा प्रागल्भ्ये' । स्वादिः ॥

आलोचनार्थाण्णिचि लक्षयेत
स्याल्लक्षयेल्लक्षयतेऽङ्कनार्थात् ।

'शम लक्ष आलोचने' । चितादिः । 'लक्ष दर्शनाङ्कनयोः' । अत्र मैत्रेयरक्षितः—'स्वरितेत्त्वमस्य केचित् प्रतिपद्यन्ते । एतच्च ज्ञापकं चुरादिण्यन्ताद् 'णिचश्च' (१-३-७४) इत्यात्मनेपदं न भवतीत्यत्र' इति । हरदत्तस्तु 'णिचश्च' इत्यत्राह—

'एष विधिर्न चुरादिण्यन्तात् स्यादिति कश्चन निश्चुनुते स्म ।
आप्तवचोऽत्र न किञ्चन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षम्' ॥

इति ॥

स्यात् तक्षतीति त्वचनेऽथ वा श्नौ
तक्ष्णोति तक्षेच्च तनूक्रियायाम् ॥ १८२½ ॥

'तक्ष त्वचने' । अत्र क्षीरस्वामी—'त्वचनं त्वचो ग्रहणम् । संवरणमिति दुर्ग' इति । यथादुर्गमेव च धनपालशाकटायनौ । अयं चार्थः 'त्वच संवरण' इति धातुपाठसिद्ध इत्यन्तरङ्गः । [1]अन्यस्तु 'सत्यापपाशे' (३-१-२५) त्यत्र त्वचं गृह्णातीति णिचि कृद्वृत्तिसिद्ध इति बहिरङ्गः । णिच्कल्पनं चात्रातिरिच्यते । [2]त्वक्षेत्येव तु बह्वनुमतः पाठः । तथा च 'तनूकरणे तक्षः' (३-१-७६) इत्यत्र वृत्तिः । 'धातूनामनेकार्थत्वाद् विशेषणोपादानमि'ति । यदि हि त्वचनेऽपि तक्षतिः स्यात् ततस्तद्धानायैव

---

१. त्वग्ग्रहणरूपस्तु. २. त्वक्ष त्वचन इत्येव, नतु तक्ष त्वचन इतीत्यर्थः.

विशेषणोपादानं स्यात् । एवं च 'स्यात्त्वक्षती'ति पठित्वा तदेव चकारेणाप्यनुकृष्य तनूक्रियायाञ्च त्वक्षतीति भवतीति कामं व्याख्यायताम् । इटा [1]भिदेत्यप्यूह्यताम् । तक्ष्णोति तक्षेदिति च लषिवद्वा [2]सादृश्याद्वा नीयताम् । 'तक्षू त्वक्षू तनूकरणे' । 'अक्षोऽन्यतरस्याम्' । 'तनूकरणे तक्षः' (६-१-७६) इति वा क्षुः ॥

आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत् ॥ १८३ ॥

हिंसायां शसाति

'आङः शासि इच्छायाम्' । अनुदात्तेत् । क्षीरस्वामी तु 'दौर्गा आङः शन्सिवित्याहुः' इत्याह; आशंस्यते आशस्यत इति फलभेदं च । 'शन्सु स्तुतौ' । शंस्विति [3]रूढे पाठेऽपि नोपध एवायम् । तत्फलं च शस्यत इत्यादौ नलोपः । 'शसु हिंसायाम् ॥

इच्छायामाशास्ते शास्ति शासने ।

'आङः शासु इच्छायाम्' । 'शासु अनुशिष्टौ' । अदादी ॥

शब्दार्थे नासते नासेः कौटिल्ये नसते नसेः ॥ १८४ ॥

'णासृ रासृ शब्दे' । 'णस कौटिल्ये' ॥

असतेऽसति गत्यादौ भुव्यस्ति क्षेपणेऽस्यति ।

'अस गतिदीप्त्यादानेषु' । तथा च काव्यालङ्कारे वामनः—"'लावण्य उत्पाद्य इवास यत्नः' इत्यत्र आसेत्यसतेः" इति । 'अष इत्येके' इति मैत्रेयरक्षितः । आषिति च शाकटायनः । 'अस भुवि' । अदादिः । भवनं भूः । 'असु क्षेपणे' । दिवादिः ॥

---

१. त्वक्षेस्त्वचने नित्यमिट्, तनूकरणे तु ऊदित्त्वाद् वैकल्पिक इति भेदः. २. लषिवत् फलतो द्विष्पाठानाश्रयणेऽपि तक्षेस्त्वक्षधातुना भूयोवयवैक्यात् सहोक्तिः समर्थ्यतामिति भावः. ३. प्रसिद्धे.

अस्रांसिष्ट स्रंसते चाद्युतादे-
स्ते च द्वे स्तामस्रसच्च द्युतादेः ।
ध्वंसत्यादेः साहचर्याद् द्युतादे-
र्नीगित्याहुर्दत्वमन्यस्य चापि ॥ १८५½ ॥

'स्रन्सु प्रमादे' । क्षीरस्वामी तु सृन्भु इति भकारान्तं प्रकरणानुरोधेन पठित्वा 'स्रन्स्वित्येक' इत्याह । मैत्रेयरक्षितस्तु— 'संयोगान्तसाधर्म्येण सकारान्तोऽप्यत्र निर्दिश्यते' इति । 'स्रंसु ध्वंसु भ्रंसु अवस्रंसने' । अस्रसत् । 'द्युद्भ्यो लुङि' (१-३-९१) इति विभषा परस्मैपदम् । 'पुषादिद्युतादी'ति (३-१-५५) अङ् । 'अनिदितामि'ति (६-४-२४) नलोपः । ([1]यश्च नीवच्चुस्रनुसुध्वंसुभ्रंस्वनडुहां द इति दत्वं तु ध्वंसुसाहचर्यानभ्युपगमनादाद्युदात्तश्चेत्याह ?) अत्र मैत्रेयरक्षितः—'द्युतादावप्ययं पठ्यते । तस्यैव ध्वंसुभ्रंसुसाहचर्यान्नीगित्याहुः । दत्वे पुनरसाहचर्यमिच्छन्ति 'उखास्रद्' इति ।

दंसयेन्मोक्षणे दस्येत् क्षये दंसयते णिचि ॥१८६ ॥
दंशदर्शनयोर्दासेर्दाने दासति दासते ।

'जसि मोक्षणे' । 'दसि च' । रक्षण इत्येव तु दृश्यते । तत्रापि दसि चेत्येतत् क्वचिदेव कोशे । तथा च जसु ([2]कुडुपल-

---

१. इदं कुण्डलेरेखान्तर्गतं शब्दजालं 'यश्च नीक् नीग्वञ्चुस्रंसुध्वंसुभ्रंसु (७-४-८४) इति, स ध्वंसुभ्रंसुसाहचर्याद् द्युतादेर्भवति; वसुस्रंसुध्वंस्वनडुहां दः (८-२-७२) इति दत्वं तु ध्वंसुसाहचर्यानभ्युपगमाद् अद्युतादेश्चेत्याहुः' इत्यर्थकं किमप्युत्तरार्धव्याख्यानपरं वाक्यं स्यादिति प्रतिभाति. २. 'कुडुम्ब रक्षण' इति स्यात्.

क्षण!) इत्येव शाकटायनः ।

वस्यति स्तम्भने वस्ते छादने वसयेद् वसेत् ॥ १८७ ॥

निवासे वासयेत् स्नेहे वासयत्युपसेवने ।

[वसेन्निवासे वसयेच्च वस्ते
त्वाच्छादने स्तम्भन एव वस्येत् ।
निवासयत्याच्छदने निवासे-
रासेवने वासयतीति वासेः ॥]

मोक्षणे जस्यतीति स्याण्णावत्रार्थे तु जंसयेत् ॥ १८८ ॥

हिंसाताडनयोर्धात्वोरुदितोर्जासयेदिति ।

तस्यत्युपक्षयार्थे णावलङ्कारे तु तंसयेत् ॥ १८९ ॥

ध्रस्नाति ध्रासयत्युञ्छे पदे श्नि णिचि च ध्रसेः ।

यमुकारः । उद्ध्रसां चकारोध्र(सा?)स्नादित्युदाहृतेः ।

---

१. इत ऊर्ध्वं 'यमुकारः' इत्यतः प्राक् पत्रमेकं नोपलभ्यते पुरुषकारे । अतस्तावतो ग्रन्थस्य मूलं यथाप्रमाणं विवियते । 'तसु उपक्षये' । 'दसु च' । दिवादिः । 'दसि दर्शनदंशनयोः' । चितादिः । 'दासृ दाने' । स्वरितेत्. २. 'वसु स्तम्भे' । दिवादिः । 'अपरे वकारादिमाहुः' इति माधवः । 'वस आच्छादने' । अदादिः । 'वस निवासे' । कथादिः । तत्त्वं च 'बहुलमेतन्निदर्शनम्' इत्यस्यादन्तधातुनिदर्शनार्थत्वादनुमेयमिति भट्टोजिदीक्षिताः । 'वस निवासे' । भूवादिः । 'वस स्नेहच्छेदापहरणेषु' । चुरादिः । 'वास उपसेवायाम्' कथादिः. ३. ख पुस्तकेऽयं श्लोकोऽधिको दृश्यते, किन्तु एतद् 'वस्यति स्तम्भने' इत्यादिपूर्वश्लोकस्य पाठान्तरं न भवितुमर्हति, स्नेहार्थस्य वसधातोरत्रावचनाद् विरूपस्य निवासधातोर्वचनाच्च. ४. 'जसु मोक्षणे' । दिवादिः । 'जासि मोक्षणे' । 'जसु हिंसायाम्' । 'जसु ताडने' । चुरादी. ५. 'तसु उपक्षये' । दिवादिः । 'तसि भूष अलङ्करणे' । चुरादिः. ६. 'उध्रस उञ्छे' । क्र्यादिश्चुरादिश्च. ७. यकारात् प्राक् 'धात्ववयवोऽ' इति स्यात्.

अपरथा च ध्रसु इत्येव ब्रूयादित्यभिप्रायः । यथा तु भूधातोः स एवाह —

'दरिद्राजागृदीधीङामेकाचां च चिरेर्जिरेः ।
अदन्तोर्णोनिवेर्वीङां स्मर्यते नेत् तथौलडेः ॥'

इति, तथा अत्रेत्त्वेन भाव्यम् । ध्रसू इति च शाकटायनः ॥

लासयेच्छिल्पयोगेऽर्थे श्लेषणे क्रीडने लसेत् ॥ १९० ॥

'लस शिल्पयोगे' । 'शिल्पोपयोग' इति क्षीरस्वामी । 'केचिन्मूर्धन्यान्तमेनं धातुं पठन्ती'ति च । 'लस श्लेषणक्रीडनयोः' ॥

भाषणे त्रंसयेत् त्रंसेर्धारणे* त्रासयेण्णिचि ।
त्रसति त्रस्यतीत्येवमुद्वेगार्थे तु वा श्यनि ॥ १९१ ॥

त्रसि भाषार्थः । 'त्रस धारणे' । अत्र मैत्रेयरक्षितः — 'त्रासयति मृगान् । वारणे धारणशब्दः' इति । वारणे इत्येव च शाकटायनः । 'त्रसी उद्वेगे' । 'वा भ्राशेति (३-१-७०) श्यन् ॥

णौ पिंसयति भाषार्थे गत्यां तु शपि पेसति ।

पिसि भाषार्थः । 'पिस गतौ' इत्यपि चुरादौ पठ्यते । 'तुजि पिजि पिस हिंसाबलादाननिकेतनेषु' इति तु धनपालः । शाकटायनस्याद्ययोरुदित्पाठमात्रं विशेषः । सर्वथा तस्य पेसयतीति द्रष्टव्यम् । 'पिसृ पेसृ गतौ' । निट्टनेट्टवद् द्वावपीह कामं ग्राह्यौ ॥

गतिशासनयोः कंस्ते कसतीति गतौ शपि ॥ १९२ ॥

'कसि गतिशासनयोः । कशेति वामनः । उक्तं च भूवा-

---

१. 'प्रतिष्कशश्च कशेः' इति सूत्रे काशिकायाम् .

---

* 'द्धारणे' इति खपुस्तके पाठः.

दिसूत्रे सुधाकरेण — "कसि गतिशासनयोरिति पारायणिकैरुदाहारि कंस्ते कंस इति । 'प्रतिष्कशश्च कशेः' (६-१-१५२) इति च कश गतीत्येवायमाम्नायि" इति । 'कसेत्येके' इति च क्षीरस्वामी । 'गृ विज्ञाने' इत्यत्र च स एवाह—'कसि गतिशासनयोरितीकारान्तोऽकारान्तः शकारान्तश्च पठ्यते' इति । तदा कस्ते कष्टे इत्यपि द्रष्टव्यम् । 'कस गतौ' ॥

शब्दे शपि रसेत् स्नेहास्वादयो रसयेद्रसेः ।

'रस शब्दे' । रासेस्तु तङि रासते । 'रस आस्वादनस्नेहनयोः' । कथादिः ॥

प्रपूरणे दोग्धि दुग्धे दोहतीत्यर्दने दुहेः ॥ १९३ ॥

'दुह प्रपूरणे' । अदादिः । तच्च दोहनाख्यं रेचनम् । प्रतिष्ठत इतिवद् धात्वर्थवैपरीत्ये प्रः । 'तुहिर् दुहिर् अर्दने' । 'तुहिर् उहिर् इत्येके' इति मैत्रेयरक्षितः । क्षीरस्वामी त्वेवमेव पठित्वाह—'तुहिर् दुहिर् इति दौर्गाः' इति ॥

ण्यन्तस्य ग्रहणे गृहेर्गृह्यते तत्रानदन्ताद् गृहे-
र्भूवादेः शपि गर्हते श्नि तु पदे गृह्णात्यगृह्णीत च ।
गर्हेर्वा णिचि निन्दनार्थविषये गर्हेत् तथा गर्हयेद्
भूवादेः शपि कुत्सनार्थविषये गर्हेर्भवेद्गर्हते ॥ १९४ ॥

'गृह ग्रहणे' । पदादिः । 'गृहू ग्रहणे' । अनुदात्तेत् । अनदन्ताद् गृहेरित्यनेनैव पूर्वस्यादन्तत्वमात्रं विशेषो गृ(ही?)हित्वं (च?) चाविशिष्टमिति दर्शयता मन्दानां ग्रहपाठशङ्का(विति?)पि निरवकाशतां नीता । 'ग्रह उपादाने' । 'गर्ह निन्दने' ।

---

१. 'णासृ रासृ शब्दे' इति पठितस्य.

'गर्ह गल्ह कुत्सायाम्' । अनुदात्तेतौ । ये त्वेतत् पद्यं प्रबन्धान्त एव पठन्ति, तेषां सत्यपि वृत्तभेदकृते परभागे गर्हयायमुपसंहारो भवन् पुरोभागिनां श्रवणोत्सवमेव पुष्णीयात्, न चेदयमन्यो व्यत्ययेन पाठोऽद्रक्ष्यत ॥

रहयेद्रहति त्यागे गतौ रंहेस्तु रंहति ।

'रह त्यागे' । कथादिर्भूवादिश्च[1] । तत्र चान्त्याद्धेतुमाण्णिचि राहयति । 'रहि गतौ' ॥

श्ने तृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः ॥ १९५ ॥

तृह हिंसायाम् । तृहः श्नमि कृते[2] ढत्वधत्वष्टुत्वढलोपाः । तृह् ष्टृह् तृन्ह् हिंसार्थाः । क्षीरस्वामी तु—'तृह् तृन्ह् ष्टृह् ष्टृन्ह् हिंसार्थाः । तृहप्रभृतयश्चत्वारो धातवो हिंसार्थाः' इति । तत्र च तृंहति स्तृहति स्तृंहतीत्यपि कामं द्रष्टव्यम् । तृम्फादित्वान्नुम् ॥

महयेन्महतीत्येते पूजायां णौ शपि क्रमात् ।

'मह पूजायाम्' । आद्यः कथादिः । मंहत इत्यपि 'महि वृद्धौ' इत्यस्यानुदात्तेतो द्रष्टव्यम् । क्षीरस्वामी तु भाषार्थ इत्याह । तस्य तु मंहयतीति ॥

चहयेच्चहतीत्येते चहेः स्तां परिकल्कने ॥ १९६ ॥

'चह परिकल्कने' । चुरादिः कथादिश्चाद्यः । तत्र चाद्ये चपेति मैत्रेयरक्षितः । चहिश्चापिर्वात्रार्थे णिचमुत्पादयति मिच्च भवतीत्यर्थः । अत्र च मित्त्वफलम् अचाहि अचहि चाहं चाहं

---

१. अन्योऽपि भाषार्थ इदिचुरादौ दृश्यते सिद्धान्तकौमुद्याम्. २. इमि चेति शेषः.

चहं चहामिति चिण्णमुलोर्दीर्घविकल्पः । अदन्तत्वफलमग्लोपित्वेन 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (७-४-९३) इति सन्वत्त्वस्य 'दीर्घो लघोः' (७-४-९४) इति दीर्घत्वस्य चाभावादचचहादिति ॥

मर्षणे सहते यौ तु साहयेत् सहति द्वयम् ।

श्यानि सह्यति श(क्या?)क्यर्थे

'षह मर्षणे' । 'षह षुह श(क्या?)क्यर्थे' । क्षीरस्वामी तु षुहेत्येव पठित्वाह — 'षह षुह शक्ताविति दुर्ग' इति । षुहेत्येव च धनपालशाकटायनौ ॥

पूजनेऽर्हति चार्हयेत् ॥ १९७ ॥

अर्ह पूजायाम्' ॥

स्नेहने स्नेहयेत् प्रीतौ स्निह्येद्

'ष्णिह स्नेहने' । स्निहेति क्षीरस्वामिधनपालशाकटायनाः । तदापि दन्त्यपरसादित्वात् ष्णिहेत्येव युक्तम् । 'ष्णिह प्रीतौ' ॥

बृंहति बर्हति ।

वृद्धौ भाषार्थविषये बृंहयेद् बर्हयेदिति १९८ ॥

'दृह दृहि बृह बृहि वृद्धौ' । 'बृहि शब्दे च' इति । (द्वयम् । यदाह क्षीरस्वामी इति ?) बृहिर् इति दौर्गाः । अबृहत्

---

१. एष दीर्घपाठो मूलपुस्तकेषु पुरुषकारे चैकरूपो दृश्यते । 'क्य' इति ह्रस्व एव तु पठितुं युक्तो दुर्गानुसारात् शक्तेः शक्यर्थत्वात्. २. अर्थश्चास्य चक्यर्थ एवेति षुहधातुस्थमाधवग्रन्थात् प्रतीयते, यत् स आह — 'चक्यर्थस्तृप्तिरिति क्षीरस्वामिधनपालशाकटायनाः' इति. ३. 'द्वयमाह क्षीरस्वामी' इति पाठः सुकल्पो भाति.

अबर्हीदिति । यथादौर्गमेव चान्द्राः । अनुदात्तेत्सु च स एवाह—'बर्ह बल्ह प्राधान्ये । (मुदिञ्?) घञ् बर्हं बल्हम् । चुरादौ तु भाषार्थौ । बर्हयति बल्हयति' इति । 'वर्ह वल्ह परिभाषणहिंसाछादनेषु' इति च । मैत्रेयरक्षितः पुनः 'वर्ह वल्ह प्राधान्ये । बर्ह बल्ह परिभाषणहिंसाछादनेषु' इत्यर्थव्यत्ययेन पपाठ । नैव च तृतीयं धनपालस्य 'वर्ह वल्ह प्राधान्ये । वर्ह वल्ह परिभाषणहिंसाछादनेषु । छादयत्यनेनेति वर्हं घञ्' । इति । शाकटायनोऽप्यत्रैव पाठेऽनुकूलः । [भाषाविशेषार्थत्वात्?] तत्र च प्रबर्हार्थानुकूल्यादाद्यः पाठो युक्तः । 'प्रवल्हिका प्रहेळिका' इति चात्रैवानुकूलः, भाषाविशेषार्थत्वात् प्रवल्हेः । तथा च बह्वृचब्राह्मणं—'प्रवल्हिकाः शंसति । प्रवल्हिकाभिर्वै देवा असुरान् प्रवल्ह्याथैनानत्यायन्' इति । व्याकृतं चैतत् गोविन्दस्वामिना—"प्रवल्हिकाः प्रहेळिकाः 'विततौ किरणौ द्वौ' इति षडनुष्टुभः । प्रवल्ह्य अनृतं भाषित्वा" इति । सर्वथापि बर्हत इत्याद्यपि काममूह्यम् । सर्वत्रैवं तत्तद्ग्रन्थगतास्तत्तत्पाठभेदादयो (यथा?) द्रष्टव्याः, युक्त्यादिभ्यश्च विवेक्तव्याः । बृहि बर्ह भाषार्थौ । 'ब्रूस बर्ह हिंसायाम्' इत्यस्यापि बर्हयेत् । इतिः पुनः प्रकारार्थः प्रकरणसमाप्त्यर्थश्च । 'पठितस्य पुनः पाठे' इति यदुपक्रान्तं, तदित्थमुपसंहृतमित्यर्थः ॥

---

१. पवर्गतृतीयं बवर्णमित्यर्थः । एवं तु वर्ह वल्ह प्राधान्यपरिभाषणहिंसाछादनेष्विति शक्यं पठितुं धनपालस्य. २. क्षीरस्वामिमैत्रेयधनपालपाठेषु त्रिषु मध्ये ३. प्राधान्यलक्षणोऽर्थः प्रबर्हशब्दस्यैव प्रसिद्धो, न तु दन्तोष्ठ्यवतः प्रवर्हशब्दस्येत्यभिप्रायः. ४. अमर इति शेषः, यादव इति वा. ५. 'यथायथम्' इति पठनीयम्. ६. इदं पदमादर्शे नास्ति तथापि 'समाप्त्यर्थश्चे'ति चकारस्य, 'तदित्थमुपसंहृतम्' इति इत्थंपदस्य चोपपत्तये प्रक्षेप्तव्यमेवेति भाति.

कथं पुनरत्र प्रकरणे सर्वत्रापि पुनः पठिता धातवो व्युत्पाद्यन्ते । त(दे?)थैव पुनः पाठो भवेत्, यथा भूप्रभृतयः । येषां पुनर्नुमादिना भिन्नरूपता, कथमिव तेषां पुनः पाठो भवेत् । तत्र नुमा तावत् बृंहति बर्हतीत्यादिषु अनन्तरोदितेष्वेवासौ दृश्यते । अत्र हि अन्यश्च बृहिरिति सकृदेव तयोः पाठः प्रस्फुटः । अथापि बृंहतिबृंहयत्योरत्र पुनः पाठो भविष्यति । तथापि कथं बृहिबृंह्योः 'इदितस्त्वङ्कृते तत्र' (४१श्लो) इत्यादिषु च चरिष्यसि । न च तेष्वपि पाठावस्थायां नुमभावाद्भवेदेव पुनः पाठ इति साम्प्रतं, नुंविधावुपदेशिवद्वचनेन धातुग्रहणबलेनैव वा नुमोऽपि पठितकल्पत्वात् । अथापि धातुपाठसिद्धं रूपमनूद्यैतत्फलवचनप्रतिज्ञानाद् भवत्येवात्रापि नुंविधुरेण पठितेन रूपेण पुनः पाठः । तथापि बृहिबर्ह्योः, 'अङ्क लक्षण' (४१श्लो) इत्यादिषु च का वार्त्ता । एवमन्यत्राप्येवंविधे 'दो द्यति (४ श्लो) इत्यादौ, 'क्षिणोत्यावगुणे क्षिणोः' (१३ श्लो) इत्यादौ च भिन्नरूपधातुपाठफलोपदर्शने पर्यनुयोगं प्राप्तं प्रत्याह —

नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत ।

यत् क्वचिन्नुमादिनान्यत्वेऽपि केऽपि धातव उक्ताः केषांचित् पुनःपाठफलमुक्तमिति यावत्, तच्च यथादर्शनं मिथस्तेषां सादृश्याद्युक्तमेव । ततश्च 'पठितस्ये'त्यस्याः प्रतिज्ञायाः क्वचिद-

---

१. भिन्नरूपता. २. इतः प्राक् 'अन्यो बृंहिः' इत्यपेक्षितमिति भाति. ३. गतिं वक्ष्यसीत्यर्थः. ४. एतच्च कुण्डा हुण्डेत्यादौ 'गुरोश्च हलः' (३-३-१०३) इत्यप्रत्ययार्थमावश्यकम्.

प्यन्यथात्वमशङ्कनीयमेवेत्यर्थः । अत्र च पूर्वोक्तरीत्या नुमान्यभावस्यासम्भवाद् आदिशब्दोपात्त एव तात्पर्यं द्रष्टव्यम् । नुंग्रहणं वा नकारोपलक्षणम् । नुमिति नकारस्य पूर्वाचार्यसंज्ञेति च 'न धातुलोप आर्धधातुक' (१-१-४) इत्यत्र कैयटः ॥

मया चात्र 'चौ मित्त्वेऽपीदमेव' (८ श्लो) 'यौ द्रवीकरणेऽनात्वे' (१७ श्लो) इत्यादौ चुशब्दयुशब्दौ व्यवहृतौ श(ब्दाकाशे?)ब्दैकदेशलक्षणान्यायेन चुरादियुजादिपरौ वेदितव्यौ 'बेष्कयासे' 'नब्विषयस्यानिसन्तस्य' इत्यादौ सशब्दनप्छब्दाविव समासनपुंसकपरावित्याह —

चुरादिश्चुर्युजादिर्युः स यस्माण्णिज्विभाषितः ॥ १९९ ॥

यस्माद्गणाद् 'आधृषाद्वा' इति णिज्विकल्पितः, स युजादिर्युः । युजादेर्णिज्विकल्पाव्यभिचाराद्युजादिरित्येव वाच्ये स इत्यादिवचनं युशब्दयुजादिशब्दाभ्यामिह व्यवहारस्य लीनयेल्लयेदित्याद्युदाहृतणिज्विकल्पनिर्वाहार्थतोपदर्शनेन चुरादिभूवादिधातुद्वयशङ्काप्रसङ्गव्युदासार्थम् । 'इत्यत्र परिभाषितम्' इत्येव च कैचित् पठ्यते । श्लोकश्चायं न्यायसिद्धार्थतयानावश्यकत्वाशयेन वृद्धिसंज्ञादिवदादावेव न निवेशयाम्बभूवे ॥

ननु च 'कु शब्दे तारे' इत्येवंजातीयकाः केचिदनुक्ता अपि सरूपधातवः सन्त्येव । तत् कथं यथोक्ता प्रतिज्ञा निरङ्कुशं निरवाहीत्यत आह—

सरूपा धातवः केचि-
दनुक्ता अपि सन्ति चेत् ।

---

१. धातुपाठसिद्धं रूपमनूद्यैतत्फलवचनं देवेन प्रतिज्ञातामिति विवरणरीत्या.
२. इदमुत्सादि (४-१-८१) गणे द्रष्टव्यम्. ३. चतुर्थपाद इति शेषः.

सन्तूक्तास्तेऽपि चात्रोक्ता
न दुष्यन्त्यन्यसम्भवे ॥ २०० ॥

अत्र च अत्रेत्येतत् पूर्वार्धेऽप्यर्थादुत्तरार्धादन्वेति । अत्रोक्ता अनुक्ता अपि च सन्तु नाम । तथाप्यधिकसम्भवमात्रेणोक्तास्तावन्नैव दुष्यन्तीति । 'पठितस्य' (२ श्लो) इति प्रतिज्ञाप्येवं यथोक्तविषये भविष्यतीति न किञ्चन दुष्यतीति भावः । तत्र च सन्तूक्ता न दुष्यन्तीत्येतावत्येव वक्तव्ये 'उक्तास्तेऽपि च' इत्यधिकवचनं त्वयापि 'अनुक्ता अपि' इति ब्रुवतोक्ता अप्यभ्युपगता एवेत्येवम्परम् । न्यायश्चायं प्रपञ्चभयादिनास्मदनुक्तेष्वपि तत्तदनुबन्धकार्यादिषु वक्तव्यशेषेषु द्रष्टव्यम् ॥

इत्यनेकविकरणसरूपधातुव्याख्यानं देवनाम्ना
विरचितं दैवं समाप्तम् ।

ऐकरूप्येण वा सादृश्येन वा सरूपाणां यथोक्तानां धातूनां यथोक्तेनैव विकरणादिकृतेन रूपभेदेनार्थभेदेनोभयेनापि वा पुनःपाठफलोक्त्या व्याख्यानमित्यर्थः । करणे ल्युट् । अत्र च वक्ष्यते (२ श्लो) इत्युपक्रम्यापि व्याख्यानमित्युपसंहारः प्रकरणस्य श्लाघ्यतातिशयोपदर्शनपरः । दैवमिति (च?) 'तस्येदम्' (४-३-१२०) इति वा, 'कृते ग्रन्थे' (४-३-११६) इति वा देवादणि दैवमिति रूपम् । कृतवाद्येव च विरचितशब्देना (प्यु?) णुपदर्शितः । एवं तु देवकीयमिति प्राप्नुयात् (गतोत्तरपदा गच्छ?)

'[2]अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥'

---

१. अस्य स्थाने 'गतोत्तरपदाच्छः (४-२-१३७) गहादिभ्यश्च(४-२-१३८) इति कुकूछयोः प्रसङ्गात्' इति पठनीयं भाति. २. एष परिहारग्रन्थः.

इति न्यायात् प्रसिद्ध एव देवादौ तत्तत्कार्यप्रवृत्तेर्नाम्नि तयोरप्रवृत्तम् । अत एव च देवनाम्नेत्युक्तम् । तथा च 'बाह्वादिभ्यश्च' (४-१-९६) इत्यत्र भाष्यं—बाहोरपत्यं बाहविः । यो हि बाहुर्नाम बाहवस्तस्य भवति' इति । यदि पुनर्भक्त्यादिवशात् प्रसिद्धदेवत्वारोपेणैवात्र देवशब्दः प्रवर्तितो भवेत्, तदापि तस्य विकार इत्यस्यां विवक्षायां 'देवस्य यञञौ' इति वार्तिकेनाञि कृते रूपमेतद् भविष्यति । तथा च —'दैवो विस्तरशः प्रोक्तः' इति भगवान् कृष्णः । तथैव च 'गहादिभ्यश्च' (४-२-१३८) इत्यत्रामुमेव प्रयोगं सुधाकरः समर्थयाम्बभूव । 'अपवादविषये क्वचिदुत्सर्गस्यापि समावेश' इति ब्रुवतः परमेश्वरभोजदेवस्य मतेनाणैवाप्यविकलमभिमतं सम्पद्यते । भाष्यकारवचनप्रामाण्याद्वा सिद्धम् । तथा हि 'पृषोदरादीनि यथोपदिष्टम्' (६-३-१०९) इत्यत्र भगवान् पतञ्जलिर्बभाषे—'नूनमस्य [३]दैवोऽनुग्रह' इति ॥

उक्तानुक्तदुरुक्तानि स्थाने स्थाने विविञ्चता ।
कृष्णलीलाशुकेनैवं कीर्तितं (नै?)दैववार्तिकम् ॥
कृष्णलीलाशुकस्येयं कृतिः कृतिमनोहरा ।
पुष्णती कृष्णसम्प्रीतिं भुवनान्यभिपुष्यतु ॥

इति श्रीकृष्णलीलाशुकमुनिविरचितो
दैवसहायः पुरुषकारः
समाप्तः ।

---

१. तयोः कुक्छयोः अप्रवृत्तं प्रवृत्त्यभावः । क्तो भावे. २. अक्लिष्टमित्यर्थः । अम्पक्षे हि विकारत्वं कृतत्वे नेतव्यम्. ३. दैव इति देवसम्बन्धीत्यर्थः.

APPENDIX

श्रीः ।

दैवम् ।

सच्चित्सुखैकरसवस्तुनि यत्र विश्वम्
मिथ्यैव रूप्यमिव राजति शुक्तिभित्ते ।
तस्मिन् प्रतीचि परमात्मनि चित्तवृत्ति-
र्ब्रह्माहमस्मि परमित्यनिशं ममास्तु ॥ १ ॥

पठितस्य पुनःपाठे फलं वृत्तेन वक्ष्यते ।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम् ॥ २ ॥

सत्तायां भवति प्राप्तौ णिचि भावयते तङि ।
भवते शपि तत्रैव भावयत्यवकल्कने ॥ ३ ॥

दाञो दत्ते ददातीति दाणो यच्छति दो द्यति ।
दाति दायति दाप्दैपोर्दयते रक्षणे ङितः ॥ ४ ॥

गाते गाङो गतावर्थे कै गै शब्देऽस्य गायति ।
पाने पिबति रक्षायां पाति पायति शोषणे ॥ ५ ॥

धेटो धयति पानार्थे धाञो धत्ते दधात्यपि ।
द्रै स्वप्ने द्रायति द्राति कुत्सिते गमने लुकि ॥ ६ ॥

शब्दसङ्घातयोर्धात्वोस्स्त्यायत्येकस्य सो न षः ।
सै क्षये सायतीतीष्टमन्तकर्माणि तु स्यति ॥ ७ ॥

जानातीति श्नि सिध्येज्ज्ञपयति तु पुनर्मारणादौ घटादे-
श्चौ मित्वेऽपीदमेव ज्ञप मिदिति पदं ज्ञापने मारणादौ ।
तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवद् ज्ञापयेदित्यपि स्या-
दुक्तस्योक्तिर्णिचश्चेत्युदितविहतये ज्ञापयेद् ज्ञो नियोगे ॥ ८ ॥

मिमीते मायते माने माति तत्रैव शब्लुकि ।
मयते प्रणिधानेऽर्थे श्राति श्रायति लुक्छपोः ॥ ९ ॥

गतिगन्धनयोर्वाति वायतीति तु शोषणे ।
वयते वयतीत्येवं तन्तुसन्तान इष्यते ॥ १० ॥

गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च ।
रै शब्दे रायतीतीष्टं रा दाने राति शब्लुकि ॥ ११ ॥

स्नातीति शौचे तु स्नायेदिति चेच्छन्ति केचन ।
क्षये क्षयति हिंसायां क्षिणातीति षितो भवेत् ॥ १२ ॥

निवासगत्योः क्षियति क्षिणोत्यावगुणे क्षिणोः ।
(एके क्षेरेव भाषायां क्षिणोतीति पदं विदुः ।)
जयेज्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ॥ १३ ॥

उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः ।
अयत्येतीयते गत्यामधीतेऽध्येति चेङ्कोः ॥ १४ ॥

सिनोति सिनुते बन्धे सिनीते च सिनाति च ।
ईषद्धासे स्मयेतेति स्माययेतेत्यनादरे ॥ १५ ॥

श्रीणाति पाके श्रीणीते सेवायां श्रयते श्रयेत् ।
मीञो मीनाति मीनीते हिंसायां मीयते ङितः ॥ १६ ॥

मिनोति मिनुते स्वादेर्गतौ मयति माययेत् ।
यौ द्रवीकरणेऽनात्वे लीनयेल्लाययेल्लयेत् ॥ १७ ॥

लापयेल्लालयेदात्वे श्लेषणे लीयतेऽलिनात् ।
श्रवणे रीयते रीङो रिणाति गतिरेषयोः ॥ १८ ॥

व्रीणाति वरणे तत्र व्रीङो व्रीयेत तु श्यनि ।
प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः ॥ १९ ॥

अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत् ।
विहायसां गतौ डीङो डयते डीयते पदे ॥ २० ॥

पुञः सुनोति सुनुते प्रसवैश्वर्ययोरसौत् ।
गतौ तयोश्च सवति द्विरुक्त्या तस्य सो न षः ॥ २१ ॥

स्थैर्ये ध्रवति गत्यां तु स्थैर्ये च ध्रुवतीति शे ।
दुनोति दूयते तापे दवतीति गतौ पदम् ॥ २२ ॥

अव्यक्तशब्दे कवते कुवते त्वार्तशब्दने ।
कौतीति शब्दमात्रे स्याद् रवते रौति शब्दने ॥ २३ ॥

यावयेत जुगुप्सायां मिश्रणे यौति बन्धने ।
युनाति च युनीते च स्तुत्यां नुवति नौति वा ॥ २४ ॥

प्रेरणे सुवति प्राणिप्रसवे सूयते भवेत् ।
प्राणिगर्भविमोकेऽर्थे सूते शे श्यनि शब्लुकि ॥ २५ ॥

धूनयति धवति धवते धुनोति धुनुते धुनाति च धुनीते ।
धूनोति धूनुते स्युः पदानि कम्पे विधूनने धुवति ॥ २६ ॥

श्नि पुनाति पुनीते स्तां पवने पवते ङितः ।
प्रसह्य हृत्यां हरणे जिहर्ति हरते हरेत् ॥ २७ ॥

भृञो बिभर्ति बिभृते भरते भरतीत्यपि ।
ऋदन्तस्य भृणातीति भर्त्सने श्नि तथा भरः ॥ २८ ॥

म्रियते स्यादवस्थाने धृङोऽवध्वंसने पुनः ।
धरते धारणार्थे तु धरते धरतीत्युभे ॥ २९ ॥

गतौ ससर्ति सरति श्लुशपोर्धावति क्वचित् ।
तत्रेयर्त्यृच्छतीत्यर्तेः श्नि गतौ स्यादृणाति च ॥ ३० ॥

हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः ।
करोति कुरुते द्वे द्वे सम्पद्येते पदे क्रमात् ॥ ३१ ॥

भक्तौ वृणीते वरणे वृणोति वृणुते वृञः ।
वृञ आवरणे वा णौ वारयेद्वरते वरेत् ॥ ३२ ॥

ज्ञाने गारयते गरेन्निगरणे शब्दे गृणाति त्रयं
युक्तं म्रो गरतीति सेकविषये ह्रस्वान्तधातोः शपि ।
सेके प्रस्रवणे क्रमाच्छपि णिचि स्यातां घरेद् घारयेद्
यद् दीप्तौ क्षरणे जिघर्त्ति तदिदं केचिद्विदुश्छान्दसम् ॥ ३३ ॥

प्रीतौ पृणोत्यृदन्तस्य व्यायामे प्रियते पृङः ।
मृणाति हिंसार्थे प्वादेर्मृङस्तु म्रियते पदम् ॥ ३४ ॥

स्तृञः श्चिच्छादने प्वादेः स्तृणीते च स्तृणाति च ।
श्नावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः ॥ ३५ ॥

दरेद् दृणाति द्रियते क्रमाद् भीदारणादरे ।
पृणाति पूरणे श्लौ तु पिपर्त्ति णिचि पारयेत् ॥ ३६ ॥

वृवृञोरञितो धातोर्वृणाति वरणे भवेत् ।
वृणाति च वृणीते च वृञस्तत्रार्थ इष्यते ॥ ३७ ॥

सिद्धे पदद्वये वृञो ञित्त्वाद्यदञितो वचः ।
फले तत्कर्त्रभिप्राये परस्मैपदसिद्धये ॥ ३८ ॥

जृणाति जीर्यति जरत्येकार्थे जारयत्यपि ।
कृणन् कृणीते हिंसायां विक्षेपे किरतीति शे ॥ ३९ ॥

तृप्तौ चकेत् प्रतीघाते तृप्तौ च चकते शपि ।
(प्रतीघाते च तृप्तौ च चकते चकतीति तु ।
तृप्तिमात्रे चकेरस्य मित्त्वाच्चकयतीति णौ ॥)
दर्शने लोकते लोकेर्भाषार्थे णौ तु लोकयेत् ॥ ४० ॥

अङ्क लक्षण इत्यस्य भवेदङ्कयतीति णौ ।
इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत् ॥ ४१ ॥

णिचि बुक्कयतीति स्यात् भाषणे शपि बुक्कति ।
मर्षणे शीकयेच्छीकेत् सेचने शपि शीकते ॥ ४२ ॥

शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे ।
शक्यते शक्यतीत्येवं शपि श्नौ श्यनि च क्रमात् ॥ ४३ ॥

तकेत् तङ्केद्यथासङ्ख्यं हसने कृच्छ्रजीवने ॥ ४३ $\frac{1}{2}$ ॥

अन्वेषणेऽर्थे मृगयेत णौ यौ मार्गेर्भवेन्मार्गति मार्गयेच्च ।
लिङ्गेर्गतौ लिङ्गति लिङ्गयेदित्यस्यैव चित्रीकरणार्थवृत्तेः ॥ ४४ $\frac{1}{2}$ ॥

भाषणे लङ्घयेच्छोषे लङ्घेद्गत्यां तु लङ्घते ॥ ४५ ॥

सेचने सचते तच्च समवाये सचत्यपि ।
णौ लोचयति भाषार्थे दर्शने शपि लोचते ॥ ४६ ॥

कल्कने मुञ्चते मुञ्चेर्मोक्षे मुञ्चति मुञ्चते ।
प्रमोचने चुरादेर्णौ मोचयत्येष न त्वलृदित् ॥ ४७ ॥

णौ पञ्चयति विस्तारे व्यक्तौ तु शपि पञ्चते ।
वञ्चतीति गतावर्थे वञ्चयेत प्रलम्भने ॥ ४८ ॥

पूजायां णौ विभाषार्चेरर्चयत्यर्चतेऽर्चति ।
भूवादौ पाठसामर्थ्यात् कर्तृगामिक्रियाफले ॥ ४९ ॥

गतियाचनयोरञ्चत्यञ्चते णौ विशेषणे ।
अञ्चयत्यञ्चतीत्येकं गतिपूजनयोरपि ॥ ५० ॥

वक्तीति भाषणे वा णौ वाचयेद्वचतीति वा ।
पृणक्ति पृङ्क्ते सम्पर्के यौ पर्चयति पर्चति ॥ ५१ ॥

रिचिर् विरेचने रिङ्क्ते रिणक्ति श्ने वियोजने ।
सम्पर्चने च यौ वा णौ रेचयत्यपि रेचति ॥ ५२ ॥

शुच्यते शुच्यतीत्येवं पूतीभावे शुचेः श्यनि ।
शोके शोचति हिंसायां तर्जने परिभाषणे ॥ ५३ ॥

चर्चत्यध्ययने त्वर्थे भवेच्चर्चयतीति णौ ।
सङ्कोचे कुचतीति स्यात् कोचेत् सम्पर्चनादिषु ॥ ५४ ॥

वियोजनेऽर्चयेदर्चेद् यौ स्तुतावृचतीत्यृचेः ।
शशपोरुञ्छतीत्युञ्छे स्वरभेदाद् द्विरुच्यते ॥ ५५ ॥

उच्छतीति विवासे स्यादिदितोऽनिदितस्तयोः ।
णौ विच्छयति भाषार्थे गतौ विच्छायतीति शे ॥ ५६ ॥

विच्छेराये शतुर्वा नुं शे स्यादिति तुदादिता ।
रजते रजतीत्येवं रज्यते रज्यतीत्यपि ॥ ५७ ॥

रागार्थे शप्श्यनोर्द्वे द्वे गतौ वजति वाजयेत् ।
दीप्तौ शप्येजते तत्र भवेदेजति कम्पने ॥ ५८ ॥

वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति ।
गर्जेद् गृञ्जेद् गजेद् गञ्जेच्छब्दने गाजयेण्णिचि ॥ ५९ ॥

धर्जेद् धृञ्जेद् भ्रजेद् भ्रञ्जेद् ध्वजेद् ध्वञ्जेद्गतौ शपि ।
शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् ॥ ६० ॥

मार्ष्टि शुद्धौ तथा मार्जेः शब्दार्थान्मार्जयेण्णिचि ।
वेवेक्तीति पृथग्भावे वेविक्ते च भये पुनः ॥ ६१ ॥

विनक्ति विजते सर्गे सृज्यते सृजतीति च ।
ऋञ्जते भर्जने गत्याद्यर्थे स्यादर्जते त्वृजेः ॥ ६२ ॥

प्रतियत्नेऽर्जयेदर्जेरर्जतीत्यर्जने पदम् ।
निङ्क्ते नेनेक्ति नेनिक्ते शौचेऽर्थे पोषणे तथा ॥ ६३ ॥

युनक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि ।
युजेः संयमनार्थे वा णौ योजयति योजति ॥ ६४ ॥

भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने ॥ ६४ ½ ॥

सेवायां भजते भजेदिति भजेर्विश्राणने भाजये-
दामर्दे तु भनक्ति भाजयति णौ भाजेः पृथक्कर्मणि ।
भाषार्थे णिचि भञ्जयेदभिहिते त्वर्थे पदं तुञ्जये-
द्धिंसायां शपि तुञ्जतीत्यनिदितस्तस्यां तुजेस्तोजति ॥ ६५ ½ ॥

सन्तर्जने तर्जयते भर्त्सनार्थे तु तर्जति ॥ ६६ ॥

वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति ।
गुञ्जेदव्यक्तशब्दे स्याच्छब्दमात्रे गुजेदिति ॥ ६७ ॥

भृज्जते भृज्जति भ्रस्जेर्भर्जने भर्जते भृजेः ।
प्रकाशे लजयेद्रीळे लजते लज्जते पदे ॥ ६८ ॥

लञ्जेल्लाञ्जेल्लजेल्लाजेदित्येते भर्त्सने शपि ।
भञ्जे रुजति हिंसायां रोजयेदिति णौ रुजेः ॥ ६९ ॥

घाटयेद् घण्टयेत् सङ्घभाषयोर्घटते मितः ।
क्रमाद्विकासे शशपोः स्फुटति स्फोटते पदे ॥ ७० ॥

स्फोटयेत् स्फोटतीति द्वे भेदे विशरणे क्रमात् ।
प्रमर्दने चाक्षेपे च मुटेदाद्ये तु मोटति ॥ ७१ ॥

सञ्चूर्णने चुरादेर्णौ मोटयेदतङस्त्रयः ।
हिंसातिक्रमयोरट्टेरट्टतेऽनादरेऽट्टयेत् ॥ ७२ ॥

घट्टयेद् घट्टते द्वे स्तां चलने णौ शपि क्रमात् ।
णौ लोटयति भाषार्थे लुट्येल्लोटति लोटने ॥ ७३ ॥

लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत् ।
रोटते प्रतिघातेऽर्थे रोषे रोटयतीति णौ ॥ ७४ ॥

कूटयेताप्रसादे णौ कूटेर्दाहे तु कूटयेत् ।
भाषासंसर्गसंश्लेषे पोटयेत् पुटयेत् पुटेत् ॥ ७५ ॥

नृतौ नटत्यवस्पन्दे चुरादेर्णीचि नाटयेत् ।
भाषार्थे पाटयेद् ग्रन्थे पटयेद् गमने पटेत् ॥ ७६ ॥

वण्टयेद्वण्टतीत्येते णिशपोः स्तां विभाजने ।
णावदन्ताद्वटेर्ग्रन्थे वटयेद्वेष्टने वटेत् ॥ ७७ ॥

श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् ।
लुण्ठेल्लोठति लोठेत किन्तु गत्यां च लुण्ठति ॥ ७८ ॥

रुण्ठतीति गतौ रोठेदुपघातेऽथ कण्ठते ।
शोके यौ कण्ठयेत् कण्ठेत् कठेत् स्यात् कृच्छ्रजीवने ॥ ७९ ॥

गतिप्रतिहतौ शोठत्यालस्ये शोठयेदिति ।
शुण्ठयेच्छुण्ठतीत्येवं शोषणे णौ शपि क्रमात् ॥ ८० ॥

शठयेच्छ्वठयेदेते द्वे सम्यगवभाषणे ।
गत्यसंस्कारधात्वर्थे शाठयेच्छ्वाठयेदिति ॥ ८१ ॥

कैतवे शठतीति स्याच्छ्लाघायां शाठयेत णौ ।
मण्ठते शपि शोकार्थे मठेन्मदनिवासयोः ॥ ८२ ॥

वण्ठते त्वेकचर्यायां स्थौल्ये शपि वठेदिति ।
मुण्डते मार्जने मुण्डेः खण्डने शपि मुण्डति ॥ ८३ ॥

भूषार्थे मण्डतीति स्यात्तत्र मण्डयतीति णौ ।
मण्डते वेष्टने स्तुत्यामीष्टे तत्रेडयेण्णिचि ॥ ८४ ॥

मन्थार्थे खण्डते खण्डेर्भेदार्थे खण्डयेण्णिचि ।
हेडतेऽनादरे हेडेर्वेष्टने हिडयेन्मितः ॥ ८५ ॥

होडतीति गतौ होडेर्होडतेऽनादरे पुनः ।
कण्डयेदिति भेदे णौ मदे तु शपि कण्डते ॥ ८६ ॥

लाडयत्युपसेवायां विलासे तु लडेच्छपि ।
मृडेन्मृण्णाति सुखने तत्रैव मृडतीति शे ॥ ८७ ॥

वैकल्यदाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत् ।
तोडनार्थे तुडेस्तुण्डेस्तुडेत्तोडति तुण्डते ॥ ८८ ॥

कल्याणे भण्डयेद्भण्डेत् परिहासे तु भण्डते ।
प्रेरणे जोडयेच्छे तु बन्धने जुडतीति च ॥ ८९ ॥

सङ्घाते पिण्डयेत् पिण्डेस्तत्रैव शपि पिण्डते ।
कणेः कणति शब्दार्थे काणयेण्णौ निमीलने ॥ ९० ॥

भूवाद्योर्घुणिघूर्ण्योः स्तां घोणते घूर्णते शपि ।
भ्रमणेऽत्र तुदाद्योः शे स्यातां घुणति घूर्णति ॥ ९१ ॥

अणेरणति शब्दार्थे प्राणने त्वण्यते श्यनि ।
मितः श्रणति दानार्थे श्राणयत्यत्र णौ पदम् ॥ ९२ ॥

व्रणेच्छब्दार्थविषये व्रणयेद् गात्रचूर्णने ।
आमन्त्रणे तु कुणयेच्छब्दे चोपकृतौ कुणेत् ॥ ९३ ॥

बन्धनेऽन्तति सातत्यगमनेऽतति चिन्तयेत् ।
स्मृत्यां चेतति संज्ञाने तत्र चेतयते णिचि ॥ ९४ ॥

कृणत्ति कृन्ततीत्येते वेष्टने छेदने क्रमात् ।
कीर्त्तयेदिति संशब्दे गत्यर्थे पतयेत् पतेत् ॥ ९५ ॥

यतते तु प्रयत्नार्थे निराकारे तु यातयेत् ।
वर्तयेद् भाषणार्थे णौ वर्तने शपि वर्तते ॥ ९६ ॥

ग्रन्थातीति तु सन्दर्भे ग्रन्थयेद् ग्रन्थतीति यौ ।
कौटिल्ये ग्रन्थते ग्रन्थेर्ग्रथयेद् ग्रथति ग्रथेः ॥ ९७ ॥

हिंसासंक्लेशयोर्मन्थेन्मथेन्मथ्नाति लोडने ।
कुथ्नाति कुन्थेत् संक्लेशे पूतीभावे तु कुथ्यति ॥ ९८ ॥

प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः ।
पृथेः पर्थयतीत्येतत् प्रक्षेपे णौ पदं विदुः ॥ ९९ ॥

क्रथत्ययौ यौ हिंसायां क्राथयेत् क्रथते क्रथेत् ।
पुथ्येत् पुन्थति हिंसार्थे भाषार्थे पोथयेदिति ॥ १०० ॥

दौर्बल्ये श्रथयेत् प्रयत्नविषये स्याच्छ्राथयेन्मोक्षणे
यौ तु श्राथयति श्रथत्यपि च वा णौ श्रन्थयेच्छ्रन्थति ।

सन्दर्भे श्रि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते
शैथिल्येऽथ पथेर्गतौ पथति णौ पन्थेर्गतौ पन्थयेत् ॥ १०१ ॥

क्लिन्दते क्लिन्दतीत्येवमिदितः परिदेवने ।
क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत् ॥ १०२ ॥

आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्णिचोः ।
अर्दयेदर्दतेऽर्देर्द्यौ हिंसनेऽर्दति याचने ॥ १०३ ॥

मेदते मेद्यतीत्येते स्नेहने मिन्दयेण्णिचि ।
ऋदितो मेदते मेदेन्मेधाहिंसनयोर्द्वयोः ॥ १०४ ॥

आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति ।
वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः ॥ १०५ ॥

मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् ।
भवेच्चिण्णमुलोस्तस्मादक्रान्द्यक्रन्दि सिध्यतः ॥ १०६ ॥

गात्रप्रक्षरणे स्विद्येत् स्वेदते स्नेहमोकयोः ।
क्ष्वेदत्यव्यक्तशब्दार्थे क्ष्विद्यति स्नेहमोक्षयोः ॥ १०७ ॥

ज्वलादेश्च तुदादेश्च सीदेद्विशरणादिके ।
पद्यतेरर्थ आसीदेदासादयति चाङि यौ ॥ १०८ ॥

व्यक्तवाचि वदेद्वा णौ वादयेद्वदते वदेत् ।
सन्देशे श्यनि गत्यर्थे पद्यते पदयेत णौ ॥ १०९ ॥

णौ देवशब्दे गदयेद् व्यक्तवाचि गदेच्छपि ।
नदत्यव्यक्तशब्दार्थे भाषार्थे नादयेदिति ॥ ११० ॥

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दतीत्येवं लाभे वेदयते णिचि ॥ १११ ॥

दैन्येऽर्थे खिद्यते खिन्ते परिघाते तु खिन्दति ।
स्तुत्यादौ मन्दते हर्षे माद्येन्मादयते णिचि ॥ ११२ ॥

यौ वा णावपवारणे छदत इत्येकं द्वितीयं छदे-
दन्यच्छादयति च्छदेदिति पुनः स्याद्दर्जनेऽर्थे मितः ।
यत्तु छन्दयतीति णौ नुमि पदं तत् संवृताविष्यते
संसर्गे णिचि मोदयेदिति भवेद्धर्षे पुनर्मोदते ॥ ११३ ॥

प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे ।
कुत्सायां सन्निकर्षे वा कुत्सामात्रे तु निन्दति ॥ ११४ ॥

छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्नमि ॥ ११५ ॥

सिधेः सिध्यति संराद्धौ सेधतीत्युदितो गतौ ।
शास्त्रमाङ्गल्ययो रूपमुदितस्तदिटा भिदा ॥ ११६ ॥

शुन्धयेच्छुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि ।
शुद्धौ शुन्धति भूवादेः शुधेः शौचे तु शुध्यति ॥ ११७ ॥

शर्धते शब्दकुत्सायामुन्दे शर्धति शर्धते ।
हिक्कादौ शर्धयत्यस्य शृधेः प्रसहने णिचि ॥ ११८ ॥

बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम् ।
बुधिरो बोधनार्थस्य बोधते बोधतीत्यपि ॥ ११९ ॥

बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।
यत्तु बीभत्सते तत् स्याद्बेरूप्येऽर्थे बधेः सनि ॥ १२० ॥

(बध्नन् बीभत्सते बन्धे बाधयेदिति संयमे ।)

गुधेर्गुध्नाति रोषेऽर्थे गुध्येत् तु परिवेष्टने ।
रुन्धे रुणद्ध्यावरणे कामेऽनावनुरुध्यते ॥ १२१ ॥

राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात् ।
ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि ॥ १२२ ॥

गृधेर्गृध्यति काङ्क्षायां गर्धेस्तत्रैव गर्धयेत् ।
छेदने पूरणे चार्थे वर्धेर्वर्धयतीति णौ ॥ १२३ ॥

तदेव रूपं भाषार्थे वृधेर्वृद्धौ तु वर्धते ।
याचने वनुते शब्दे संभक्तौ च वनेदिति ॥ १२४ ॥

क्रियासामान्यवृत्तेश्च तदेव स्यात् पदं मितः ।
स्तम्भे मानयते ज्ञाने मन्यते मनुते पदम् ॥ १२५ ॥

पूजायां मानयेन्मानेद् यौ मीमांसेत तङ्मनोः ।
ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेच्छपि ॥ १२६ ॥

शब्दे च देवशब्दे च स्तनति स्तनयेत् क्रमात् ।
श्रद्धोपकरणार्थस्य तनेस्तनति तानयेत् ॥ १२७ ॥

दैर्घ्यार्थस्योपसर्गात् तु विस्तारे तनुतेऽतनोत् ।
दाने सनोति सनुते सम्भक्तौ तु सनेदिति ॥ १२८ ॥

णौ गोपयति भाषार्थे निन्दायां से जुगुप्सते ।
गोपायेद्रक्षणे त्वाये व्याकुलत्वे तु गुप्यति ॥ १२९ ॥

धूपायतीति सन्तापे भाषार्थे धूपयेदिति ।
क्षिप्यति प्रेरणे शे तु क्षिपति क्षिपते पदे ॥ १३० ॥

सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् ।
ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च ॥ १३१ ॥

आक्रोशे शप्यते शप्येच्छपते शपतीति च ।
उपालम्भे शपेर्वाक्यात् तङि स्याच्छपते पदम् ॥ १३२ ॥

तृप्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृप्तावन्यतरस्यां णौ स्यातां तर्पति तर्पयेत् ॥ १३३ ॥

सङ्घाते डेपयेतेति क्षेपे डिपति डिप्यति ।
डेपयेदिति चत्वारि णिचि शे श्यनि णौ डिपेः ॥ १३४ ॥

कल्पते शपि सामर्थ्ये कल्पयत्यवकल्कने ।
अदन्तस्य कृपेर्णौ तु दौर्बल्ये कृपयेदिति ॥ १३५ ॥

क्षम्पेः क्षम्पयति क्षान्त्यां प्रेरणे क्षपयेदिति ।
दिवादेः कुप्यति क्रोधे भाषार्थे कोपयेत् कुपेः ॥ १३६ ॥

आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे ।
व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति पदं भवेत् ॥ १३७ ॥

स्पर्शे चुपति मन्दायां गतौ तु शपि चोपति ।
शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥ १३८ ॥

तत्रैव शशपोस्तुम्पेदर्दने तुम्पयेण्णिचि ।
लुम्बयेत् तुम्बयेदर्दे शपि लुम्बति तुम्बति ॥ १३९ ॥

हिंसायां वक्रसंयोगे चुम्बयेच्चुम्बति क्रमात् ।
णिचि कुम्बयतीति स्याच्छादने शपि कुम्बति ॥ १४० ॥

गार्ध्ये लुभ्यति मोहार्थे तुदादेर्लुभतीति शे ।
दृभी भये विभाषा णौ स्यातां दर्भति दर्भयेत् ॥ १४१ ॥

अर्नादितश्च सन्दर्भे दृभति ग्रन्थ ईदितः ।
स्तभ्नाति स्तभ्नुयात् स्तुभ्नात्यपि स्तुभ्नोति सौत्रयोः ॥ १४२

स्तम्भते प्रतिबन्धार्थे स्तम्भेऽर्थे स्तोभते शपि ।
हिंसाभाषणयोः शोभेच्छोभार्थे शुभतीति शे ॥ १४३ ॥

शोभते शपि दीप्त्यर्थे शुम्भेरन्यत् तङः समम् ।
क्षुभ्नाति क्षोभते क्षुभ्येदिति सञ्चलने क्षुभेः ॥ १४४ ॥

नभ्येन्नभ्नाति नभते हिंसायां तत् तुभेः समम् ।
जृम्भणे जम्भते याभे जम्भेन्नाशे तु जम्भयेत् ॥ १४५ ॥

प्रेरणे लाभयेल्लाभेः प्राप्त्यर्थे लभते शपि ।
अषितः क्षाम्यति क्षान्तिः क्षमूषः क्षमते क्षमा ॥ १४६ ॥

गत्यादावमतीति स्याद्रोगे स्यादामयत्यमेः ।
चलने भ्रमति भ्रम्येच्छमादेर्भ्राम्यति भ्रमेत् ॥ १४७ ॥

यमेरुपरमे यच्छेद्यमयेत् परिवेषणे ।
स्यमेः स्यमति शब्दार्थे वितर्के स्यामयेत णौ ॥१४८ ॥

आलोचने शामयते शाम्यत्युपशमे श्यनि ।
भामेर्भामयति क्रोधे तत्रैव शपि भामते ॥ १४९ ॥

वित्तत्यागे व्यययति व्ययति व्ययते गतौ ।
पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि ॥ १५० ॥

स्तेये चोरयतीति स्याण्णिचि चोरयते चुरेः ।
(स्तेये चोरयतीति स्याच्चुरेश्छेदे चुरेदिति ।)
शूरयेतेति विक्रान्तौ शूर्यते स्तम्भहिंसयोः ॥ १५१ ॥

गुरते गूरयेतेति शे णावुद्यमने तङि ।
श्यनि गूर्यत इत्येवं गतिहिंसनयोस्ताङि ॥ १५२ ॥

संशये चारयेद् गत्यां चरतीरयतीरति ।
ईरेः क्षेपे विभाषा णौ लुकीर्त्ते गतिकम्पयोः ॥ १५३ ॥

गतौ शलति संवृत्यां चलने शलते शलेः ।
समाधौ शीलतीति स्याच्छीलयत्युपधारणे ॥ १५४ ॥

कलेः कालयति क्षेपे गतिसङ्ख्यानयोर्द्वयोः ।
कलयेच्छब्दसङ्ख्यानविषये कलते शपि ॥ १५५ ॥

महत्त्वे पोलति पुलेर्णौ तु तत्रैव पोलयेत् ।
सङ्घाते पूलयेत् पूलेत् पूलेः स्तां णिशपोः क्रमात् ॥ १५६ ॥

मूलेः प्रतिष्ठितौ मूलेद्रोहणे मूलयेदिति ।
वेलेत्तु चलने वेलेर्वरणे विलतीति शे ॥ १५७ ॥

क्षेपे णौ वेलयेद् भृत्यां चालयेत् कम्पने चलेत् ।
फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥ १५८ ॥

आदितोऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।
विदारणे शपि दलेद् दालयेदिति णौ दलेः ॥ १५९ ॥

श्लेषे मिलेत् सङ्गमे तु मिलते मिलतीति च ।
अर्दने देवयेद् दीव्येत् क्रीडादौ परिकूजने ॥ १६० ॥

देवयेतेदितो दिन्वेद् देवेर्देवेत देवने ।
माने गर्वयते दर्पे गर्वतीति भवेच्छपि ॥ १६१ ॥

ष्ठीवति ष्ठीव्यतीत्येते स्यातां निरसने ष्ठिवेः ।
पूरणे पूर्वतीति स्यात् पूर्वयेण्णौ निकेतने ॥ १६२ ॥

पूर्व्यतीति तु यत् स्वप्ने तत् कण्ड्वादिषु दर्शनात् ।
व्यक्तोक्तौ क्लेशते क्लेशेः क्लिश्नाति तु विबाधने ॥ १६३ ॥

दिवादेरुपतापेऽर्थे तङि स्यात् क्लिश्यते पदम् ।
दंशने दशतीति स्यात् तत्र दंशयते णिचि ॥ १६४ ॥

भाष्णे दंशयेत् काशेर्दीप्तौ काश्येत काशते ।
लिश्यते लिशतीत्येवमल्पीभावे गतौ क्रमात् ॥ १६५ ॥

व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने ।
बाधने स्पर्शने चार्थे हिक्कादौ स्पशते स्पशेत् ॥ १६६ ॥

ग्रहणे श्लेषणे चार्थे चुरादौ स्पाशयेत णौ
भ्राशते भ्लाशते दीप्तौ भ्राश्यते भ्लाश्यते तथा ॥ १६७ ॥

झषेज्झषेत संवृत्यामादाने हिंसने झषेत् ।
इष्णात्याभीक्ष्ण्य इच्छायामिच्छेद्गत्यर्थ इष्यति ॥ १६८ ॥

ईषतीतीष उञ्छेऽर्थे गत्यादावीषते भवेत् ।
घुषेर्विशब्दनादौ णौ घोषयत्याविशब्दने ॥ १६९ ॥

घोषतीतीदितो घुंषेद् घुंषते कान्तिकर्मणि ।
ईर्ष्यायामादरे चार्थे क्रमात् सूर्क्ष्यति सूर्क्षति ॥ १७० ॥

धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति ।
म्लेच्छने म्रक्षयेन्म्रक्षेत् सङ्घाते दाहकर्मणि ॥ १७१ ॥

प्लोषति प्लुष्यतीति स्तां प्लुष्णाति स्नेहनादिषु ।
प्रुष्णाति च प्रोषति च दाहे भूषति भूषयेत् ॥ १७२ ॥

अलङ्कृतौ क्षमायां यौ मर्षेन्मर्षेत मर्षयेत् ।
मृष्यते मृष्यतीति स्यात् सहने शपि मर्षति ॥ १७३ ॥

सेचने मेषतीति स्यात् स्पर्धायां मिषतीति शे ।
व्याप्तौ वेवेष्टि वेविष्टे विषेर्वेषति सेचने ॥ १७४ ॥

विप्रयोगे विषेः क्र्यादेर्विष्णातीति पदं भवेत् ।
श्लिष्यत्यालिङ्गने दाहे श्लेषति श्लेषणे णिचि ॥ १७५ ॥

श्लेषयेत् क्रमतोऽलीके तुष्टौ हर्षति हृष्यति ।
शक्तौ वर्षयते सेके वर्षेत् स्नेहे तु वर्षते ॥ १७६ ॥

भक्षयत्यदने भक्षेः शपि भक्षति भक्षते ।
कान्तौ लष्यति लष्येत श्यनि वा लषते लषेत् ॥ १७७ ॥

कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे ।
शिपोऽसर्वोपयोगे यौ शेषयच्छेषतीत्युभे ॥ १७८ ॥

लुङ्यभावादङोऽशेषीच्छिनष्टीति विशेषणे ।
शपि रोषति हिंसायां रोषे रुष्यति रोषयेत् ॥ १७९ ॥

चुम्बने परिमाणे च निक्षेन्निक्षयते क्रमात् ।
जोषयेज्जोषतीत्येते युजादेः परितर्कणे ॥ १८० ॥

प्रीतिसेवनयोरिष्टं तुदादेर्जुषते पदम् ।
धृषेः प्रसहने यौ स्तां धर्षयेद् धर्षतीत्युभे ॥ १८१ ॥

प्रागल्भ्यार्थे तु धृष्णोति परस्मैपदिनावुभौ ॥ १८१½ ॥
आलोचनार्थाण्णिचि लक्षयेत स्याल्लक्षयेल्लक्षयतेऽङ्कनार्थात् ।
स्यात् तक्षतीति त्वचनेऽथवा श्वौ तक्ष्णोति तक्षेच्च तनूक्रियायाम् ॥ १८२½ ॥
आशंसते स्यादिच्छायां शंसतीति स्तुतौ भवेत् ॥ १८३ ॥

हिंसायां शसतीच्छायामाशास्ते शास्ति शासने ।
शब्दार्थे नासते नासेः कौटिल्ये नसते नसेः ॥ १८४ ॥

असतेऽसति गत्यादौ भुव्यस्ति क्षेपणेऽस्यति ॥ १८४½ ॥

अस्रंसिष्ट स्रंसते चाद्युतादेस्ते च द्वे स्तामस्रसच्च द्युतादेः ।
ध्वंसत्याडेः साहचर्याद् द्युतादेर्नीगित्याहुर्दत्वमन्यस्य चापि ॥ १८५½ ॥

दंसयेन्मोक्षणे दस्येत् क्षये दंसयते णिचि ॥ १८६ ॥

दंशदर्शनयोर्दासेर्दाने दासति दासते ।
वस्यति स्तम्भने वस्ते छादने वसयेद्वसेत् ॥ १८७ ॥

निवासे वासयेत् स्नेहे वासयत्युपसेवने ।
(वसेन्निवासे वसयेच्च वस्ते त्वाच्छादने स्तम्भन एव वस्येत्
निवासयत्याच्छदने निवासेरासेवने वासयतीति वासेः ॥)
मोक्षणे जस्यतीति स्याण्णावत्रार्थे तु जंसयेत् ॥ १८८ ॥

हिंसाताडनयोर्धात्वोरुदितोर्जासयेदिति ।
तस्यत्युपक्षयार्थे णावलङ्कारे तु तंसयेत् ॥ १८९ ॥

ध्रस्नाति ध्रासयत्युञ्छे पदे श्नि णिचि च ध्रसेः ।
लासयेच्छिल्पयोगेऽर्थे श्लेषणे क्रीडने लसेत् ॥ १९० ॥

भाषणे त्रंसयेत् त्रंसेर्धारणे त्रासयेण्णिचि ।
त्रसति त्रस्यतीत्येवमुद्वेगार्थे तु वा श्यनि ॥ १९१ ॥

णौ पिंसयति भाषार्थे गत्यां तु शपि पेसति ।
गतिशासनयोः कंस्ते कसतीति गतौ शपि ॥ १९२ ॥

शब्दे शपि रसेत् स्नेहास्वादयो रसयेद्रसेः ।
प्रपूरणे दोग्धि दुग्धे दोहतीत्यर्दने दुहेः ॥ १९३ ॥

ण्यन्तस्य ग्रहणे गृहेर्गृहयते तत्रानदन्ताद् गृहे-
र्भूवादेः शपि गर्हते श्नि तु पदे गृह्णात्यगृह्णीत च ।

गर्हेर्वा णिचि निन्दनार्थविषये गर्हेत् तथा गर्हयेद्
भूवादेः शपि कुत्सनार्थविषये गर्हेर्भवेद् गर्हते ॥ १९४ ॥

रहयेद्रहति त्यागे गतौ रंहेस्तु रंहति ।
श्ने तृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः ॥ १९५ ॥

महयेन्महतीत्येते पूजायां णौ शपि क्रमात् ।
चहयेच्चहतीत्येते चहेः स्तां परिकल्कने ॥ १९६ ॥

मर्षणे सहते यौ तु साहयेत् सहति द्वयम् ।
श्यनि सह्यति शक्यर्थे पूजनेऽर्हति चार्हयेत् ॥ १९७ ॥

स्नेहने स्नेहयेत् प्रीतौ स्निह्येद् बृंहति बर्हति ।
वृद्धौ भाषार्थविषये बृंहयेद्बर्हयेदिति ॥ १९८ ॥

नुमादिनान्यभावेऽपि सादृश्यात् केऽप्यवक्षत ।
चुरादिश्चुर्युजादिर्युः स यस्माण्णिज् विभाषितः ॥ १९९ ॥

सरूपा धातवः केचिदनुक्ता अपि सन्ति चेत् ।
सन्तूक्तास्तेऽपि चात्रोक्ता न दुष्यन्त्यन्यसम्भवे ॥ २०० ॥

इत्यनेकविकरणसरूपधातुव्याख्यानं देवनाम्ना विरचितं
दैवं समाप्तम् ।

DATE OF ISSUE

This book must be returned within 3, 7, 14 days of its issue. A fine of ONE ANNA per day will be charged if the book is overdue.

Class No. S415 Book No. D271DT
Vol.
Author: DEVA
Title: DAIVAM
Acc. No. 16513